Tanjore Sarasvati Mahal Series No. 381

॥ शिवरहस्यम् ॥

SIVARAHASYAM

VII CHAPTER

III Part

Published by

Thanjavur Maharaja Sarfoji's

SARASVATI MAHAL LIBRARY,

THANJAVUR.

❀

1998] [Price : Rs. 70-00

Thanjavur Sarasvati Mahal Series No: 381

SRI

SIVARAHASYAM

VII CHAPTER

III Part

॥ शिवरहस्यम् ॥

॥ उग्राख्ये सप्तमांशे ॥

॥ तृतीयो भागः ॥

0381
Sarasvati Mahal Library, Thanjavur

Published by

DIRECTOR
THANJAVUR MAHARAJA SERFOJI'S
SARASVATI MAHAL LIBRARY,
THANJAVUR.

1998] [Price: Rs. 70—00

Thanjavur Sarasvati Mahal Series No: 381

SRI

SIVARAHASYAM

VII CHAPTER

III Part

॥ शिवरहस्यम् ॥

॥ उग्राख्ये सप्तमांशे ॥

॥ तृतीयो भागः ॥

0381
Sarasvati Mahal Library. Thanjavur

Published by

DIRECTOR
THANJAVUR MAHARAJA SERFOJI'S
SARASVATI MAHAL LIBRARY,
THANJAVUR.

❀

1998] [Price: Rs. 70—00

3 शि

BIBLIOGRAPHICAL DATA

Title of the Book	...	SIVARAHASYAM
Editor	...	Thethiyur Sri S. Krishnamurthi Sastrigal
Publisher	...	Director Sarasvati Mahal Library, Thanjavur
Publication No.	...	381
Language	...	Sanskrit
Edition	...	Ist Edition
Date of Publication	:	March, 1998
Paper used	...	14.2 Kg. Seshasayee
Size of the Book	...	21 x 14 cm.
Printing type used	...	16 pt.
Number of pages	...	360
No. of copies	...	500
Price	...	Rs.70 /-
Printer	...	Star Print & Pack, Thanjavur
Binding	...	Card Board
Subject	...	Religion

तञ्जावूर् सरस्वतीमहालयग्रन्थमालायाः पुष्पम् - सं ३८१

॥ श्रीः ॥

॥ शिवरहस्यम् ॥

॥ उग्राख्ये सप्तमांशे ॥

॥ तृतीयो भागः ॥

सरस्वतीमहालयपण्डितवर्येण

तेदियूर् श्रीकृष्णमूर्तिशास्त्रिणा

संशोध्य

प्रकाशनार्हं कृतम्

प्रकाशितम्-

तञ्जावूर् महाराजाशरभोजीसरस्वतीमहालयेन

प्रकाशितम् ॥

१९९८] [मूल्यम् : रू. ७०-००

1st Edition : 1998.

प्रकाशिका-

तञ्जापुरीशरभोजीमहाराजस्य

सरस्वतीमहाल्ग्रन्थालयकार्यकारणी समितिः तञ्जावूर्

तञ्जापुरी

स्टार् प्रिण्ट् & पेंक् मुद्रिणालये मुद्रतम्

வெளியீட்டாளர் முகவுரை

ஸ்ரீ:

சரஸ்வதி மகால் நூலகம் சிவரகசியம் 7-வது பகுதியின் மூன்றாவது பாகத்தை வெளியிடுவது குறித்து மகிழ்ச்சி அடைகிறேன். சைவ மதக் கோட்பாடுகளை வலியுறுத்திக் கூறும் இந்நூலின் இப்பகுதியில் (20 முதல் 25 முடிய) ஆறு அத்தியாயங்கள் பதிப்பிக்கப்பட்டுள்ளன. அவற்றில் உள்ள கருத்துக்கள் தமிழில் முன்னுரையில் சுருக்கித் தரப்பட்டுள்ளன. ஆன்மீக அன்பர்களுக்கும், குறிப்பாக சிவ வழிபாட்டில் ஈடுபாடு கொண்டவர்களுக்கும் எளிய சமஸ்கிருதச் செய்யுட்கள் அடங்கிய இந்நூல் வெகுவாகப் பயன்படும்.

மந்த்ர, ஜ்யோதிஷ சாஸ்திரங்களில் வல்லுநரான இதன் பதிப்பாசிரியர் நூலக மேனிலை சமஸ்கிருத பண்டிதர் திரு.மி.கு. எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள் அவர்களுக்கு எனது பாராட்டுக்கள்.

அரிய நூல்களைப் பதிப்பிக்கும் பணியினை ஊக்குவித்து வெளியிடச் செய்யும் நூலக

நிர்வாக அலுவலர் திரு. சி. பாலசுப்ரமணியன் அவர்களுக்கும். நூலக வெளியீட்டு மேலாளர் திரு. அ. பஞ்சநாதன் அவர்களுக்கும், ஏனையோருக்கும் எனது பாராட்டுக்கள்.

இந்நூலை அச்சிடும் பணியினைச் சிறப்பாகச் செய்துள்ள ஸ்டார் பிரிண்ட் அண்ட் பேக் அச்சகத்தினருக்கும் எனது பாராட்டுக்கள்.

அரிய நூல்களை அச்சிடுவதற்கு பொருளுதவி வழங்கும் நடுவண் அரசுக்கு எனது நன்றியையும் தெரிவித்துக்கொள்கிறேன்.

து. நா. இராமநாதன், இ. ஆ. ப.,
மாவட்ட ஆட்சியர் மற்றும் இயக்குநர்,
சரசுவதி மகால் நூலகம்.

தஞ்சாவூர்,
9—3—1998.

சிவமயம்

முன்னுரை

உலகின் பிறநாடுகளில் நாகரிகமும், நெறிமுறைகளும் மலராமல் அறியாமை இருள் சூழ்ந்திருந்த காலத்திலும் ''கர்மபூமி'' யெனப்படும் பாரதநாடு - முதிர்ந்த நாகரிகச் சிறப்புடனும், பண்பாடு; நெறிமுறை, மொழி யறிவு, இலக்கிய அறிவு இயல், இசை, நாடகம், சித்திரம், சிற்பம், கட்டிட வடிவமைப்புத்திறன் போன்ற கலையறிவு - இறையுணர்வு இன்னபிறச் சிறப்புக்களுடனும் சிறப்புற்றிருந்தது என்பது யாவரும் அறிந்ததே.

வேத நெறிகளிலும், இறை வழிபாட்டிலும் உலகின் பிற நாடுகளுக்கு காலம்காலமாகவே நம்நாடு வழிகாட்டியாக இருந்து வந்திருக்கிறது. நம்நாட்டில் உள்ளதுபோன்ற - விரிவான - நுட்ப மான சமயச் சுதந்திரம் உலகில் எந்தச் சமயத்திலும் இல்லை. பாரதத்தில் இமயம் முதல் குமரி வரை சைவநெறி பரந்துள்ள தெனினும் தென்னாட்டில் அதுவும் தமிழகத்தில் சைவநெறி தழைத்துள்ளதுபோல் வேறெங்கிலும் சிறப்புடன் விளங்கவில்லை யெனலாம் ''தென்னாடுடை சிவனே போற்றி'' என்ற வழக்கும் இதனை உறுதிசெய்கின்றது. சைவம் வளர்த்த அறுபத்து மூன்று சமயக்குரவர்கள் தோன்றிய தமிழகத்தில்தான் சைவ ஆகமங் களும் - அவ்வழிவந்த பூசை முறைகளும் இன்றளவும் தழைத்து விளங்குவதாகும் சைவ சமயச் சிறப்புப்பற்றி சிவாகமங்களும் சிவபுராணம், கந்தபுராணம், திருமுறைகள் முதலானவை.

எழுதாக்கிளவி, யெனப்படும் வேதங்கள் போல் உலகுள்ளளவும் நிலைத்திருப்பவையாகும்

சைவ சமயச் சிறப்புபற்றி பதினெட்டு புராணங்களில் ஒன்றான ஸ்கந்த புராணத்தில் "சிவரஹஸ்யம்" என்ற பகுதி விரிவாகக் கூறுவதாகும். இதேபோன்று ஸம்ஸ்க்ருத மொழியில் அமையப்பெற்ற "சிவரஹஸ்யம்" எனும் மாபெரும் தனி நூலும் சிவ தத்துவம்பற்றி விரிவாகக் கூறுவதாகும் இதன் ஆசிரியர் யார் என்று நூலில் எவ்விடத்திலும் கூறப்படவில்லை

ஒரு லக்ஷம் ஸம்ஸ்க்ருத ச்லோகங்கள் கொண்ட மாபெரும் இதிஹாஸமான மஹாபாரதம் பற்றிய ஒரு பழமொழி உண்டு. இந்த நூலில் கூறப்படும் தர்ம தத்துவங்கள், ரகஸ்யங்கள் பலவும் பிறநூல்களில் காணப்படலாம். ஆனால் இதில் (மஹாபாரதத்தில்) காணப்படாத (கூறப்படாத) தர்ம. ரஹஸ்யம் எதுவும் பிறநூல் களில் இருப்பதற்கில்லை என்ற கருத்துள்ள.

"यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्"

எனும் வாக்கின்படி இந்த நூல் முழுவதிலும் சைவநெறி சம்பந்த மான உயர்ந்த கருத்துக்கள் பலவும் சிறப்பாகக் கூறப்பட்டுள்ளன. ஒரு லக்ஷத்தி இருபதினாயிரம் ஸம்ஸ்க்ருத ச்லோகங்கள் கொண் டுள்ள இந்தநூல் நமது ஸரஸ்வதி மஹால் நூலகத்தில் மட்டுமே முழுமையாகக் கிடைக்கக்கூடியதாகும்.

சிவபெருமானின் பன்னிரண்டு பெயர்களைக்கொண்டு பன் னிரண்டு அம்சங்களாக (பகுதிகளாக) இந்நூல் பிரிக்கப்பட்டுள்ளது. 1 மஹேச்வர. 2 பவ, 3. ஹர, 4. சிவ 5. பர்க, 6. சங்கர, 7. உக்ர. 8 பீம, 9 சதாசிவ, 10. ஈச்வர,

11 மஹாதேவ, 12 ஈச என்ற பெயர்களுடன் 12 பகுதிகளாக வுள்ள இந்தநூலின் ஒவ்வொரு பகுதியிலும் சிவதத்துவங்கள் மிக அழகிய பலவித சந்தங்களுடன் - இலக்கியநயம், சொல்நயமுடன் விளங்கும் ஸம்ஸ்க்ருத ச்லோகங்களால் விளக்கப்படுகின்றன.

இந்த நூலின் முதல் இரண்டு பாகங்கள் (மாஹேச்வர பவ எனும் அம்சங்கள்) மட்டும் 1913-ம் ஆண்டில் சென்னையைச் சேர்ந்த செல்வந்தரும், சிவநெறிச் செம்மலுமாக விளங்கிய சதாசிவ செட்டியார் என்ற அன்பரால் வெளியிடப்பட்டுள்ளன. அவைகளும் இந்நாடகளில் கிடைப்பதற்கு அரிதாகவுள்ளன.

கடந்த 1971-ம் ஆண்டில் நமது நூலகத்தில் அச்சிட்டு வெளியிடப்பட்ட 3 4, 5, 6 அம்சங்கள் தஞ்சை ஸ்ரீ ஸ்வாமிநாத ஆத்ரேயர் எனும் ஸம்ஸ்க்ருத பேராசிரியர் அவர்களால் சிறந்த முறையில் பதிப்பிக்கப்பட்டுள்ளன.

மீதமுள்ள பகுதிகளை (7 முதல் 12 முடியவுள்ளவை)ப் பதிப்பிக்கும் பணி 1991-ல் முன்னாள் மாவட்ட ஆட்சியரும், நூலக இயக்குநரு(பொ)மான திரு ஷண்முகராஜேச்வரன் அவர்களால் எனக்களிக்கப்பட்டது. பிழைகளைத் திருத்தம் செய்து பதிப்பிக்கும் பணி அதுமுதல் இரண்டு ஆண்டுகளில் முடிக்கப்பட்டது.

முதல் அம்சத்தில் — சிவபெருமானைக் குறித்துக் கடும் தவம்செய்த ஜைகிஷவ்ய முனிவர் சிவனருள்பெற்று கந்தப் பெருமானை சேவித்தல், சிவநெறிகள்பற்றி பார்வதிதேவியிடம் சிவபெருமான் அருளிச்செய்ததை உடனிருந்து செவியுற்ற கந்தப் பெருமானிடம் சிவதத்துவம்பற்றி விரிவாகக் கூறும்படி ஜைகீஷவ்யர் வேண்டுதல் - நந்திகேச்வரர், ப்ருங்கி முதலான சிவகணத்தைச் சேர்ந்தோரும் திருமால் முதலான தேவர்களும் முனிவர்களும்

அடங்கிய அவையில கந்தப்பெருமான் சிவரகஸ்யக் கருத்துக் களைக் கூறுதல். ஸத்யோஜாதம் - வாமதேவம், அகோரம் - தத் புருஷன் ஈசானன் எனும் பஞ்சப்ரம்மங்கள் செய்த சிவஸ்துதி - கைலாய வருணனை முதலான கருத்துக்களும்

இரண்டாம் பகுதியில் — பார்வதிதேவி தவமியற்றுதல், சிவபெருமான் அருள்புரிதல். சிவகைலாயம் போன்று பராசக்திக் கென "சிந்தாமணி த்வீபம்" அமைத்தல் - பாரசக்தியின் தனி வாசஸ்தானமாக அமைக்கப்பட்ட சிந்தாமணி த்வீப வருணனை, துர்வாஸ முனிவரின் தவம் - சக்தி தத்துவ விளக்கம் - ஆகியவையும்

மூன்றாவது பகுதியில் — காயத்ரீயின் தவம் - சிவ வழிபாட்டின் சிறப்பு - மேரு மலையின் சிறப்பு - வில்வமரத்தின் பெருமை - சிவபூஜை மகிமை பற்றியும்

நான்காவது பகுதியில் — நந்திகேச்வரர், சண்டேசப் பெருமான், ப்ருங்கி, மார்க்கண்டேயர், அகஸ்தியர் முதலானோருக்கு சிவபெருமான் அருள் புரிதல்

ஐந்தாவது பகுதியில் — கேதாரேச்வர, ஓங்காரேச்வர, வைத்தியநாதம் - குஸ்ருணேச்வர - நாகநாத-மஹாகால-பீம-த்ரியம்ப - கேச்வர - விச்வநாத - ஸ்ரீசைல கோகர்ண - ராமேச்வர எனும் தலங் களில் உள்ள பன்னிரண்டு ஜோதிர்லிங்க வருணனைகளும்,

ஆறாவது அம்சத்தில் — மஹாபாரதத்தில் பகவத்கீதை போன்று - வேதாந்த உபநிடதக் கருத்துக்களடங்கிய ருபு கீதையும் கூறப்பட்டுள்ளன.

இப்பொழுது பதிப்பிக்கப்படும் 7-வது அம்சத்தில் முதல் இரண்டு பகுதிகளில் 19 அத்யாயம் முடியவுள்ள கருத்துக்கள் கூறப் பட்டுள்ளன.

இந்த 3 வது பகுதியில் 20-வது அத்யாயம் முதல் 25 வது அத்யாயம் வரையிலான கருத்துக்கள் கூறப்படுகின்றன.

இருபதாவது அத்யாயம் — இதில் காஞ்சி தல மகிமை, கோடிதீர்த்தப் பெருமை, ஏகாம்பரநாதரின் சிறப்பு, சிவனடியார்களின் பெருமை, சிவ துவேஷிகள் நரகவேதனைகளை அனுபவித்தாகவேண்டியதுபற்றியும், ஜீவன் (மனிதன்) இறக்கும் சமயத்தில் சிவனை நினைத்தாலும், சிவ நாமங்களைச் சொன்னாலும் சிவனடியார்களில் / சிவகணங்களில் ஒருவராக ஆகும் தகுதி ஏற்படுவதுபற்றியும், யமலோகத்தில் சிவனடியார்களைத் துன்புறுத்திய தோஷத்தால் சுயநினைவு இழந்து விழுந்து கிடக்கும் 63 கோடி யமதூதர்கள் சிவனருளால் நினைவு பெற்று எழுதல், மேலும் 'விச்வன்' எனும் பெயருள்ள அரசனுக்குப் பெரும்பாக்யம் ஏற்படக் காரணமாயிருந்த சிவ வழிபாடுபற்றிக் கூறும்முகமாக - நாட்டில் பஞ்சம் ஏற்பட்டபொழுது கௌதம முனிவர் தம் தவசக்தியால் ஜீவராசிகளுக்கு உணவு கிடைக்கச் செய்தல்பற்றியும், அதனைப் பொறுக்காத சில சிறுமதிபடைத்த முனிவர்கள் தம் தவவலிமையால் பொய்யாகப் பசு ஒன்றைத் தோற்றுவித்து அது கௌதமரின் ஆசிரமத்தில் "நீவார" தான்யங்களைத் தின்பதுபோலவும், அதனை கௌதமர் கண்டு புல்லால் அதனை அடித்து விரட்டினால் அந்தப் பசு இறந்து விடுவதுபோல் திட்டமிட்டுச்செய்து அதன்படி பசுவை கௌதமர் விரட்ட பசு இறந்துவிடுவதுபோல் பொய்த்தோற்றம் ஏற்படச்செய்து "கௌதமர் பசுவைக் கொன்றுவிட்டார்" என்ற பழிச்சொல்லைப் பரப்பினர். அதனால் கோபம்கொண்ட கௌதமர் அம் முனிவர்களைச் சபித்தல் பற்றியும், இதனை அறிந்த திருமால், இந்தச் சாபத்தின் விளைவாக கலியுகத்தில் சிவதுவேஷிகள் விருத்தியாவர் என்றும் பூமியில் மக்களுக்கு பல பல தெய்வ வழிபாட்டில் ஈடுபாடு ஏற்படும் என்று கூறுவதும் ப்ரம்மா, விஷ்ணு, சிவபெருமான்,

இந்திரன் முதலான தெய்வங்களைத் தோற்றுவித்த மூலப்ரகிருதி யான ஸ்ரீ காமாக்ஷியையும் ஸ்ரீ ஏகாம்பரநாதரையும் பூஜித்தால் தெரிந்தோ(தும்) தெரியாமலோ(லும்) செய்யப்பட்ட பாபங்கள் தீரும் என்பதுபோன்ற கருத்துக்களும் கூறப்படுகின்றன.

21-வது அத்யாயத்தில் — அருணாசலத் (திருவண்ணா மலை) தலமகிமை அருணாசலத் தலயாத்திரையால் முக்திநிலை கட்டாயம் ஏற்படும் என்றும், உத்தராயணம் தக்ஷிணாயனம், மாதப்பிறப்பு நாட்களில் எல்லா தேவர்களும் அருணாசலத் தல யாத்திரை செய்கின்றனர் என்றும் கொடிய பாபங்களைச் செய்வோரும் நர்மதை பாணலிங்கத்தை தரிசித்தால் பாபங்கள் விலகும் என்பதற்குச் சான்றாக - ஒரு அந்தணனுடைய வரலாறும், 'பலிசக்ர' மன்னருக்கு ஆண் குழந்தை பிறந்ததில் அக்குழந்தைக்கு முன் பிறவி நினைவு மாறாதிருத்தல், கௌதமர் அந்த ராஜகுமாரனைக் கண்டு வியப்புறுதல், மேலும் கௌதமரின் அருளுரையால் அந்த ராஜகுமாரன் தவறாமல் சிவபூஜை செய்தல், மேலும் அவன் தனது வாலிபப்பருவத்தில் கணக்கற்ற மனைவிகளை மணந்து எண்ணற்ற குமாரர்களை அடைந்து அவர்களையும் தம் வழியில் நிற்கச்செய்தது போன்ற விபரங்கள் கூறப்படுகின்றன.

22-வது அத்யாயத்தில் — இதில் முன் அத்யாயத்தில் கூறப்பட்டுள்ள விபரங்கள் தொடரப்படுகின்றன, ப்ரம்மனும் திருமாலும் தாமே எல்லாதெய்வங்களுக்கும் மேலானவர் என்று கூறுதல், உருவமற்ற நான்கு வேதங்களும் உருவெடுத்துவந்து சிவமே மேலானவர் என்று கூறுதல் பற்றியும், எல்லா தேவர்களிலும் மேலான அவரையே எல்லோரும் வழிபடவேண்டும் என்றவாறு எழுந்த அசரீரியின் சொல்கேட்டு விஷ்ணு ப்ரம்மாதியர் தம் தவறை உணர்ந்து முனிவர்கள் முன்னிலையில்

"शिव एव महादेवो देवदेवोत्तमः प्रभुः"

(சிவ ஏவ மஹாதேவோ தேவதேவோத்தம: ப்ரபு:)

'எல்லா தேவர்களிலும் மேலானவர் சிவமே' என்று ஒப்புக் கொண்டு கூறுவதுபற்றியும், மேலும் உமாமகேச்வர விரதமே சிறந்த விரதம் என்று கூறி பூஜைமுறைகள்பற்றி விரிவாகவும் கூறப்படு கிறது. மேலும் "உமாமகேச்வர விரதத்தை நோற்றுச் சிறப்படைந் தவர் யாரேனும் உளரோ" என்ற கேள்வி எழவே திருமால் துர்வாச முனிவரின் சாபத்திலிருந்து விடுதலை பெறுவதற்காக இந்த விரதம் இருந்து வைகுண்டபதவியையும் லக்ஷ்மியையும் திரும்ப அடைந்தார் எனவும் கூறப்படுகிறது.

23-வது அத்யாயத்தில் — விருத்தாசலத் தலப் பெருமையும், அங்கு தீர்த்த யாத்திரையாக கச்யபர், கண்வர் முதலான முனிவர்கள் வருதல், அவர்கள் விருத்தாசலநாதரைப் பூசித்தல், அதுசமயம் வேதாந்தக் கருத்துக்கள் நிறைந்த துதிகளை கௌதமர் கூறுதல், கௌதம முனிவரைக் காண்பதற்காக அந்த தலத்திலுள்ளோர் கூடிவருதல் திருமாலும் வருதல்,

அதுசமயம்

शिवमायामोहितानां दुःखमप्यनुभूयते ।

(சிவமாயாமோஹிதானாம் துஹ்க்மப்யநுபூயதே)

சிவமாயையின் விளைவாக அறிவிழந்து மயக்கமுற்றவர்கள் பெரும் துயர் அனுபவிக்கலாகிறதே, அதிலிருந்து விடுதலை பெறுவது எப்படி ? அதற்கெனச் செய்ய வேண்டுவது யாது என்ற கேள்வி எழுந்தபொழுது கௌதம முனிவர் - விபூதி அணிதல், ருத்திராக்ஷம் அணிதல், யஜுர் வேதத்தில் அடங்கியுள்ள ஸ்ரீருத்ரப்பகுதியை ஓதுதல், பஞ்சாக்ஷர மந்திரத்தை ஜபித்தல், சிவபூஜை செய்தல் முதலானவற்றைச் செய்வோருக்கு ஒரு குறையும் ஏற்படாது. அவற்றில் நம்பிக்கையற்று அவற்றைச் செய்யாதிருத்த

லால் - அவற்றை இகழ்தலால், மக்கள் மாயையின் மயக்கத்தில் உழலவேசெய்வர் [குடி. (மது) அருந்தியவர் எவரும் தாம் மயக்கத்தில் இருப்பதாக ஒப்புக்கொள்கிறதில்லை] ஆதலால் சிவதர்மங்களைச் (மேலே கூறப்பட்டவைகளுடன் சிவனடியார் களைச் சிறப்பித்து வேண்டியவற்றைச் செய்துகொடுத்தல், உணவு அருந்தச் செய்தல் போன்றவற்றையும் இணைந்த சிவதர்மங்களை) செய்தலால் சிவமாயையிலிருந்து விடுபடலாம். அதுமட்டுமின்றி உயிர் நீங்கும் தருவாயில் சிவ - சிவ என்று சொல்வதாலேயே முக்திநிலை பெறலாம் எனவும், "சைவர்" என்ற சொல் லிற்கு உரியபொருள் - சிவனடியார்களை உபசரிதது வேண்டுவன செய்தலாலும் பெ்ரும் நற்பயன் ஏற்படும் என்பதும், விருத்தாசலப் பெருமானை சேவித்ததினால் கச்யபர், கண்வர் முதலான முனிவர் களுக்கு காசித்தலத்திற்குச் செல்லும் பெரும்பாக்கியம் கிடைக்கப் பெற்றது என்றும் கூறப்படுகிறது.

24-வது அத்யாயத்தில் — சிதம்பரத்தலத்தின் சிறப்பு "சிவகங்கை" யெனும் சிவதீர்த்தம் விளங்கும் சிதம்பரத் தலத்திற்குச் செல்லவேண்டும் என்று விருப்பம் தெரிவித்த லக்ஷ்மீதேவியின் வேண்டுகோளைக் கேட்டு மகிழ்ந்த திருமால் லக்ஷ்மீதேவியுடன் சிதம்பரம் சென்றடைதல், அங்குள்ள சிவகங்கையெனும் குளத்தில் இருவரும் (திருமாலும், லக்ஷ்மிதேவியும்) ஸ்நானம்செய்து திருநீ றணிந்து, ருத்ராக்ஷமாலைகள் அணிந்தும் 'சிவபூஜை செய்தல், மேலும் அங்குள்ள எண்ணற்ற சைவப்பெருமக்களை நோக்கி 'சிவ தத்துவம் பற்றிக்கூறுங்கள்' என்று வினவிய திருமால், தாமே அரிய ரஹஸ்யமான சிவதத்துவங்களைச் கூறுதல் -

अनन्तवाजपेयादियागानां यत्फलं द्विजाः ।
ततोऽनन्तगुणं पुण्यं शिवपूजाविधेः फलम् ॥

" அனந்தவாஜபேயாதியாகானாம் யத்பலம் த்விஜா: ।
ததோऽனந்தகுணம் புண்யம் சிவபூஜாவிதே: பலம் ॥ "

யாகங்களில் உயர்ந்தது வாஜபேயம் என்பதாகும். அதன் பலன்கள் அளவிடமுடியாதது அந்த யாகத்தைச் செய்தவர் பெருமதிப்பிற்கு உரியவராகிறார் சுருங்கக் கூறின் வாஜபேயயாகம் செய்தவர் அரசவைக்கு வந்தால் அரசன் தனது ஆசனத்திலிருந்து இறங்கி அந்த யாகம் செய்தவரை அந்த சிம்மாசனத்தில் அமரச்செய்தல் வேண்டும். மேலும் அரசன் அவருக்கு வெண்குடை பிடித்து மரியாதை செய்யவேண்டும் என்று பலவாறு கூறப்பட்டுள்ளது. கேரளநாட்டில் சிலர் செல்லுமிடம் எல்லாம் மழைபெய்யாமலிருப் பினும் - வெண்ணிறக்குடை பிடித்துக்கொண்டு செல்வர். இது அவர்களுக்குரிய மரியாதையை மதிப்பை உணர்த்துவதாகும். அதுபோலவே வாஜபேயயாகம் மகத்தான நற்பலன் நன்மதிப்பை அளிக்கக்கூடியது.

அத்தகைய வாஜபேயயாகத்தை பலமுறை செய்வதால் என்னென்ன பலன்கள் கூறப்பட்டிருக்கிறதோ அதனைவிட அள வற்ற பலன் சிவபூஜையால் ஏற்படும் என்றும், சிவதர்மங்கள் பற்றியும் வேதபுருஷன் கூறும் சிவதத்துவம் பற்றியும் கூறப் பட்டுள்ளது.

25-வது அத்யாயத்தில் — முன் அத்யாயத்தில் கூறப் பட்டவாறு அதனைத் தொடர்ந்து திருமால் முதலானோர் சிதம்பரத் தில் ஸ்ரீமூலநாதரை வழிபடுதல், சிவபூஜையின் சிறப்புக்கள் பெருமைகள் கூறப்படுகின்றன. அதன் தொடர்பாக வில்வ இலை களைக்கொண்டு சிவபூஜை செய்வதை விரதமெனக்கொண்டு - (தேவைப்படும்போது வில்வ இலை கிடைக்காமல் போகலாமோ என்ற எண்ணத்தில் பெரிய பெரிய குடங்களில் வில்வ இலைகளைச்

சேகரித்துச் செல்வத்தைவிடப் பெரிதாகப் பாதுகாத்துவந்த) ஒரு அந்தணன்பற்றியும் அவன் உயிர்பிரியும் காலத்தில் சிவனார் தம் சுயரூபத்தை அவனுக்கு காண்பித்து அவனுக்கு வரம் அளித்தது பற்றியும், சிவபூஜைக்குத் தேவையான திருநீறு தேவையான பொழுது கிடைக்காமல் போகலாகாது என்ற எண்ணத்துடன் குடம் குடமாக திருநீற்றைச் சேமித்துவைக்கும் இயல்புள்ள பக்தன் பற்றியும் அவன் தம்முயிர் நீங்கும் சமயத்தில் சிவனார் தோன்றி ' வேண்டுவனக் கேள் '' என்னும்போது பக்தன் '' பெருமானே ! நான் எதுவும் கேட்வில்லை

न याचे न याचे महादेव शम्भो
वरान् अन्यदेवान् अहं भक्तबन्धो ।
परन्त्वेकरूपां मदन्यैरलभ्यां
भवद्भक्तिमेकां परामीश याचे ॥

ந யாசே ந யாசே மஹாதேவ சம்போ
வரான் அன்யதேவான் அஹம் பக்தபந்தோ ।
பரந்த்வேகரூபாம் மதன்யைரலப்யாம்
பவத்பக்திமேகாம் பராமீச யாசே ॥

மேலும் நான் தங்களைத்தவிர பிற எந்த தெய்வத்திடமும் வேண்டியவற்றைக் கேட்கவும்மாட்டேன். ஏனெனில் தங்களைவிட உயர்ந்த தெய்வம், உயர்ந்த பலன்களை அளிக்கவல்ல தெய்வம் எங்கே இருக்கிறது ? பக்தன் இன்னொரு தெய்வத்திடம்போய் கேட்கும் படியாகத் தாங்கள் (மேலும் போதாமலும்) கொடுக்கமாட்டீர்களே ஆனால் ஒன்று கேட்பேன் என்னைத்தவிர தங்களிடம் பக்தி செலுத்தியவன் யாருமில்லையென்ற அளவுக்குத் தங்களிடம் எனக்கு மாறாத பக்திமட்டும் தாருங்கள் என்றவாறு சிறந்த கருத்து களடங்கிய 22 சுலோகங்களால் துதிக்கும் தோத்திரங்களும், தொடர்ந்து அகத்திய முனிவர் கூறியருளிய சிவதத்துவ நெறிகள்

பற்றியும் இல்லறத்துயர்களிலிருந்து விடுபடும் வழிமுறைகளும், மேலும் அஹங்கார (கர்வ) வயப்பட்ட இந்திரன் காரணமில்லாமல் ஏற்பட்ட மனத்துயர் காரணமாக வருநதி தேவகுருவுடன் பிரம்மா வைக்காண சத்யலோகம் செல்லுதல். அங்கு ப்ரம்மதேவர் பஞ்சாக்ஷர மந்திரத்தின் (திருவைந்தெழுத்து மந்திரத்தின்) பெருமைகள் - ஆண் பெண்கள் செய்யும் சிவபூஜையில் உள்ள வேறுபாடு. மற்றும் சிதம்பரத் தலத்தி ப் சித் + அம்பலத்தில் - ஞான - ஆகாயத்தில் திருநடம்புரிந்த சிவனாரின் திருக்கோலம் கண்டதன் பயனாக, விஷ்ணு முதலானோர் காசிந்தலம் செல்லும் பேற்றைப் பெற்றனர் என்றும், மனிதனின் நெஞ்சுக்குழிக்கு ஒரு ஒட்டையளவு கீழே தொப்புள் குழிக்கு மேலே ஒரு ஒட்டையளவு உயரத்தில் உள்ள இதயத்தாமரையில் சுடர்விடும் சிவனாரை எல்லோரும் வழிபட வேண்டும் எனவும் கூறப்படுகிறது.

இவ்வாறு 25 வது அத்யாயம் முடியவுள்ள - பகுதி சிவரஹஸ்யம் 7-வது அம்சத்தின் மூன்றாவது பகுதியாக வெளி யிடப்படுகிறது.

இந்த நூலில் எழுத்துப் பிழைகள் - சொற்பிழைகள் - இலக்கணப் பிழைகள் இல்லாமல் இல்லை இதிஹாச புராண நூல் களில் திருத்தம் தேவைப்படும் சொற்பிரயோகங்கள் உண்டு. அவைகளுக்கு விதிவிலக்கு உண்டு. அது ஆர்ஷ ப்ரயோகம் (आर्ष प्रयोग:) என்று சொல்லப்படும் அதுபோலவே இதுவும் பழைய நூலாகக் கருதப்படவேண்டும் என்ற எண்ணம் இந்த நூலாசிரியருக்கும் இருந்திருக்கிறது. ஆனால் திருத்தம் செய்யப் படத்தேவையில்லாமலேயே பொருள்கொள்ள இயலுவதால் திருத்தம் செய்யப்படாமலேயே விடப்பட்டுள்ளது

இவ்வரியநூலை அச்சிட்டு வெளியிட அனுமதி வழங்கிய நூலக இயக்குநரும், தஞ்சை மாவட்ட ஆட்சியாளருமான திரு. து. நா. இராமநாதன், இ. ஆ. ப, அவர்களுக்கு என் மனமார்ந்த நன்றியினைத் தெரிவித்துக்கொள்கிறேன்.

இவ்விஷயத்தில் எனக்கு ஊக்கமும் உற்சாகமும் அளித்து உதவிய நூலக நிர்வாக அலுவலர் திரு C. பாலசுப்ரமணியன் அவர்களுக்கும், நூலக நூற்பதிப்பு மேலாளர் திரு. அ. பஞ்சநாதன், M. A., M. L. I. S., அவர்களுக்கும் எனது மனம் நிறைந்த நன்றியைத் தெநிவித்துக்கொள்கிறேன்.

இந்நூலின் இப்பகுதியைச் சிறப்பாக அச்சிட்டளித்த தஞ்சை ஸ்டார் பிரிண்ட் & பேக் நிறுவனத்திற்கு எனது பாராட்டுக்கள்.

பண்டிட S. கிருஷ்ணமூர்த்தி சாஸ்திரிகள்.
மேநிலை சம்ஸ்க்ருத பண்டிட்,
சரஸ்வதி மஹால் நூலகம்.

தஞ்சாவூர்,
10 - 1 - 96

सप्तमांश-तृतीयभागोक्त-

॥ विषयसङ्ग्रहः ॥

❀❀❀

विंशेऽध्याये – काञ्चीक्षेत्रप्रशस्तिः कोटितीर्थ-माहात्म्यं, एकाम्रनाथपूजायाः मोक्षावधिकफलप्रदानक्षमत्वं, शाङ्करजनवैभवं, अशाङ्करजननिरययातनाऽनुभवः, शिवस्मरणस्य कृत्स्नपापौघविनाशकत्वं, अन्तकाले शिवस्मृतिपराणां, शिवनामोच्चारणोद्युक्तानां च शाङ्करत्वसिद्धिः तथा तेषां यामीययातनाराहित्यं, शिवप्रसादेन शाङ्करास्त्रपीडितानां निःसंज्ञानां त्रिषष्टिकोटि-यमदूतानां उत्थानं, ततश्च विश्वाभिधस्य राज्ञः महाभाग्यलाभनिदानकथनप्रसङ्गात् दुर्भिक्षे प्राप्ते गौतमेन महर्षिणा स्वतपःप्रभावेण सर्वेषामाहारकल्पनं, ततः कैश्चित्कुटिलाशयैः मुनिभिः स्वतपोबलेन कृत्रिम-गोकल्पनं तदनुसारं नीवारधान्यभक्षणासक्तायाः गोः तेन महर्षिणा तृणेन निवारणं, ततश्च गोः पतनेन भीतो गौतमः प्रणिधानेन "सा कुटिलाशयमुनिजन-

प्रकल्पिता कृत्रिमा गौः" इति विज्ञाय कोपाकुलस्तान् शपति। "अद्यप्रभृति भवतां शुद्धरुद्राक्षधारणे शुभपञ्चाक्षर-जपे, रुद्राध्यायजपे, शिवरात्रव्रते, सोमवारव्रते. काशी-वासे, शिवलिङ्गनिरीक्षणे, शिवतीर्थनिषेवणे, शिवतत्व-विचारे च सर्वथा श्रद्धा प्रीतिश्च मा भवतु, बहु-दुःखफलदायकोऽयं शापः भवतां सन्ततावपि भूयात्" इति शप्त्वा तस्य मुनेः स्वाश्रमगमनं, ततश्च विष्णुना "एतच्छापफलत्वेन कलियुगे, अशैवजनवृद्धिः भविष्यति, पृथिवी च नानादैवतभक्तिमज्जन-सङ्क्रान्ता भविष्यति, ब्रह्मविष्णुशिवेन्द्रादिजनन्याः कामाक्ष्याः देवोत्तमस्य शम्भोश्च पूजा अवश्यमस्माभिः कार्या यतः समस्तपातकनाशः धर्मलाभश्च भविष्यति" इति ब्रह्मणे कथनं इत्येव बहवो विषयाः वर्ण्यन्ते ॥

एकविंशेऽध्याये – अरुणाचलक्षेत्रमाहात्म्यं अरुणा-चलयात्रया महापापेभ्यो मुक्तिरवश्यं भविता, सूर्य-सङ्क्रमणे देवाः अपि अरुणाचलेशप्रदक्षिणं कुर्वन्ति इति कथनं, देवैः अरुणाचलेश्वरयात्रावसरे कस्यापि अत्युग्रदानप्रतिग्रहादिदोषदुष्टस्य द्विजस्य दर्शनं तत्कृत-पश्चात्तापविशेषः-

"संसारदुःखं बहुधा भुक्तमेव मया पुरा ।
सुखलेशोऽपि नास्त्येव संसारे दुःखसागरे ॥

स्रवन्मूत्रपुरीषाढ्ये शरीरे दुःखसाधने ।
कः प्रीतिं कुरुते मूढो मलकूप इवान्वहम् ॥

एतावत्कालपर्यन्तं भ्रमेणैव स्थितं मया ॥"

अद्य नार्मदलिङ्गस्य दर्शनादेव ममेदृशी मतिः जाता ॥ एतावता मोहाकुलेन मया नाराधितो महादेवः ॥ यद्यहं शिवमनाराध्य तनुं त्यजामि तर्हि आचन्द्रार्कं नारकी यातना भोक्तव्या भवेत्" इति, ततश्च तस्य द्विजस्य शिवसन्निधौ देहत्यागः ततश्च तस्य बलिचक्रनामकभूपतिपुत्रतया जन्म, तस्य जातिस्मरत्वं, ततश्च गौतमेन बलिचक्रकुमारस्य दर्शनं

"धन्योऽसि कृतकृत्योऽसि सफलं तव जीवितम् ।
सफलं जन्म ते बाल धन्योऽयं जनकस्तवे"ति

गौतमेन राजकुमारप्रशंसनं, ततश्च तेन मुनिना तस्मै दत्ताः सदुपदेशाः, तस्य राजकुमारस्य आकौमारात् गौतमोपदेशानुसारं नित्यं शिवपूजनं, ततश्च

प्रकल्पिता कृत्रिमा गौः" इति विज्ञाय कोपाकुलस्तान् शपति। "अद्यप्रभृति भवतां शुद्धरुद्राक्षधारणे शुभपञ्चाक्षर-जपे, रुद्राध्यायजपे, शिवरात्रव्रते, सोमवारव्रते. काशी-वासे, शिवलिङ्गनिरीक्षणे, शिवतीर्थनिषेवणे, शिवतत्व-विचारे च सर्वथा श्रद्धा प्रीतिश्च मा भवतु, बहु-दुःखफलदायकोऽयं शापः भवतां सन्ततावपि भूयात्" इति शप्त्वा तस्य मुनेः स्वाश्रमगमनं, ततश्च विष्णुना "एतच्छापफलत्वेन कलियुगे, अशैवजनवृद्धिः भविष्यति, पृथिवी च नानादैवतभक्तिमज्जन-सङ्क्रान्ता भविष्यति, ब्रह्मविष्णुशिवेन्द्रादिजनन्याः कामाक्ष्याः देवोत्तमस्य शम्भोश्च पूजा अवश्यमस्माभिः कार्या यतः समस्तपातकनाशः धर्मलाभश्च भविष्यति" इति ब्रह्मणे कथनं इत्येव बहवो विषयाः वर्ण्यन्ते ॥

एकविंशेऽध्याये – अरुणाचलक्षेत्रमाहात्म्यं अरुणा-चलयात्रया महापापेभ्यो मुक्तिरवश्यं भविता, सूर्य-सङ्क्रमणे देवाः अपि अरुणाचलेशप्रदक्षिणं कुर्वन्ति इति कथनं, देवैः अरुणाचलेश्वरयात्रावसरे कस्यापि अत्युग्रदानप्रतिग्रहादिदोषदुष्टस्य द्विजस्य दर्शनं तत्कृत-पश्चात्तापविशेषः-

"संस.रदुःखं बहुधा भुक्तमेव मया पुरा ।
सुखलेशोऽपि नास्त्येव संसारे दुःखसागरे ॥

स्रवन्मूत्रपुरीषाढ्ये शरीरे दुःखसाधने ।
कः प्रीतिं कुरुते मूढो मलकूप इवान्वहम् ॥

एतावत्कालपर्यन्तं भ्रमेणैव स्थितं मया ॥"

अद्य नार्मदलिङ्गस्य दर्शनादेव ममेदृशी मतिः जाता ॥ एतावता मोहाकुलेन मया नाराधितो महादेवः ॥ यद्यहं शिवमनाराध्य तनुं त्यजामि तर्हि आचन्द्रार्कं नारकी यातना भोक्तव्या भवेत्" इति, ततश्च तस्य द्विजस्य शिवसन्निधौ देहत्यागः ततश्च तस्य बलिचक्र-नामकभूपतिपुत्रतया जन्म, तस्य जातिस्मरत्वं, ततश्च गौतमेन बलिचक्रकुमारस्य दर्शनं

"धन्योऽसि कृतकृत्योऽसि सफलं तव जीवितम् ।
सफलं जन्म ते बाल धन्योऽयं जनकस्तवे"ति

गौतमेन राजकुमारप्रशंसनं, ततश्च तेन मुनिना तस्मै दत्ताः सदुपदेशाः, तस्य राजकुमारस्य आकौमा-रात् गौतमोपदेशानुसारं नित्यं शिवपूजनं, ततश्च

यौवने तस्य सङ्ख्यातीतकन्याभिः सह विवाहः राज्यलाभः ततश्च गणनातिगसुपुत्रलाभः इत्येवमन्ये च शैवधर्मविशेषाश्च वर्ण्यन्ते ॥

द्वाविंशेऽध्याये – पुर्वाध्यायानुसारितया बलिचक्रपुत्रगौतमवार्तालापप्रसङ्गात् विष्णुब्रह्मणोः स्वस्वश्रेष्ठत्वकथनं, ततश्च मूर्तिधरवेदपुरुषैः ऋग्वेदादिभिः विस्तरेण शिवस्यैव सर्वदेवोत्तमतया प्रशंसनं तदा मुनिजनमध्ये

"यन्मायया मोहितोऽयं विष्णुर्ब्रह्माप्ययं द्विजाः ।
तमेव देवदेवेशं भजध्वं वृषभध्वजम्"

इति प्रवृत्तां अशरीरिणीं वाचमाकर्ण्य महर्षीणां प्रमोदः, ततश्च तद्वाचं आङ्गीकृत्य विष्णुना मुनिजनमध्यें-

"शिव एव महादेवो देवदेवोत्तमः प्रभुः"

इति शिवस्य सर्वाधिकत्वकथनं, ततश्च वार्तालापप्रसङ्गात् राज्ञा -

"साङ्गे य(क)स्मिन् व्रते चीर्णे सर्वान् कामानवाप्नुयात्"

इति पृष्टो गौतमः

"उमामहेश्वरं नाम किञ्चिदस्ति व्रतोत्तमम्"

इति वदन् उमामहेश्वरव्रतमधिकृत्य पूजाविधिं च अधिकृत्य विस्तरेण कथयति । ततश्च व्रतमिदं केन चीर्णं (अनुष्ठितं) इति राज्ञा पृष्टः गौतमः विष्णुना[1] दुर्वाससः शापान्मुक्तिमिच्छता व्रतमेतदनुष्ठितमिति कथयति इति सविस्तरं वर्ण्यते ।

त्रयोविंशेऽध्याये – वृद्धाचलक्षेत्रमाहात्म्यं, तत्र कश्यप-कण्वादिमुनीनां तीर्थाटनप्रसङ्गात् आगमनं, तत्रैव अगस्त्यागमनं, तस्य वृद्धाचलेशपूजनं, तदा गौतमेन कृता वेदान्तप्रतिपादितार्थगर्भिता शिवस्तुतिः, ततश्च

1. श्रीनगरे श्रीमहात्रिपुरसुन्दरीं दृष्ट्वा निवृत्तेन दुर्वाससा स्वर्लोके इन्द्रं ऐरावतारूढं दृष्ट्वा तस्मै देवीप्रसादरूपमाला प्रदत्ता । इन्द्रः अश्रद्धया मालां गृहीत्वा गजमस्तके निक्षिपति, ऐरावतश्च तामादाय भूमौ उत्सारयति । तद् दृष्ट्वा प्रकुपितः दुर्वासाः मत्तस्त्वं निःश्रीको भवेति इन्द्रं प्रशपति इति ललितोपाख्यान-वर्णितवृत्तान्तः शिवपरत्वेव परिणत. अत्र वर्ण्यत इति भाति ।

गौतमदिदृक्षया तत्रत्यजनसमागमनं विष्णोरागमनं च तदा कश्यपकण्वादिमुनिभिः

"भो महर्षे सर्वे माहेश्वरीमायामोहिता भवन्ति ।

"शिवमाया मोहितानां सर्वदा पापकर्मणि ।
चित्त प्रवर्तते तेन दुःखमप्यनुभूयते ।।

तन्निवारणाय किं कर्तव्यम्"

पृष्टः गौतमः त्रिपुण्ड्रधारण, रुद्राक्षधारण, श्रीरुद्रपञ्चाक्षर-शिवपूजनादिषु त्यक्तेषु सर्वेऽपि तन्मायामोहिता एव भवन्ति । तेषां शैवधर्मानुष्ठानमेव तन्मायासन्तरणोपायः

∴"न रुद्रादपरो देवः भवभीमभयापहः" इति, ततश्च "शिवाष्टोत्तरशतनामकीर्तनं, किंच ब्रह्महत्यादिमहापापाचारपरस्यापि प्राणप्रयाणसमये शिवशिवेत्युच्चारणमात्रेण मुक्तिः लभ्यते इति, ततश्च शैवशब्दार्थनिर्वचनं, शैवजनाराधनस्य महाफलप्रदत्वं, वृद्धाचलेशाराधनफलत्वेन सर्वेषां कश्यपकण्वादीनां काशीक्षेत्रवासः प्राप्तः इति च वर्ण्यते ।।

चतुर्विंशेऽध्याये – चिदम्बरक्षेत्रमाहात्म्यं, "शिवतीर्थाटनं कर्तुं प्रीतिर्जाता ममाधुना" इति विष्णुं प्रति लक्ष्मीकृताऽभ्यर्थना - तुष्टस्य विष्णोः लक्ष्म्या सह चिदम्बरगमनं - शिवतीर्थे लक्ष्म्या सह विष्णुकृतं स्नानं, किञ्च भस्मत्रिपुण्ड्ररुद्राक्षादिधारणपूर्वकं तत्कृतं शिवपूजनं, ततः तत्रत्यशैवान् वीक्ष्य सः "शिवतत्वं वदन्त्विति प्रार्थनां कृत्वा स्वयमेव शिवतत्वं निर्वक्तुं प्रक्रमते -

"अनन्तवाजपेयादियागानां यत्फलं द्विजाः ।
ततोऽनन्तगुणं पुण्यं शिवपूजाविधेः फलम् ॥"

इत्यादिकमुक्त्वा कस्यचिद्विप्रस्य चरित्रं तत्र प्रमाणीकुरुते । ततश्च सरहस्यशैवाचारशिवधर्मप्रकाशनं, तत्प्रसङ्गेन मेरुशिखरे दृष्टस्य वेदपुरुषस्य वार्ता,

"यो वेदादौ स्वरः प्रोक्तो
वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य
यः परः स महेश्वरः ॥

इत्येवंरूपेण शिवपारम्यं शैवधर्माणां श्रद्धय अनुष्ठेयत्वं, ततश्च दुन्दुभिघोषपुरःसरं अभ्रसदसि चित्सभायां शिवकृतं सर्वदेवतसाक्षात्कृतं परमाद्भुतं ताण्डवं च वर्ण्यंते ।

पञ्चविंशेऽध्याये – पूर्वाध्यायानुगततया विष्णुब्रह्मादिविरचितश्रीमूलस्थाननाथपूजनावसाने हेमसभामध्ये सर्वशाङ्करवर्गप्रार्थनया विष्णुकृतश्रीमहादेवपूजनफलवर्णनं तत्प्रसङ्गात् बिल्वपत्रसङ्ग्रहतत्परस्य शिवपूजानिष्ठस्य द्विजस्य वृत्तान्तः तस्यान्तकाले तस्मै महेश्वरस्य स्वदिव्यस्वरूपदर्शनं, तत्र शिवस्वरूपवर्णनं, तस्मै वरदानं, ततश्च शिवपूजार्थकभस्मसङ्ग्रहपरस्य द्विजस्य परमाश्चर्यंकरवृत्तान्तवर्णनं तत्प्राणत्यागसमये शिवाविर्भावः,

न याचे न याचे महादेव शम्भो
वरानन्यदेवान् अहं भक्तबन्धो ।
परन्त्वेकरूपां मदन्यैरलभ्यां
भवद्भक्तिमेकां परामीश याचे ॥

इत्येवंरूपाः द्वाविंशतिश्लोकात्मकाः द्विजस्य प्रार्थनाःतत्प्रसङ्गात् संसारतरणोपायतया अगस्त्योपदिष्टाः धर्मविशेषाः,

तद्वर्णनप्रसङ्गात् अहङ्कारवशङ्गतस्य इन्द्रस्य अहेतुकं मानसं दुःखं अथ च बृहस्पतिना सह ब्रह्माणं द्रष्टुं सत्यलोकगमनं तत्प्रसङ्गात् पञ्चाक्षरमन्त्रस्य सर्वाघौघविनाशकत्वं ततश्च स्त्रीपुरुषकर्तृकशिवपूजायां भेदः ततश्च वैदर्भीवृत्तान्तः अन्ते च अभ्रसदसि चित्सभेश्वर नृत्तदर्शनजपुण्यबलात् विष्णोः काशीनगरीप्राप्तिः, अथ च

"पद्मकोशप्रतीकाशं हृत्पं चाप्यधोमुखम् ।
अधो निष्ठ्याविततस्त्यान्ते नाभ्यामुपरि तिष्ठति ॥"

इत्येवंरीत्या काशीक्षेत्रजिगमिषुभिः स्वस्वहृदयाकाशविलसत्परमात्मा द्रष्टव्यः ध्येयश्चेति वर्ण्यते ॥

॥ इति शम् ॥

வேண்டுகோள்

¤

கருணையுள்ளங் கொண்ட நம் முன்னோர்கள், அரிய பெரிய இலக்கியங்களையும், பிறவற்றையும், பனையோலைகளில் எழுதிச் சுவடிகளாக நமக்குத் தந்தனர். அவை, பல்வேறு இடங்களில் முடங்கி உள்ளன. சுவடிகள் பழுதடைவதற்குமுன் சரசுவதி மகாலுக்கு அன்பளிப்பாகக் கொடுத்துதவினால், அவை மக்களுக்குப் பயன்படும்.

மகாலுக்குக் கொடுப்பதன் மூலம், சுவடி தந்தவர்களும், சுவடி எழுதியோரும் அழியாப் புகழைப் பெருமைசால் சரசுவதி மகால் உள்ளளவும் பெறுவர். அவை பதிப்பாகி வருமாயின் சுவடி தந்தார் பெயர் இடம் பெறுவதோடு, அப்பதிப்பில் ஐந்து பிரதிகளும் பெறுவர்.

எனவே "நாம் பெற்ற பேறு பெறுக இவ்வையகம்" என்ற எண்ணமுடைய நற்பண்பாளர்கள் தம்மிடமுள்ள சுவடிகளைச் சரசுவதி மகாலுக்குத் தந்துதவ வேண்டுகிறேன்.

தஞ்சாவூர்
10-10-98

மாவட்ட ஆட்சியர் மற்றும் இயக்குநர்,
சரசுவதி மகால் நூலகம்.

॥ अध्यायानुक्रमणिका ॥

❀❀❀

क्र. सं.			पृष्ठम्
१.	विंशेऽध्याये	–	1 — 37
२.	एकविंशेऽध्याये	–	38 — 78
३.	द्वाविंशेऽध्याये	–	78 — 121
४.	त्रयोविंशेऽध्याये	–	122 — 202
५.	चतुर्विंशेऽध्याये	–	202 — 259
६.	पञ्चविंशेऽध्याये	–	260 — 328

OUR NEW SANSKRIT PUBLICATIONS

			Rs.
1	Bharatarnavam	....	100-00
2	Gita Govindam	....	25-00
3	Brahadeeswara Mahatmyam	....	43-00
4	Kantimati Parinayam	....	36-00
5	Mantra Sastra Sangraha	....	45-00
6	Prapancha Sara Sara Sangıaha		
		Part I	125-00
		Part II	100-00
7	Maruti Vijaya Champu	....	30-00
8	Prayoga Ratnamala	....	55-00
9	Paramahamsa Charya	....	60-00
10	Rajamriganka (Ayurvedic Text)	....	45-00
11	Risya Sringa Samhita - Part I		100-00
12	,, - Part II		140-00
13	Sarabharaja Vilasam	....	15-00
14	Uddharakosam	....	23-00
15	Yaska's Niruktam - Part I	....	85-00
16	,, - Part II	...	100-00

।। श्रीमहागणपतये नमः ।।

।। श्रीसाम्बशिवाय नमः ।।

।। श्रीगुरुभ्यो नमः ।।

।। श्रीशिवरहस्यम् ।।

।। उग्राख्ये सप्तमांशे ।।

(पूर्वभागः)

(Vol. III)

।। विंशोऽध्यायः ।।

श्रीशिव उवाच -

देवि काञ्चीपुरी काचिद्यत्र वेगवती नदी ।
तत्र वासमपेक्षन्ते नित्यं ब्रह्मादयः सुराः ।। 1

एकाम्रेशा(एकाम्बरा)भिधं लिङ्गं तत्रास्त्येकं मदात्मकम् ।
तद्दर्शनेन पापानि विनश्यन्ति क्षणादिव ।। 2

कोटितीर्थाभिधं तीर्थं तत्रास्त्येकमघापहम् ।
तत्रैव मज्जनादेव ब्रह्महत्या विमुच्यते ।। 3

तत्र श्राद्धं विधानेन कर्तव्यं पितृमुक्तये ।
तर्पणीयाश्च पितरः कोटितीर्थोदकैः शुभैः ।। 4

कोटितीर्थे नरः स्नात्वा सम्पूज्यैकाम्बरेश्वरम् ।
मुच्यते सर्वथा देवि ब्रह्महत्याऽयुतैरपि ।। 5

तत्रैव मामुपाश्रित्य ऋषयो ब्रह्मवादिनः ।
वसन्ति बहवस्तेषां सङ्ख्या कर्तुं न शक्यते ।। 6

तत्र मां प्रत्यहं विष्णुर्ब्रह्माद्याः सुरसत्तमाः ।
कुर्वन्ति पूजनं भक्त्या त्रिकालं सर्वसाधनैः ।। 7

प्रदोषसमये विष्णुर्मामभ्यर्च्य विधानतः ।
सेवां करोति सानन्दं मृदङ्गमभिवादयन् ।। 8

विविधैः कुसुमैर्नूत्नैर्बिल्वपत्रैश्चतुर्मुखः ।
मामभ्यर्च्य ततः सायं तालान्वादयते मुदा ।। 9

वाग्देवी वल्लकीं धृत्वा सायमभ्यर्च्य मां शिवम् ।
करोति गानममलं गीतशास्त्रविशारदा ।। 10

इन्द्रः सम्पूज्य मां सायं बिल्वपत्रादिभिर्मुदा ।
करोति वैणवं वाद्यं तत्तद्रन्ध्रनिषेवणात् ।। 11

शची नृत्यं करोत्यग्रे सायमन्वहमादरात् ।
रम्भाद्यैरप्सरोभिश्च सहिता मम तुष्टये ।। 12

लक्ष्मीः सायं समभ्यर्च्य स्वर्णवच्चामरद्वयम् ।
गृहीत्वा तव पार्श्वस्था भवतीमुपसेवते ।। 13

देवपत्न्यस्तथाऽन्याश्च सायं सम्पूज्य मां शिवम् ।
विष्णुब्रह्मादिदेवानां पत्न्यो यास्तास्तु शैलजे ।। 14

तव दास्यस्तनस्तास्ते सेवां कुर्वन्ति सादरम् ।
कामाक्षीरूपमासाद्य त्वया तत्र मनोरमे ।। 15

स्थीयते सततं त्वं तु देवदेवाङ्गनार्चिता ।
कुबेरेण पुरा तत्र रत्नस्तम्भविराजितम् ।। 16

शिवस्थानं कृतं रम्यं रत्नगोपुरराजितम् ।
पञ्चक्रोशमितं चक्रे (यत्र) हेमप्राकारमुत्तमम् ।। 17

चक्रे प्राकारशृङ्गाणि श्रेष्ठरत्नमयानि सः ।
स्थीयते तत्र सततं मया रत्नशिवालये ।। 18

तच्छिवालयरत्नानां प्रभया व्याप्तता (व्यलसन्) दिशः ।
पुरा कदाचिद्धिमवानुपबर्हणमुत्तमम् ।। 19

तुभ्यं कर्तुमना आसीन्महदैश्वर्यगर्वितः ।
ऐश्वर्यं तु मया दत्तं पुराऽस्मै प्राणवल्लभे ।। 20

तदविज्ञाय रत्नानि तुभ्यं दातुमना अभूत् ।
कोटिभाराणि रत्नानां गृहीत्वा स ततः परम् ।। 21

समागत्य पुरीं काञ्चीं दूरादेव ददर्श सः ।
हेमप्राकारसंयुक्तां रत्नगोपुररञ्जिताम् ।। 22

दृष्ट्वा काञ्चीपुरीं रम्यां विस्मयं समुपागमत् ।
समासाद्य ततः काञ्चीं स्नात्वा तीर्थेषु सादरम् ॥ 23

रत्नैरभ्यर्चयामास हिमवान्प्रीतिपूर्वकम् ।
पुरात्र तपसि व्यग्रं जितसर्वेन्द्रियं हरिम् ॥ 24

चतुर्मुखः समभ्यर्च्य पप्रच्छेदं कृताञ्जलिः ।

ब्रह्मोवाच -

विष्णो सम्पूज्यते को वा नित्यं किं ध्यायते मुदा ॥ 25

चिरादत्रैव सततं स्थीयते भवता कुतः ।

विष्णुरुवाच -

अत्र काञ्च्यां महादेवः कामाक्षीवल्लभः प्रभुः ॥ 26

लीलां करोति सततं पूजितः सकलैः सुरैः ।
उमासहायः सर्वेशो महादेवो जगत्प्रभुः ॥ 27

पूज्यते ध्यायते नित्यं प्रणवेन महेश्वरः ।
सर्वेश्वः शङ्करः साम्बः पूजनीयोऽतिभक्तितः ॥ 28

अथो मयापि सततं पूज्यते पार्वतीपतिः ।
देवतासार्वभौमोऽयं सर्वदेवशिखामणिः ॥ 29

सर्ववेदान्तवेद्योऽयं शङ्करश्चन्द्रशेखरः ।
शिवः शिवार्थिभिर्नित्यं पूजनीयः प्रयत्नतः ॥ 30

अतः शिवार्थिना नित्यं मया सम्पूज्यते शिवः ।
सुराणां मानुषाणां च साम्बः संसारमोचकः ॥ 31

विधिवत्पूजितो देवः कुरुते भवमोचनम् ।
यावत्पुष्टिर्बलं हृष्टिर्यावदायुरनामयम् ॥ 32

तावद्यत्नेन सम्पूज्यो नित्यं देवः सदाशिवः ।
तस्य हस्तद्वयं धन्यं येन साम्बः सदाशिवः ॥ 33

पूज्यते सावधानेन स्तूयते मधुरोक्तिभिः ।
तस्यैव हि मनो धन्यं येन निध्यायते शिवः ॥ 34

उद्धूलिताङ्गो यो नित्यं महेशं पूजयेन्मुदा ।
तस्य मृत्युभयं नास्ति भाग्यस्याप्यन्तमेव च ॥ 35

गर्भवासभयं यस्य भविष्यति चतुर्मुख ।
तस्य तद्भयनाशस्तु न विना शम्भुपूजया ॥ 36

शम्भो शम्भो महेशेति ये वदन्त्यनिशं मुदा ।
न तेषां गर्भवासोत्थं भयं सञ्जायते नृणाम् ॥ 37

महादेव महेशेति ये वदन्त्यनिशं मुदा ।
न तेषां गर्भवासोत्थं .... ॥ 38

कालाग्निरुद्र वीरेति ये वदन्त्यनिशं मुदा ।
न तेषां गर्भवासोत्थं .... ॥ 39

शङ्करोमासहायेति ये वदन्त्यनिशं मुदा ।
न तेषां गर्भवासोत्थं .... ॥ 40

त्रिपुरारे मखघ्नेति ये वदन्त्यनिशं मुदा ।
न तेषां गर्भवासोत्थं .... ॥ 41

त्रिलोचनेति भर्गेति ये वदन्त्यनिशं मुदा ।
न तेषां गर्भवासोत्थं .... ॥ 42

पिनाकपाणे सोमेति ये वदन्त्यनिशं मुदा ।
न तेषां .... ॥ 43

चन्द्रचूडेति भीमेति ये वदन्त्यनिशं मुदा ।
न तेषां गर्भवासोत्थं भयं सञ्जायते नृणाम् ॥ 44

यस्य स्मरणमात्रेण सद्यः संसारनाशनम् ।
तस्य देवाधिदेवस्य शिवस्यैवार्चनं परम् ॥ 45

न यन्नामसमं नाम श्रुतौ श्रुत्यन्त एव वा ।
तस्य देवाधिदेवस्य नाम स्मर्तव्यमैश्वरम् ॥ 46

शिवपूजां विना नान्यद्विहितं मोक्षकारणम् ।
धर्मार्थकाममोक्षाणां साधनं शिवपूजनम् ॥ 47

यः शं करोति सर्वेषां स्मृतः संपूजितः प्रभुः ।
स शङ्करः पूजनीयो नियमेनान्वहं मुदा ॥ 48

यः शिवो मङ्गलाजानिः विधत्ते मङ्गलं नृणाम् ।
स एव शङ्करस्तस्मात्तस्यैवाभ्यर्चनं वरम् ॥ 49

शङ्करं योऽर्चयेन्नित्यं त्रिकालं सर्वसाधनैः ।
शङ्करः शं करोत्येव प्रीतस्तन्नियमात्प्रभुः ॥ 50

संसारसागरं तर्तुं तरिर्नामैव शाङ्करम् ।
नान्यनाम तथाऽसारघोरसंसारतारकम् ॥ 51

शाङ्करं नाम विमलमिष्टार्थफलदं विधे ।
तन्नाम मुक्तिदं भव्यं संसारभयनाशकम् ॥ 52

शङ्करस्मरणं नित्यं तथा शङ्करपूजनम् ।
इहामुत्रार्थलाभाय कर्तव्यं नित्यकर्मवत् ॥ 53

तत्त्यागे तु भवत्येव प्रवेशो निरये नृणाम् ।
कृताद्येषु च सर्वेषु युगेषु भवमुक्तये ॥ 54

पूजनीयो महादेवो ब्राह्मणैश्च सुरासुरैः ।
हरः स्मरहरो ब्रह्मन्घोरसंसारतारकः ॥ 55

हृतः स्मरो महेशेन स संसारप्रवर्तकः ।
परं त्वव्यभिचारेण भक्तिः कार्या महेश्वरे ॥ 56

सा नाशयति संसारं भक्तिरव्यभिचारिणी ।
यथा पतिव्रता शुद्धा नान्यं कामयते तथा ।। 57

शाङ्करः शङ्करादन्यं नार्चयत्येव सर्वथा ।
यमेन तु कृतः पूर्वं शपथः क्रूरचक्षुषा ।। 58

मत्सन्निधौ वदाम्यद्य शृणु तं शपथं वरम् ।। 59

यमः उवाच -

अशाङ्करानयःपिण्डैः सन्तप्तैस्ताडयाम्यहम् ।
अत्र साक्षी महादेवः सर्वद्रष्टा जगत्प्रभुः ।। 60

अशैवांस्तप्तशूलाग्रैरुग्रैस्सन्ताडयाम्यहम् ।
अत्र साक्षी महादेवः .... ।। 61

अशैवान्वालुकायन्त्रे सन्तप्ते भर्जयाम्यहम् ।
अत्र साक्षी .... ।। 62

अशैवानायसस्तम्भे बध्वा सन्ताडयाम्यहम् ।
अत्र साक्षी .... ।। 63

अशैवानग्निकुण्डेषु सर्वदा पातयाम्यहम् ।
अत्र साक्षी .... ।। 64

अशैवान्नैव सन्त्यक्ष्ये तथा ब्रह्मघ्नमप्यहम् ।
अत्र साक्षी .... ।। 65

अशाङ्करं न सन्त्यक्ष्ये तथा मित्रघ्नमन्वहम् ।
अत्र साक्षी .... ॥ 66

अशाङ्करं न सन्त्यक्ष्ये तथा भ्रूणघ्नमप्यहम् ।
अत्र साक्षी .... ॥ 67

अशाङ्करं न सन्त्यक्ष्ये न त्यक्ष्ये मद्यपायिनम् ।
अत्र साक्षी .... ॥ 68

अशैवान्दलयाम्येव तप्तघोरघरट्टकैः ।
अशैवांस्तप्तमुसलैः खण्डयामि पुनः पुनः ॥ 69

उलूखलेषु तप्तेषु पातयित्वाऽतिदुर्भगान् ।
इति पूर्वं यमेनोक्तं शपथश्च कृतस्तथा ॥ 70

तत्कृतः शपथोमिथ्या कदापि न भविष्यति ।
मम पूज्यतमः शम्भुः योऽयं देवोत्तमः प्रभुः ॥ 71

यस्यास्ति शङ्करेभक्तिरविच्छिन्ना जगत्प्रभौ ।
तस्य मोक्षाङ्गनापाङ्गभृङ्गसङ्गः सदा भवेत् ॥ 72

स एव मुक्तिकान्तायाः कान्त इत्युच्यते बुधैः ।
महादेवसमोदेवो न भूतो न भविष्यति ॥ 73

मनुष्येषु यथाश्रेष्ठो ब्राह्मणो वेदवित्तमः ।
तथैव श्रीमहादेवो देवेषु श्रेष्ठ उच्यते ॥ 74

चतुष्पदेषु गौः श्रेष्ठा यथा स्पृष्टाघनाशिनी ।
तथैव श्रीमहादेवो .... ॥ 75

सागरेषु यथा श्रेष्ठः क्षीराब्धिरिति विश्रुतः ।
तथैव श्रीमहादेवो .... ॥ 76

मुक्तिक्षेत्रेषु सर्वेषु काशी श्रेष्ठा यथा श्रुता ।
तथैव श्रीमहादेवो .... ॥ 77

यथाचलेषु सर्वेषु कैलासः श्रेष्ठ उच्यते ।
तथैव श्रीमहादेवो .... ॥ 78

शम्भुरेव कृपाम्भोधिराराध्यं दैवतं मम ।
एतादृशं महद्भाग्यं मम भूरितपः फलम् ॥ 79

शाम्भवा एव सुभगाः सुभगाशम्भुभावना ।
यया भावनया साक्षान्मोक्षलक्ष्मीरवाप्यते ॥ 80

अनन्यशरणा नित्यं येऽर्च्चयन्ति महेश्वरम् ।
तैरेव सर्वसौख्यानि प्राप्तव्यानि न संशयः ॥ 81

उद्धूल्य भस्मनाङ्गानि सर्वदा विधिपूर्वकम् ।
यः शिवाराधनं कुर्या स धन्य इति गीयते ॥ 82

यस्तु नित्यं प्रयत्नेन शिवस्मरणमादरात् ।
करोति भूतिपूताङ्गः स धन्य इति गीयते ॥ 83

पुराकश्चन विप्रोऽभूद्धिमवत्पार्श्वसंश्रयः ।
ददर्श शाङ्करं विप्रं शिवपूजा परायणम् ॥ 84

तं दृष्ट्वा दूरतः स्थित्वा प्रणम्य स पुनः पुनः ।
कृताञ्जलिपुटो भूत्वा पप्रच्छैवं द्विजोत्तमम् ॥ 85

विप्र उवाच -

शाङ्करोत्तम विप्रेन्द्र तवैतद्दर्शनादहम् ।
कृतकृत्यस्तु जातोऽस्मि पुलकाङ्कितविग्रहः ॥ 86

मया कृतानि पापानि बहूनि विविधानि च ।
तत्पापनाशकं पुण्यकर्मस्याद्यदि तद्वद ॥ 87

ब्रह्महत्यादिपापानि कृतान्येव घृणांविना ।
किं तन्निवर्तकं कर्म श्रौतं वा स्मार्तमेव वा ॥ 88

तानि पापानि विप्रेन्द्र ज्ञानपूर्वं कृतानि हि ।
अज्ञानान्नकृतान्येव तानि शृणु द्विजोत्तम ॥ 89

ममाति सुन्दरी माता युवती शयनेस्थिता ।
बलाद्भुक्ता मया पूर्वमसकृद्भूरिकामतः ॥ 90

मत्पुत्री च मया भुक्ता यदा स प्राप्तयौवना ।
हन्तबह्वयोऽन्यपत्न्योऽपि भुक्ता एव मयाऽसकृत् ॥ 91

मृत्युकालोऽपि सम्प्राप्तो दुःसहो दुःखदायकः ।
पश्चात्तापोऽतिमात्रं मां बाधते द्विजपुङ्गव ।। 92

किं कर्तव्यं मया विप्र प्रायश्चित्तं वदप्रभो ।
किं वेदृशानां पापानां प्रायश्चित्तं न विद्यते ।। 93

अद्ये निरयभीतिर्मां बाधतेऽत्यन्तमन्वहम् ।। 94

शाङ्कर उवाच -

कृतस्याखिलपापस्य प्रायश्चित्तं शिवस्मृतिः ।
तथा शिवार्चनं बिल्वैः शिवनामानुकीर्तनम् ।। 95

कुरुदेवाधिदेवस्य महादेवस्य पूजनम् ।
तत्पूजयैव पापानि विनश्यन्ति न संशयः ।। 96

कुरु श्रौतं प्रयत्नेन केवलं भस्मधारणम् ।
विना तेन द्विजानां तु नाधिकारः शिवार्चने ।। 97

यमशङ्करसंवादः श्रुतपूर्वोऽस्ति कश्चन ।
तमेव वक्ष्ये यत्नेनश्रुणु पापभयापहम् ।। 98

पुरा कश्चिद् द्विजः पापी कीकटे कुष्ठदूषितः ।
उवास ब्रह्महत्यादि महापापरतः सदा ।। 99

तादृशस्याभवत्पुत्रोवार्धके सोमवासरे ।
श्रुत्वा स पुत्रमुत्पन्नमानन्दं परमं ययौ ।। 100

सोमवासरसम्भूतं स पुत्रं वीक्ष्य सादरम् ।
सोमवासर इत्येव नाम तस्य चकार सः ॥ 101

तदाप्रभृति विप्रोऽसौ प्रत्यहं सोमवासरम् ।
सोमवासर इत्याख्यां गृहीत्वा तनयस्य सः ॥ 102

सोमवासर भुङ्क्ष्वेति पिब याहीतिवान्वहम् ।
सोमवासर तिष्ठेति वदन्लालयतिस्म सः ॥ 103

एवमेव पिता नित्यं व्यवहारेषु सर्वदा ।
तमाकारयति प्रीत्या तत्पिता पुत्रवत्सलः ॥ 104

एकदा दैवयोगेन स विप्रो सर्पदंशितः ।
बभूव मूर्च्छितः सद्यः वृद्धः कुष्ठप्रदूषितः ॥ 105

अथासौ सोमवारेति सोमवारेति तं सुतम् ।
वदन्नेवमृतः कुष्ठी विषसङ्ग्रस्तविग्रहः ॥ 106

ततः समाययुर्दूता यमस्यातिविभीषणाः ।
आगत्य नेतु मुद्युक्ता नानाशस्त्रास्त्रपाणयः ॥ 107

तदानीमागतः कश्चिच्छिवभक्तः शिवार्चकः ।
यमदूतानुदीक्ष्यायं जगाद वचनं रुषा ॥ 108

रे रे यमभयः क्रूरा भवन्तो यान्तुदूरतः ।
न नेयोऽयं भवद्भिस्तु यत्नोऽत्त भवतां वृथा ॥ 109

एतस्य तु सुतो योऽस्ति तस्याख्या सोमवासरः ।
नाम्नोऽस्य चरमं भागं हित्वा सोमेति केवलम् ॥ 110

प्राणान्तसमये विप्रो ह्याह्वयत्तनयं यतः ।
अतोऽस्यवासः कैलासे नैव वैवस्वतालये ॥ 111

सोम इत्यमलं नाम सर्वपापविनाशकम् ।
यन्नामस्मरणादेव मोक्षलक्ष्मीरवाप्यते ॥ 112

उमया सहितः सोमः शिव एव हि नापरः ।
तन्नाम यत्सुतस्यास्ति न तस्य यमयाजना ॥ 113

तस्य पापानि नश्यन्ति ज्ञानाज्ञान कृतान्यपि ।
गृह्णात्ययं तु तन्नाम पुत्रबुध्यापि यत्नतः ॥ 114

तथापि तस्य पापानि विनष्टान्येव सर्वथा ।
येन केनापि रूपेण नाम ग्राह्यं तु शाङ्करम् ॥ 115

यः शिष्टो नष्टचर्यो वा स मुक्तो भवति ध्रुवम् ।
सोमेति तारकं नाम प्राणनिर्गमनक्षणे ॥ 116

अनेनोक्तमतः सत्यं मुक्तोऽयं भवति ध्रुवम् ।
न स्प्रष्टव्यो भवद्भिस्तु कृतपापोऽप्ययं द्विजः ॥ 117

प्रयान्तु सत्वरं दूताः प्राणेच्छा यदि जायते ।
एतस्मिन्नन्तरे कश्चिच्छाङ्करः शाङ्करेरितः ॥ 118

रम्यंविमानमादाय सत्वरं समुपस्थितः ।
तदानीं तं विलोक्यापि शाङ्करं यमकिङ्कराः ॥ 119

मृतं बध्वा समानेतुमुद्यमं चक्रुरुद्धताः ।
दृष्ट्वा तद्बन्धनोद्युक्तान्स तु शङ्करकिङ्करः ॥ 120

सम्मोहनास्त्रयोगेन मोहयामास तान्भटान् ।
ततो विमाने रत्नाढ्ये तं प्रवेश्य स शाङ्करः ॥ 121

ययौ कैलासनिलयं सर्वदेवाभि वन्दितम् ।
तदानीं त विलोक्यैव विमानस्थं द्विजं यमः ॥ 122

सम्मोहितान्भटान्दृष्टवा ययौ शङ्कर सन्निधिम् ।
दण्डमुद्रां निधायाग्रे विनायावनतो यमः ॥ 123

कृताञ्जलिपुटस्तस्थौ महादेवस्य शूलिनः ।
ततो यमं समुद्वीक्ष्य सर्वदेव शिखामणिः ॥ 124

उवाच वचनं साम्बः शिक्षयन्न्यायमादरात् ।

शिव उवाच -

अनेन तु कृतान्येव पापानि विविधानि च ॥ 125

तथाप्ययं तु निष्पापो मन्नामस्मरणादिह ।
सोमवासरसम्भूतः पुत्रोऽस्या भूद्विचक्षणः ॥ 126

सोमवासर इत्येव नाम तस्य चकार हि ।
व्यवहारेषु सर्वेषु तन्नाम्ना पुत्रमन्वहम् ।। 127

आकारयत्ययं यत्ना सुतवात्सल्यतोऽन्तक ।
सोमवासर इत्यत्र सोम इत्यक्षरद्वयम् ।। 128

एतत्कृतानि पापानि नाशयामास मूलतः ।
प्रसङ्गेनापि मन्नाम यो गृह्णाति यदृच्छया ।। 129

स पापमात्ररहितो भविष्यति न संशयः ।
पुरा परार्धपर्यन्तमपि पापानि रोमशः ।। 130

कृत्वाऽन्तकाले मन्नाम स्मृत्वा मद्रूपतां गतः ।
यथाकालानलज्वालासन्दुग्धाः गिरिकोटयः ।। 131

तथा मन्नामसन्दग्धा महापातकराशयः ।
चण्डालमपि मन्नामस्मरणासक्तचेतसम् ।। 132

संसारसागराद्घोरात्तारयामि न संशयः ।
अन्तकाले स्मृतं येन मन्नामाघौघनाशकम् ।। 133

तेनतीर्णस्तूर्णमेव घोरसंसार सागरः ।
तावदेव हि पापानि वसन्ति पुरुषे यम ।। 134

स्मृतं न यावन्मन्नाम महापातकनाशकम् ।
सोम इत्यत्रसोवर्णोच्चारणाद्यान्त्यघाद्रयः ।। 135

स वर्णोच्चारणे भूयस्तत्प्रवेशः कथं भवेत् ।
अयं स्मृत्वा रामं नाम महापातकनाशकम् ॥ 136

ततस्तनुं जहौ तस्मादयं मुक्तो न संशयः ।
हितमन्यद्वदिष्यामि वैवस्वत तवादरात् ॥ 137

शाङ्करानन्वहं भक्त्या पूजय त्वमतन्द्रितः ॥ 138

ये चन्द्रशेखर महेश कृपानिधान
श्रीविश्वनाथ करुणाकर शङ्करेति ।
नित्यं वदन्ति नियमात्सितभस्मफाला-
स्ते शाङ्करास्तव यमान्वहमर्चनीयाः ॥ 139

ये भीम भर्ग भगवन् भवभव्यरूप
फालेक्षण प्रमथकोटिनिषेवितेति ।
नित्यं वदन्ति .... ॥ 140

ये विश्ववन्द्य विबुधोत्तम विश्वबन्धो
कालानलाभ नरसिंहनिपातनेति ।
नित्यं वदन्ति .... ॥ 141

ये कालकाल पुरसूदन पुण्यमूर्ते
विश्वम्भराखिलगुरो शिव शङ्करेति ।
नित्यं वदन्ति .... ॥ 142

ये दीनवत्सल परात्पर देवदेव

देवोत्तमोत्तम सदाशिव सर्वगेति ।

नित्यं वदन्ति .... ॥ 143

ये सर्वरक्षणविधानविनाशहेतो

गौरीमनोरमण सर्वसुराधिपेति ।

नित्यं वदन्ति .... ॥ 144

ये नित्य निष्कल निरञ्जन भासमान

मायाद्यतीत निगमान्तविभूषणेति ।

नित्यं वदन्ति .... ॥ 145

ये नीललोहित निरीश्वर निष्प्रपञ्च

पञ्चाननाव्यय निरञ्जन निर्गुणेति ।

नित्यं वदन्ति .... ॥ 146

ये विष्णुमुख्यसुरवर्गनिसर्गसेव्य

स्वर्गापवर्गफलवर्गविधायकेति ।

नित्यं वदन्ति .... ॥ 147

ये सोम मङ्गलनिधानविधानहेतो

कारुण्यसागर शरण्य गणेश्वरेति ।

नित्यं वदन्ति .... ॥ 148

यदेतदुक्तमधुना धर्मराज तवादरात् ।
तदन्वहं स्मर प्रीत्या सावधानेन चेतसा ॥ 149

मृत्यो प्रियतराः सर्वे शाङ्कराः सर्वदा मम ।
अतस्ते सर्वदा पूज्या माननीयाश्च सादरम् ॥ 150

इत्युक्तं तद्वचः श्रुत्वा प्रणम्य त्रिपुरान्तकम् ।
कृताञ्जलिपुटो भूत्वा वभाषे वचनं यमः ॥ 151

यम उवाच -

महादेव दयासिन्धो त्वदाज्ञा शिरसा धृता ।
सर्वदेवोत्तम श्रीमञ्छासितोऽस्मि सुरोत्तम ॥ 152

त्रिषष्टिकोटिदूता मे शाङ्करास्त्रविमोहिताः ।
पतिताः सन्ति निःसंज्ञा मृतदेहा इवाधुना ॥ 153

अद्य शम्भो तदुत्थानं यथा भवति सत्वरम् ।
तथा विधेहि करुणां करुणाकर शङ्कर ॥ 154

शिवभक्तः -

इति तद्वचनं श्रुत्वा तथास्त्वित्याह शङ्करः ।
ततः स निर्गतः कालः शङ्करप्रेषितस्तदा । 155

अतः शिवैकशरणो भव त्वं द्विजसत्तम ।
शिवैकशरणानां तु नास्त्येव यमयातना ॥ 156

बिभेति शाङ्करं दृष्ट्वा यमोऽपि सततं द्विज ।
अतो भज महादेवं भक्त्या भस्मविभूषितः ॥ 157

समर्चय महादेवं रुद्राक्षाभरणोज्ज्वलः ।
जाबालोक्तविधानेन त्रिपुण्ड्रं कुरु सादरम् ॥ 158

शिवार्चनं यथा नित्यं भस्मरुद्राक्षधारणम् ।
कर्तव्यं श्रद्धया नित्यमप्रमादेन सर्वथा ॥ 159

निधनेत्यादि ये मन्त्रा नमोऽन्ताः पापनाशकाः ।
तैरन्वहं पूजनीयो लिङ्गरूपी सदाशिवः ॥ 160

नित्यमार्द्रैरनार्द्रैर्वा बिल्वपत्रैर्महेश्वरम् ।
पूजय त्वं त्रिकालं च भक्तिश्रद्धापुरःसरम् ॥ 161

बिल्वपत्राणि शुद्धानि स्वतः पर्युषितान्यपि ।
शङ्करार्पणयोग्यानि भवन्ति द्विजसत्तम ॥ 162

सुवर्णबिल्वपत्रं च रत्नं च रजतं तथा ।
न हि पर्युषितं विप्र शुद्धमेव स्वयं यतः ॥ 163

अर्चितान्यपि बिल्वानि प्रक्षाल्य च पुनः पुनः ।
शङ्करार्पणयोग्यानि नूतनानीव सर्वदा ॥ 164

शुष्कं त्रुटितमार्द्रं वा बिल्वपत्रं शिवप्रियम् ।
तस्मादर्चय यत्नेन बिल्वपत्रैः सदाशिवम् ॥ 165

महापापविनिर्मुक्तो भविष्यसि न संशयः ॥ 166

विष्णुरुवाच -

इत्युक्तस्तेन शैवेन तं प्रणम्य शिवार्चकम् ।
उद्धूल्य भस्मनाङ्गानि शिवार्चनपरोऽभवत् ॥ 167

रुद्राक्षधारणं कृत्वा स चकार शिवार्चनम् ।
ततः शिवप्रसादेन निर्मुक्तः सर्वपातकैः ॥ 168

प्रपेदे गणनाथत्वं शिवलिङ्गार्चनाद्विधे ।
ततः प्रयत्नतः कार्यं शिवलिङ्गार्चनं विधे ॥ 169

स्मृते तु शङ्करे नित्यं संसारी न भविष्यति ।
संसारतरणोपायः शङ्करस्मरणं विधे ॥ 170

ततः स्मराम्यहं देवं शङ्करं लोकशङ्करम् ।
विचार्य वेदवेदान्तान्सेतिहासानतन्द्रिताः ॥ 171

सम्पूज्यः शिव एवेति निगदन्ति मुनीश्वराः ।
प्रसन्ने पार्वतीनाथे चतुर्वर्गफलप्रदे ॥ 172

किमलभ्यं भवेल्लोके वद मे चतुरानन ।
भस्मरुद्राक्षधारी सन् जपन्पञ्चाक्षरं मनुम् ॥ 173

यः पिबेच्छिवपूजान्ते शिवनिर्णेजनोदकम् ।
स मुक्तिं लभते ब्रह्मन् भुक्त्वा भोगानशेषतः ।। 174

पुरा काञ्चीपुरे त्वासीन्महीपालो बलोन्नत. ।
विश्वाभिधो ददर्शैकं शिवाचाररतं द्विजम् ।। 175

स राजा तमुपेत्याथ प्रणम्याभ्यर्च्य सादरम् ।
कृताञ्जलिपुटो भूत्वा पप्रच्छ विनयान्वितः ।। 176

विश्वाभिध उवाच-

विप्रवर्य नमस्तेऽस्तु शङ्करार्चनतत्पर ।
त्वद्दर्शनेन सन्तुष्टमभूदद्य मनो मम ।। 177

गतं वर्षशतं राज्यं शासतो मेऽरिवर्जितम् ।
भुक्तं मयाऽयुतं स्त्रीणां सुन्दरीणां यथासुखम् ।। 178

सन्ति मे बहवः पुत्राः सर्वे विद्याविशारदाः ।
धनानि सन्त्यनन्तानि रत्नानि विविधानि च ।। 179

कुबेरेण समं सख्यं ममास्ति प्रीतिपूर्वकम् ।
ऐरावतसमाकारा अनेकाः सन्ति मे गजाः ।। 180

उच्चैःश्रवःसमाः सन्ति तुरगाः कोटिशो मम ।
कामधेनुसमाःसन्ति मम गावोऽपि कोटिशः ।। 181

अन्यान्यनन्यलभ्यानि सन्ति वस्तूनि कोटिशः ।
सुवर्णरत्ननिचयः कोशे मे वर्धतेऽन्वहम् ।। 182

जायतेऽनुक्षणं विप्र भाग्यवृद्धिर्ममाधुना ।
एतादृशं महद्भाग्यं कथं जातं मम द्विज ।। 183

किं वा कृतं मया पुण्यं तत्सर्वं वद शाङ्कर ।। 184

शाङ्कर उवाच -

भिल्लः पूर्वभवे राजन्भवानासीद्बलान्वितः ।
तदा भिल्लशरीरेण पातकं बहुधा कृतम् ।। 185

मांसार्थमतियत्नेन बहवो निहता मृगाः ।
गिरिकन्दरमाश्रित्य ब्राह्मणा बहवो हताः ।। 186

कृतो मार्गनिरोधश्च ब्राह्मणानां पुरा त्वया ।
एवमेव स्थितं पूर्वमरण्ये क्रूरकर्मणा ।। 187

अथैकदा त्वया दृष्टो बिल्ववृक्षो मनोहरः ।
तद्वने बिल्वपत्राणि सम्पाद्यान्वहमादरात् ।। 188

शिवलिङ्गं समभ्यर्च्य पूजयित्वा स्थितः पुरा ।
तवापि कृतपापस्य तथैवासीत्तदा मतिः ।। 189

सा मतिर्निर्मला नित्यं सुदृढासीत्तदा तव ।
त्वयापि श्रद्धयाऽनर्घबिल्वपत्राणि सादरम् ।। 190

सम्पाद्याभ्यर्चितं लिङ्गं त्रिकालं सावधानतः ।
कृत्वा कृत्वा च पापानि त्वया प्रत्यहमादरात् ।। 191

बिल्वपत्रैर्महादेवः पूजितो यत्न(भक्ति)पूर्वक ।
बिल्वपत्रार्चनं नित्यं कुर्वतस्ते करद्वयम् ।। 192

बिल्वकण्टकसंविद्धमतीव समभून्नृप ।
यदा यदा बिल्वपत्रं गृहीतं भवता तदा ।। 193

तदा तदा तनुर्विद्धा समभूत्कण्टकैर्भृशम् ।
बिल्वकण्टकविद्धाङ्गोऽप्यन्वहं प्रीतिपूर्वकम् ।। 194

न बिल्वपत्रग्रहणादर्चनाद्विरतो भवान् ।
वसन्ते बिल्वपत्रेषु विरूढेषु पुरात्वया ।। 195

बिल्ववृक्षाग्रमारुह्य बिल्वपत्राणि चाग्रहीः ।
तदानीं वायुरभवत् तदा तेन प्रकम्पितः ।। 196

भूमौ निपतितः पूर्वं भवांस्त्यक्ततनुस्ततः ।
तदा दुन्दुभयो नेदुःपुष्पवृष्टिरभून्नृप ।। 197

त्वद्दर्शनार्थं ब्रह्माद्यास्तदा तत्र समागताः ।
तदा विमानमारुह्य ब्रह्मलोकं गतो भवान् ।। 198

ब्रह्मर्षिसेविते तत्र गतस्य तव पार्थिव ।
चकार पूजनं तुभ्यं ब्रह्मा सादरमन्वहम् ।। 199

ततः परं नरेन्द्रस्य पुत्रभावमुपागतः ।
तदाप्रभृति राजार्हसौख्यान्यन्वभवद्भवान् ॥ 200

पद्मगन्धास्त्वया भुक्ता नार्यः कमललोचनाः ।
पुत्राश्च बहवो लब्धाः सम्पदश्च निरामयाः ॥ 201

इहैव भुक्तभोगस्य शिवपूजारतस्य ते ।
प्रयच्छति महादेवो मोक्षमत्यन्तदुर्लभम् ॥ 202

शिवार्चनेन सम्प्राप्तमिदं भाग्यं त्वया नृप ।
प्राप्तभाग्येन भूयोऽपि शिवः सम्पूज्यते त्वया ॥ 203

शिवार्चनं विना नान्यन्महाभाग्यस्य कारणम् ।
भाग्यप्रदः शिवादन्यो न भवत्येव सर्वथा ॥ 204

सिंहासनाधिरोहेच्छा मोक्षेच्छाप्यनिवारिता ।
यस्यास्ति तेन कर्तव्यं नियमेन शिवार्चनम् ॥ 205

शिवे सम्पूजिते साम्बे सर्वकामप्रदे सदा ।
राजन्सिध्यन्ति सर्वार्थाः पुरुषस्य न संशयः ॥ 206

शिवं साम्बं समाराध्य सर्वदेवशिखामणिम् ।
विष्णुब्रह्मादयः स्वं स्वं पदं प्राप्ता अनुत्तमम् ॥ 207

अनर्चितमहेशानां नैवानायासजीवनम् ।
क्व वा मोक्षकथा तेषां दूरतः सा पराहता ॥ 208

अनर्चितमहादेवैर्भुक्त्वा दरिद्र्यमन्वहम् ।
ततो घोरेषु नरकेष्वनिशं दुःखमाप्यते ।। 209

शिवार्चनपरा एव लोके धन्यतमा मताः ।
अतः शिवार्चको विष्णुर्धन्यो मान्योऽस्ति सर्वदा ।। 210

प्रयान्ति ब्रह्मसदनं दृष्ट्वापि शिवमर्चितम् ।
गच्छ काशीं प्रति प्रीत्या विश्वेशो यत्र तिष्ठति ।। 211

गत्वा विश्वेश्वरं तत्र पूजयस्व यथाविधि ।
प्रातः काले समुत्थाय मणिकर्णीजले शुभे ।। 212

स्नात्वोद्धूल्यैव सर्वाङ्गं त्रिपुण्ड्रं रचयादरात् ।
रुद्राक्षधारणं कृत्वा सन्ध्यां कृत्वा विधानतः ।। 213

मौनी जलं बिल्वपत्राण्यादाय प्रतिवासरम् ।
पूजयस्व प्रयत्नेन विश्वेशं साम्बमव्ययम् ।। 214

विश्वेश्वरार्चनरतो भव नित्यमतन्द्रितः ।
किञ्च किं बहुनोक्तेन सत्यमेकं वचः शृणु । 215

शिव एव सदापूज्यश्चतुर्वर्गफलप्रदः ।
अतः प्रयत्नतो राजन्कुरु शङ्करपूजनम् ।। 216

सर्वदाप्यप्रमादेन भस्मधारणपूर्वकम् ।
अतः परं विरक्तः सन्विषासक्तिमुत्सृज ।। 217

सर्वथा सावधानेन भज साम्बं सदाशिवम् ।
कुरु प्रासादममलं नानाशृङ्गविराजितम् ॥ 218

महादेवस्य पुरतो नानारत्नविराजितम् ।
प्रासादस्थ महादेवमुमाकन्तं विलोकय ॥ 219

सम्पूज्य रत्नहारैश्च दिव्यवस्त्रैर्विभूषितम् ।
प्रासादस्थमुमाकान्तं पश्य भक्तिपुरःसरम् ॥ 220

सहस्रचक्रसंवीतं सौवर्णं रत्नरञ्जितम् ।
कारयस्व रथं राजन् शङ्करारोहणोचितम् ॥ 221

सुवर्णरत्नमालाभिरलङ्कुरु रथोत्तमम् ।
दिव्यवस्त्रैश्च पुष्पैश्च चामरैश्च यथोचितम् ॥ 222

उमाकान्तो महादेवो रत्नभारविभूषितः ।
नानारत्नप्रभादीप्तं रथमारोहतु प्रभुः ॥ 223

रथारूढं शिवं दृष्ट्वा सोममभ्यर्च्य तं मुदा ।
संसारसागराद्घोरान्मुक्तो भवति मानवः ॥ 224

रथोत्सवं कारयस्व प्रतिसङ्क्रमणं प्रभोः ।
साम्बस्य दर्शनं कार्यं रथारूढस्य शूलिनः ॥ 225

रविसङ्क्रमणे दृष्ट्वा रथारूढमुमापतिम् ।
मुच्यते पापकोटिभ्यः सद्य एव न संशयः ॥ 226

कृत्वापि ब्रह्महत्यादिमहापापानि भूपते ।
रथारूढं शिवं दृष्ट्वा सर्वपापैः प्रमुच्यते ।। 227

पुरा कश्चिन्महापापी नित्यं ब्रह्मवधे रतः ।
परदाररतो नित्यं परद्रव्यरतः सदा ।। 228

मद्यमांसाशनो नित्यं नित्यं गोवधकृन्मुदा ।
स कदाचिदिमां प्राप काशीं पुण्योपसंश्रयाम् ।। 229

आगत्य तु महादेवं रथारूढमलोकयत् ।
ततोऽसौ निर्गतः काश्यास्तथैव विषयातुरः ।। 230

कदाचित्तीव्रकामेन पीडितो भूरिदुष्कृतः ।
जहार ब्राह्मणीमेकां पतिदेवपरायणाम् ।। 231

अथ सा तमुवाचैव विप्रपत्नी पतिव्रता ।
अतितीव्रभयग्रस्ता ध्यायन्ती शङ्करं हृदि ।। 232

मां मा स्पृश बलाद्दुष्ट यदि स्प्रक्ष्यसि कामतः ।
शिरः सहस्रधा छिन्नं तवाद्येह भविष्यति ।। 233

इत्युक्तं तद्वचः श्रुत्वाप्यगणय्य बलान्वितः ।
कामातुरोऽङ्गनादेहं पस्पर्श रतिलोलुपः ।। 234

अथ तस्य शिरश्छिन्नं सद्य एव सहस्रधा ।
ततो दूताः समागत्य निन्युस्तं यममन्दिरम् ।। 235

ततो विलोक्य कालस्तं चित्रं तं धर्मलेखकम् ।
प्रभाषे कोऽयमेतस्य धर्मोऽधर्मश्च संवद ॥ 236

चित्रगुप्तः -

धर्मराज कृतं पापमनेन बहु जन्मतः ।
पातकानि महापूर्वाण्यनेन रचितानि च ॥ 237

तथापि कृतमेतेन पुण्यमेकं महत्तमम् ।
तत्पुण्यसदृशं किञ्चित् त्रिलोक्यां नैव विद्यते ॥ 238

रथारूढं शिवं साम्बं ददर्शायं यमादरात् ।
तद्दर्शनेन पापानि विनष्टान्यस्य तत्क्षणे ॥ 239

साम्बो दृष्टो रथारूढो यद्दिने तद्दिने शिवः ।
त्यक्तजीवोऽभवत्तेन नास्य यामीययातना ॥ 240

यः पश्यति शिवं साम्बं रथारूढं महेश्वरम् ।
सोऽनन्तब्रह्महत्यादिपातकेभ्यो विमुच्यते ॥ 241

इत्युक्तं तद्वचः श्रुत्वा यमः सन्तुष्टमानसः ।
ददौ रत्नासनं तस्मै प्रीत्या भक्त्या च सादरम् ॥ 242

ततोऽर्घ्यादिभिरभ्यर्च्य पुष्पके सन्निवेश्य तम् ।
सत्वरं प्रेषयामास स्वर्गलोकाय धर्मराट् ॥ 243

इन्द्रस्तमागतं वीक्ष्य विमानस्थं मुदान्वितः ।
उपवेश्यासने रम्ये पूजयामास सादरम् ।। 244

अथेन्द्रस्तं विमानेन ब्रह्मलोकं निनाय च ।
ब्रह्मा समागतं शैवं पूजयामास तं मुदा ।। 245

ब्रह्मणा पूजितोऽद्यापि ब्रह्मलोके स तिष्ठति ।
बहुवर्षसहस्रान्ते भुवि भूपो भविष्यति ।। 246

जातिस्मृतिस्तदाप्यस्य भविष्यति नरेशितुः ।
स्वयं रथोत्सवं शम्भोः कारयिष्यति भक्तितः ।। 247

महेशप्रवणो नित्यं शिवपूजां करिष्यति ।
ततः शिवार्चनेनैव स च मुक्तो भविष्यति ।। 248

शिवार्चनात्परं राजन्न मोक्षस्यास्ति साधनम् ।
मुक्तिकान्ता वशं याति वशं याति जगत्त्रयम् ।। 249

वशं प्रयान्ति देवाश्च श्रीमहादेवपूजनात् ।
सहस्रवाजिमेधानां साङ्गानां यत्फलं नृप ।। 250

ततोऽनन्तगुणं पुण्यं लभ्यते शिवपूजनात् ।
सहस्रराजसूयानां साङ्गानां यत्फलं नृप ।। 251

ततोऽनन्तगुणं .... ।
सहस्रवाजपेयानां साङ्गानां यत्फलं नृप ।। 252

ततोऽनन्तगुणं पुण्यं .... ।
श्वेताश्वायुतदानेन यत्फलं समावाप्यते ॥ 253

ततोऽनन्तगुणं पुण्यं .... ।
द्विरदायुतदानेन यत्फलं समवाप्यते ॥ 254

ततोऽनन्तगुणं पुण्यं .... ।
कोटिकन्याप्रदानेन यत्फलं समवाप्यते ॥ 255

राजन्यावत्फलं प्राप्यं श्रीमहादेवपूजया ।
तावत्फलं न हि प्राप्यं तदन्यैर्धर्मकोटिभिः ॥ 256

अतः कुरु प्रयत्नेन महादेवार्चनं नृप ।
शिवपञ्चाक्षरं मन्त्रं जप रुद्राक्षमालया ॥ 257

रुद्राक्षमालया जप्तः शिवमन्त्रः प्रसिध्यति ।
यावत्फलं जपाल्लभ्यं मौक्तितोत्तममालया ॥ 258

ततः सहस्रगुणितं फलं स्फटिकमालया ।
जपाद्यावत्फलं प्राप्यं मुक्तास्फटिकविद्रुमैः ॥ 259

ततोऽनन्तगुणं पुण्यं शुद्धरुद्राक्षमालया ।
शिवमन्त्रो बिल्वमूले जप्तो रुद्राक्षमालया ॥ 260

अभीप्सितार्थदो देवः भवत्येव न संशयः ।
शिवक्षेत्रे बिल्वमूले जप्तो रुद्राक्षमालया ॥ 261

अभीसितार्थदो नित्यं भवत्येव न संशयः ।
नाभिदघ्ने जले स्थित्वा शिवमन्त्रमनुत्तमम् ।। 262

यो जपेद्भस्मपूताङ्गः स मुक्तो भवति ध्रुवम् ।
उपदेशोऽस्तु वा मा वा शिवपञ्चाक्षरस्य तु ।। 263

तथापि जपनीयोऽयं मन्त्रः शैवः षडक्षरः ।
हत्यां यत्नेन कृत्वापि ब्राह्मणानां निरन्तरम् ।। 264

शिव इत्यक्षरद्वन्द्वमुच्चार्याघाद्विमुच्यते ।
अनन्तब्रह्महत्यादिपातकानि मुहुर्मुहुः ।। 265

कृत्वापि मुच्यते जन्तुः शिवमन्त्रजपाद्ध्रुवम् ।
शिवमन्त्रानलो राजन्पापारण्यदवानलः ।। 266

अत एव प्रयत्नेन जप्यः शैवषडक्षरः[1] ।
चण्डालोऽधीतवेदोऽपि यथा प्राप्नोति दुर्गतिम् ।। 267

तथा धृत्वापि रुद्राक्षानशैवो याति दुर्गतिम्
अतो गृहाण राजेन्द्र शिवदीक्षामघापहाम् ।। 268

शैवो भवातियत्नेन मोक्षेच्छा यदि विद्यते ।
इत्युक्त्वा स तु शैवेन्द्रस्तेन भूपेन पूजितः ।। 269

---

1 शैवषडक्षर इति मायादिः प्रणवादिर्वापञ्चाक्षरः।

ययावेकाम्रनाथस्य पूजार्थं हृष्टमानसः ।
ततः स भूपतिं ब्रह्मन् चक्रे रत्नशिवालयम् ॥ 270

स लिङ्गं स्थापयामास तस्मिन्शिवालये शुभे ।
रथं च कारयामास सहस्रारं हिरण्मयम् ॥ 271

सहस्रद्वारसंवीतं रत्नमालाविराजितम् ।
अयुतं रथशृङ्गाणां रथोपरि विराजितम् ॥ 272

हेमध्वजायुताकीर्णं हेमपट्टविराजितम् ।
वैकुण्ठमप्यतीत्यैव भ्राजितं नयनप्रियम् ॥ 273

सर्वदेवसमाराध्यं सर्वगन्धर्वसेवितम् ।
शङ्करं रथमारोप्य साम्बं संवीक्ष्य भूपतिः ॥ 274

चकारात्यन्तसन्तुष्टः पूजां साम्बस्य सादरम् ।
सहस्राधिकदीपाश्च दीपिताः शङ्करालये ॥ 275

तद्दीपकान्तिपुञ्जेन काञ्ची सन्दीपिता सदा ।
प्रासादः कारितस्तेन बहुद्वारसमन्वितः ॥ 276

तत्प्रासादवरारूढं महादेवं स भूपतिः ।
पूजयामास यत्नेन सन्तुष्टहृदयो विधे ॥ 277

अथ राज्यं स्वपुत्रेषु विन्यस्य प्रययौ नृपः ।
काशीं विश्वेशनगरीं गत्वा विश्वेश्वरं प्रभुम् ॥ 278

पूजयामास यत्नेन कथाःऽशुश्राव शाम्भवीः ।
गृहीत्वा शैवदीक्षां च शिवैकशरणोऽभवत् ।। 279

अथ कालेन भूतेशकृपया मुक्तिमाप सः ।

ब्रह्मोवाच -

पूर्वं वेदरताः सर्वे शैवा एव स्थिता द्विजाः ।। 280

अशैवास्ते कथं जाता भविष्यन्ति कथं हरे ।

विष्णुरुवाच -

पुरा दुर्भिक्षमभवद्द्वादशाव्दमवर्षणात् ।। 281

तदानीं गौतमं प्राप्य स्थिताः सर्वे महर्षयः ।
स गौतमो मुनीन्दृष्ट्वा तदा दुर्भिक्षपीडितान् ।। 282

आहारं कल्पयामास तेभ्यः स तपसो बलात् ।
ततः परं कदाचित्ते कृत्वा गां कृत्रिमां मुने ।। 283

नीवारभक्षणासक्तां चक्रुस्तां कुटिलाशयाः ।
नीवारभक्षणासक्तां गां दृष्ट्वा गौतमस्तदा ।। 284

तृणेन ताडयामास शनैस्तां गां निवारयन् ।
ततः स गौतमो भीतो गौर्हतेति ततः परम् ।। 285

अपश्यत्प्रणिधानेन किमेतदिति शङ्कितः ।
अथ तां कृत्रिमां ज्ञात्वा गां क्रोधेन समाकुलः ।। 286

शशाप तानृषीन्सर्वात् गौतमो मुनिपुङ्गवः ।

गौतम उवाच -

अद्यप्रभृति वेदोक्ते विभूत्युद्धूलने द्विजाः ॥ 287

मा भूयाद्भवतां श्रद्धा धर्मादिफलदायिनी ।
अद्यप्रभृति वेदोक्ते केवले भस्मधारणे ॥ 288

मा भूयात्

अद्यप्रभृति वेदोक्ते शुद्धरुद्राक्षधारणे ।
मा भूयात् .... ॥ 289

अद्यप्रभृति वेदोक्ते शिव पञ्चाक्षरे शुभे ।
मा भूयात् .... ॥ 290

अद्यप्रभृति वेदोक्ते रुद्राध्यायजपे द्विजाः ।
मा भूयाद्भवतां श्रद्धा .... ॥ 291

अद्यप्रभृति वेदोक्ते शिवरात्रव्रते द्विजाः ।
मा भूयाव् .... ॥ 292

अद्यप्रभृति वेदोक्ते सोमवारव्रते द्विजाः ।
मा भूयात् .... ॥ 293

अद्यप्रभृति वेदोक्ते काशीवासेऽपि मोक्षदे ।
मा भूयात् .... ॥ 294

त्रिकालशिवपूजायां मा भूयाद्भवतां मतिः ।
मा भूयाद्भवतां प्रीतिः शिवलिङ्गनिरीक्षणे ॥ 295

मा भूयाद्भवतां प्रीतिः शिवतीर्थनिषेवणे ।
बिल्वपत्रार्चने प्रीतिर्माभूयाद्भवतां द्विजा ॥ 296

शिवतत्वविचारेऽपि माभूयाद्भवतां मतिः ।
अद्य दत्ता मया शापा ये दुःखफलदायकाः ॥ 297

तेऽवश्यं सन्तु भवतां सन्ततावपि सर्वदा ।

विष्णुः

इति शप्त्वा मुनीन्सर्वान्गौतमः स्वाश्रमं ययौ ॥ 298

ततस्ते खिन्नहृदया मुनयोऽपि गता विधे ।
भूरप्यशाङ्करव्याप्ता कलौ दुःखं करिष्यति ॥ 299

अशाङ्कराः शैवधर्मान् नाशयिष्यन्ति सर्वदा ।
अशैववृद्धिर्बहुधा भविष्यति कलौ युगे ॥ 300

नानादैवतभक्तिं च करिष्यन्ति च पण्डिताः ।
अशैवधर्मसङ्क्रान्ता पृथिवी विनशिष्यति ॥ 301

अस्माभिरतियत्नेन कर्तव्यं शिवपूजनम् ।
प्राप्तव्यं शङ्करस्थानं योगिनामपि दुर्लभम् ॥ 302

ब्रह्मविष्णुशिवेन्द्रादिजननी दिव्यविग्रहा ।
कामाक्षीति विचार्याब्जसम्भवैनां प्रपूजय ॥ 303

यथा देवेत्तमं शम्भुं पूजयाम्यन्वहं मुदा ।
तथात्वमपि तं देवं ध्यायन्पूजय शङ्करम् ॥ 304

शिवार्चनेन नश्यन्ति पतकानि बहून्यपि ।
शिवार्चनेन सम्प्राप्या धर्माश्च बहवो विधे ॥ 305

महादेव उवाच -

इत्युक्तो विष्णुना ब्रह्मा मामेवैकाम्रनायकम् ।
सम्पूज्यातिप्रयत्नेन काञ्चीवासं चकार ह ॥ 306

विष्णुब्रह्मेन्द्रचन्द्रप्रभृतिसुरशिरो रत्ननिर्यत्ननिर्य-
द्रत्नच्छायाविरोधिस्फुरदनघनखस्वच्छकान्तिप्रकान्तम् ।
यत्तत्पादारविन्दं मम निगमशिरोरत्नभूतं प्रभूतं
लक्ष्मीकान्ताक्षिकान्तं गिरिवरतनये साधु सन्तो
भजन्ति ॥ 307

॥ इति श्रीशिवरहस्ये सप्तमाम्शे शिवगौरीसंवादे
विंशोऽध्यायः ॥

॥ एकविंशोऽध्यायः ॥

श्रीशिव उवाच -

शिवे सुक्षेत्रमस्त्येकमरुणाचलनामकम् ।
अरुणाचलनाथस्य स्मरणं मङ्गलप्रदम् ॥ 1

तत्र सन्ति महान्तो हि शिवशास्त्रविशारदाः ।
रुद्राक्षभस्माभरणाः श्रीरुद्राध्यायजापकाः ॥ 2

तत्र ब्रह्मसरो नाम सरस्तिष्ठति शोभने ।
तत्रैकस्नानमात्रेण मुच्यन्ते सर्वकिल्बिषैः ॥ 3

शिवे मकरसङ्क्रान्तावरुणाचलनायकम् ।
दृष्ट्वा विमुच्यते पापैरन्तैरपि सर्वथा ॥ 4

तत्रारुणाचलेशस्य रविसङ्क्रमणे शुचिः ।
एकं प्रदक्षिणं कृत्वा न पुनर्गर्भभाग्भवेत् ॥ 5

विष्णुब्रह्मादयो देवा रविसङ्क्रमणे शिवे ।
तत्रारुणाचलेशस्य कुर्वन्त्येव प्रदक्षिणम् ॥ 6

अरुणाचलनाथं यो रथारूढं विलोकयेत् ।
न तस्य भूयः संसारसागरे पतनं शिवे ॥ 7

वेदाः स्तुवन्ति सततमरुणाचलनायकम् ।
मुनयः सिद्धगन्धर्वाः स्तुवन्ति सततं शिवे ॥ 8

पुरा कश्चिन्महापापी निर्घृणो लुब्धकः सदा ।
ब्रह्महत्यादिपापानि कुर्वन्नेवास्त भूरिशः ॥ 9

ददर्श चैकदा सोऽयं शिवयात्रापराञ्जनान् ।
न त्वावभाषे वचनं नत्वा तान्छिवसत्तमान् ॥ 10

कुत्र वा गम्यते शैवा भवद्भिः कथ्यतां द्रुतम् ।
को वाभिपूज्यते देवः भवद्भिः सत्वशालिभिः ॥ 11

शैवा ऊचुः -

अरुणाचलयात्रार्थं गम्यतेऽस्माभिरादरात् ।
श्वो मध्याह्ने पद्मबन्धुर्मकरस्थो भविष्यति ॥ 12

तदारुणाचलेशस्य पूजा कार्या प्रयत्नतः ।
अरुणाचलनाथं यस्तदानीमर्चयेन्मुदा ॥ 13

स महापातकेभ्योऽपि मुच्यते नात्र संशयः । 14

विभूत्युद्धूलनं नित्यं तथा रुद्राक्षधारणम् ।
शिवलिङ्गार्चनं नित्यं रुद्राध्यायजपस्तथा ॥ 15

पञ्चाक्षरजपो नित्यं तद्वच्छैवाभिवादनम् ।
सोमवारव्रतं नित्यं शिवरात्रिव्रतं तथा ॥ 16

शिवयात्रादिकं नित्यं महेशस्मरण तथा ।
इमानि नित्यकर्माणि कुर्वन्नित्यमतन्द्रितः ॥ 17

यस्तिष्ठति सदा विप्रः स मुक्तो भवति ध्रुवम् ।
इत्युक्तं तद्वचः श्रुत्वा स पापी तैर्द्विजैः सह ॥ 18

अरुणाचलयात्रार्थं ययौ सन्तुष्टमानसः ।
ततो ब्रह्मसरस्यादौ स्नात्वा सन्तर्प्य चातिथीन् ॥ 19

अरुणाचलनाथस्य चक्रे पूजां स पातकी ।
ततोऽरुणाचलेशस्य स चकार प्रदक्षिणम् ॥ 20

स ददर्श रथारूढं तत्र देवोत्तमं शिवम् ।
स ततस्तत्र विजहौ प्राणान्निर्मुक्तपातकः ॥ 21

ततो ममान्तिकं प्राप स एव वरवर्णिनि ।
अरुणाचलनाथस्य महिमा हि महाञ्छिवे ॥ 22

वक्तुं न शक्यते देवि महिमा तस्य सर्वथा ।
धन्याः पूज्यतमा नित्यमरुणाचलवासिनः ॥ 23

कीटादयोऽपि तत्रस्था शिवरूपा न संशयः ।
तत्र पूर्वमभूद्राजा कश्चिद्धीमेश्वराभिधः ॥ 24

तस्य प्रभावं वक्ष्यामि शृणु सादरमम्बिके ।
स तु पूर्वभवे विप्रो दरिद्रो व्याधिपीडितः ।। 25

तेन दुष्टानि पापानि कृतानि च मुहुर्मुहुः ।
दुष्टप्रतिग्रहासक्तः सर्वदा पापचिन्तकः ।। 26

दुष्टवित्तापहरणे सर्वदाऽऽसक्तमानसः ।
कदाचित्स तु पापिष्ठो विपिनं समुपेयिवान् ।। 27

शाकादिकं समानेतुमुपस्युत्थाय शोभने ।
तत्रापश्यद्बिल्ववृक्षं नवपल्लवसंयुतम् ।। 28

लिङ्गं चापश्यदमलं तत्र नार्मदमुत्तमम् ।
ततः स चिन्तयामास दृष्ट्वा विल्वतरुं द्विजः ।। 29

लिङ्गं च नार्मदं दृष्ट्वा किं कर्तव्यमिति प्रिये ।
एतस्मिन्नन्तरे काले तस्य पत्नी समागता ।। 30

तां दृष्ट्वा सुन्दरीं भार्यामुवाचेदं वचस्तदा ।

द्विजः उवाच -

अयि आर्ये मया पूर्वं बहुधा पातकं कृतम् । 31

तत्पापनाशः केनापि न विना शङ्करार्चनम् ।।
अत्युग्राणि च दानानि गृहीतानि मया प्रिये ।। 32

यद्दानग्रहणेनैव न भूयःपुरुषो भवेत् ।
तुलाद्रव्यं मया पूर्वं बहुधा भक्षितं मुदा ॥ 33

तत्फलं नरकावासः सत्यं सत्यं वदाम्यहम् ।
वणिगासीत्पुरा कश्चिद्येन स्वर्णतुला कृता ॥ 34

तद्द्रव्येणाभवत्पूर्वं जीवनं मासपञ्चकम् ।
वणिग्दत्तधनेनैव कुटुम्बभरणं कृतम् ॥ 35

वणिग्दत्तेन वित्तेन तनुं यः पोषयिष्यति ।
स घोरं नरकं याति तत्र भुङ्क्ते च यातनाः ॥ 36

गौर्गृहीता राजदत्ता शिवक्षेत्रे मया पुरा ।
गृहीता गौः शिवक्षेत्रे वणिग्दत्तापि सादरम् ॥ 37

एतादृशानां पापानां निष्कृतिः शिवपूजया ।
भविष्यति न सन्देहः श्रुतिरेवात्र कारणम् ॥ 38

अतो मयाऽत्र स्थातव्यं शिवक्षेत्रेऽतियत्नतः ।
अत्रैव शङ्करं नित्यमर्चयिष्यामि सादरम् ॥ 39

सन्त्यत्र बिल्वतरवो नवपल्लवसंवृताः ।
लिङ्गं च नार्मदं तिष्ठत्यर्चनादिष्टदायकम् ॥ 40

संसारदुःखं बहुधा भुक्तमेव मया पुरा ।
सुखलेशोऽपि नास्त्येव संसारे दुःखसागरे ॥ 41

स्रवन्मूत्रपुरीषाढ्ये शरीरे दुःखसाधने ।
कः प्रीतिं कुरुते मूढो मलकूप इवान्वहम् ॥ 42

एतावत्कालपर्यन्तं भ्रमेणैव स्थितं मया ।
नाराधितो महादेवो विष्णुब्रह्मादिवन्दितः ॥ 43

अद्य नार्मदलिङ्गस्य दर्शनादीदृशी मतिः ।
मम जाता महद्भाग्यं मम नास्त्यत्र संशयः ॥ 44

इतः शाकादिकं नीत्वा ग्रामे नानाजनाश्रये ।
स्थित्वा किं वा मया कार्यमतोऽत्रैव वसाम्यहम् ॥ 45

ग्रामे संसारिणः सन्ति बहवो मोहसङ्कुलाः ।
तद्दर्शने चित्तवृत्तिरन्यथैव भविष्यति ॥ 46

विल्ववृक्षौघसंवीते स्थातव्यं निर्जने वने ।
कर्तव्यं देवदेवस्य महादेवस्य पूजनम् ॥ 47

अनभ्यर्च्य महादेवं यदि त्यक्ष्ये तनुं तदा ।
आचन्द्रार्कं हि भोक्तव्या यातना नरके मया ॥ 48

अतः प्रयत्नतः कार्यं मया शङ्करपूजनम् ।
पुरुषार्थाश्च सिध्यन्ति नश्येदघकुलं तथा ॥ 49

शिव उवाच -

इति निश्चित्य नियतं तत्रैव स वने द्विजः ।
उवास भार्यासहितः त्यक्त्वा स्वावासवासनाम् ।। 50

तदाप्रभृति तत्रैव सभार्यः स वसन्द्विजः ।
पूजयामास सततं नार्मदं लिङ्गमुत्तमम् ।। 51

चकार कुण्डमलं तस्य लिङ्गस्य सन्निधौ ।
तत्र स्नात्वा महादेवं पूजयामास मां मुदा ।। 52

अभिषिच्य महादेवं तत्कुण्डस्थोदकैः स माम् ।
पूजयामास यत्नेन बिल्वपत्रैः समाहितः ।। 53

स हस्तलभ्यैरच्छिद्रैर्बिल्वपत्रैर्नवारुणैः ।
पूजयामास मां भक्त्या शिवलिङ्गस्वरूपिणम् ।। 54

एवं सम्पूज्य यत्नेन मामन्वहमनामयम् ।
प्रदक्षिणनमस्कारान् स चकार स्तुतिं तथा ।। 55

ततः स कन्दमूलादि किञ्चित्सम्पाद्य यत्नतः ।
निवेद्य मह्यं भक्त्यासौ तेनाहारमकल्पयत् ।। 56

एवं मासद्वयं पूजां चकार श्रद्धया युतः ।
अथासौ तत्र विजहौ तनुं तल्लिङ्गसन्निधौ ।। 57

तत्पत्न्यपि मृता तत्र वने भर्तृपरायणा ।
ततः समवसत्स्वर्गे वहुकालं मदाज्ञया ।। 58

ब्रह्मलोके स्थितं तेन ततः कल्पावधि प्रिये ।
ततः स वलिचक्रस्य भूपालस्याभवत्सुतः ।। 59

जातो जातिस्मरो भूत्वा चिन्तयामास मामजम् ।

पार्वत्युवाच -

महादेव कृपासिन्धो विष्णुब्रह्मादिवन्दित ।। 60

गर्भवासः कथं जातस्त्वद्भक्तस्य वदस्व मे ।
गर्भवासोऽतिदुःखाय दुःखं पापसमुद्भवम् ।। 61

तत्पातकमभूत्तस्य कथं भक्तस्य शङ्कर ।
त्वदर्चनेन नष्टानि तत्पापानि महेश्वर ।। 62

पुनः पापेन सम्बन्धः कथमासीद्वद प्रभो ।
त्वदर्चनेन सन्दग्धा महापातकपर्वताः ।। 63

तेषु नष्टेषु पापानि कुतस्तानि वदस्व मे ।
बिल्वपत्रेण सम्पूज्य सकृदप्यघहं हरम् ।। 64

सर्वपापविनिर्मुक्तः शिवं यातीति हि श्रुतिः ।
क्व शिवार्चनपर्यन्तं पातकानामवस्थितिः ।। 65

शिवेति स्मरणादेव नश्यत्यघकुलं यतः ।
यः शिवं पूजयेद्भक्त्या स मुक्तः पापकोटिभिः ।। 66

शिवरूपं प्रयातीति श्रुतिरत्र बलीयसी ।

ईश्वर उवाच -

गिरिजे बलिचक्रस्य ललाटात्प्रादुरास सः ।
तममन्यत भूपालः पुत्रत्वेन तदा ध्रुवम् ।। 67

प्रादुरासीद्यदा देवि स भालात्तस्य भूपतेः ।
तदा दुन्दुभयो नेदुः पुष्पवृष्टिरभूत्तदा ।। 68

प्रादुर्भूतः स भूपृष्ठे ध्यानस्तिमितलोचनः ।
सस्मार स्वकृतां पूजां लिङ्गे बिल्वदलादिभिः ।। 69

आनन्दाश्रुलवाकीर्णः स्मरन्मामीशमव्ययम् ।
उवास सायममलः कम्पयन्नवनीतलम् ।। 70

तं विलोक्याश्रुपूर्णाक्षं स राजा विस्मयं गतः ।
गौतमाय समाचख्यौ वार्तामिनामशेषतः ।। 71

गौतमः स ततो गत्वा बालकं वीक्ष्य सादरम् ।
जगाद तस्य वृत्तान्तमशेषं प्रणिधानतः ।। 72

गौतम उवाच -

राजन्नयं पुरा विप्रो महापापैकभाजनम् ।
कुर्वताप्यघमेतेन पूजितः पार्वतीपतिः ।। 73

ततस्तनुं जहौ सोऽयं सन्निधौ श्रीमहेशितुः ।
स्वर्गलोकं गतः पूर्वमसौ च तदनन्तरम् ।। 74

ब्रह्मलोकं गतो राजन्नाकल्पं शिवपूजनात् ।
ललाटात्प्रादुरासीत्ते तव भाग्यवशान्नृप ।। 75

इत्युक्तं तद्वचःश्रुत्वा बालकः शीघ्रमुत्थितः ।
ननाम मुनिशार्दूलं गौतमं भक्तमैश्वरम् ।। 76

बालक उवाच -

भस्मोद्धूलितसर्वाङ्ग रुद्राक्षाभरणप्रिय ।
शिवलिङ्गार्चक श्रीमन् शैवोत्तम मुनीश्वर ।। 77

तत्वज्ञोऽसि वरेण्योऽसि शिवार्चनपरायण ।
किं कर्तव्यं मया नित्यं वद निश्चित्य सादरम् ।। 78

गौतम उवाच -

धन्योऽसि कृतकृत्योऽसि सफलं तव जीवितम् ।
सफलं जन्म ते बाल धन्योऽयं जनकस्तव ।। 79

वलिचक्रेऽभवद्वृद्धः शरीरं चातिदुर्बलम् ।
अतःपरं प्रयत्नेन कुरु राज्यस्य पालनम् ॥ 80

किञ्च भस्मोद्धूलिताङ्गः कुरु शङ्करपूजनम् ।
शिवस्याभ्यर्चनेनैव जातिस्मृतिरभूत्तव ॥ 81

जातिस्मरत्वं भूपत्वं लावण्यं च शिवार्चनात् ।
सम्प्राप्यते च लब्धव्या मुक्तिश्चान्ते न संशयः ॥ 82

नान्योऽस्ति श्रीमहादेवादपरः कामितार्थदः ।
अतोऽन्वहं प्रयत्नेन पूजयस्व सदाशिवम् ॥ 83

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
तमेव देवदेवेशं भज शङ्करमन्वहम् ॥ 84

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं भजान्वहम् ॥ 85

यो बेदान्तौघमृग्यात्मा यो वेदान्तशिरोमणिः ।
तमेव देवदेवेशं भज शङ्करमन्वहम् ॥ 86

यो विष्णुमौलिमन्दारमकरन्द्रार्दपादुकः ।
तमेव .... ॥ 87

कन्दर्पदर्पदमनो यो नित्यो यो मनोन्मनः ।
तमेव .... ॥ 88

विदारितनृसिह्मो यो योऽसौ शारभरूपधृक् ।
तमेव .... ॥ 89

यतः सर्वमभूद्दृश्यं जगदेतच्चराचरम् ॥
तमेव .... ॥ 90

यद्भयात्पवते वातो यद्भीत्योदेति भानुमान् ।
तमेव .... ॥ 91

यद्भयादनलेन्द्रौ च स्वस्वकर्मणि तिष्ठतः ।
तमेव देवदेवेशं भज शङ्करमन्वहम् ॥ 92

यो अग्नावोषधीष्वप्सु विश्वं व्याप्याधितिष्ठति ।
तमेव .... ॥ 93

योऽनन्तो निष्कलोऽनन्तो निर्गुणो निरुपाधिकः ।
तमेव .... ॥ 94

यः सर्वकर्ता सर्वात्मा सर्वसाक्षी सदाशिवः ।
तमेव देवदेवेशं भज शङ्करमन्वहम् ॥ 95

त्रिकालमप्रमादेन शिवमर्चय यत्नतः ।
गृहाण शाम्भवीं दीक्षां मोक्षार्थमपि यत्नतः ॥ 96

मोक्षस्तु न भवत्येव विना शङ्करदीक्षया ।
सन्यासयोगो विज्ञेयो या दीक्षा शाम्भवी मता ॥ 97

त्रिपुण्ड्रधारणं कार्यं ललाटादिषु भस्मना ।
रुद्राक्षधारणं कार्यमप्रमादेन सन्ततम् ।। 98

लिङ्गपूजैव कर्तव्या केवला सर्वसाधनैः ।
वेदावतंसः सततं जप्तः शैवः षडक्षरः ।। 99

रुद्राध्यायजपः कार्यः शिवमन्त्रसमाश्रयः ।
देवतासार्वभौमो यः सर्वदेवशिखामणिः ।। 100

स एव सर्वदा ध्येयः पार्वतीरमणः प्रभुः ।। 101

सदा भस्मवता भाव्यं सदा रुद्राक्षधारिणा ।
श्रौतरुद्राक्षभस्मभ्यां विच्युतः पतितो भवेत् ।। 102

शैवव्रतानि कार्याणि तत्तत्कालेषु भक्तितः ।
शैवव्रतपरिभ्रष्टो भ्रष्ट एव भविष्यति ।। 103

दशशैवव्रतान्याहुर्जाबालश्रुतिपारगाः ।
तानि व्रतानि यत्नेन कार्याण्येव द्विजैः सदा ।। 104

प्रत्यष्टम्यां प्रयत्नेन कर्तव्यं नक्तभोजनम् ।
कालाष्टम्यां तु तत्त्याज्यं भोजनं यत्नपूर्वकम् ।। 105

अवश्यं सितभूतायां कर्तव्यं निशि भोजनम् ।
असितायां तु भूतायां तन्न कार्यं द्विजातिभिः ।। 106

एकादश्यां सितायां तु त्याज्यं भोजनमास्तिकैः ।
असितायां तु भोक्तव्यं नक्तमभ्यर्च्य शङ्करम् ॥ 107

त्रयोदश्यां तु भोक्तव्यं रात्रावेव प्रयत्नतः ।
शिवलिङ्गार्चनं कार्यं स्वशक्त्या यत्नपूर्वकम् ॥ 108

निशि यत्नेन कर्तव्यं भोजनं सोमवासरे ।
किमुतान्येषु दिवसेष्विति जाबालवादिनः ॥ 109

ससोमा सितभूता या सार्द्रापातसमन्विता ।
तस्यामुपोषणं कार्यं निशि जागरणं तथा ॥ 110

भोजनीयः प्रयत्नेन शैवः शक्तिपुरःसरम् ।
व्रतान्येतानि नियमात्कर्तव्यानि द्विजातिभिः ॥ 111

एतावन्तः शैवधर्माः शिवदीक्षेति गीयते ।
शैवमध्ये वस प्रीत्या शैवान्पोषय सर्वदा ॥ 112

शैवानेवार्चय प्रीत्या शैवानेव विलोकयेत् ।
शिवालयानि यत्नेन कारयस्व यथोचितम् ॥ 113

बहिर्बिल्ववनान्येव कारयस्व प्रयत्नतः ।
बिल्वपत्राणि सततं त्वमेवाहर सादरम् ॥ 114

आहृत्यबिल्वपत्राणि पूजयस्व सदासिवम् ।
अनभ्यर्च्य महादेवं मा मा भुङ्क्ष्व भ्रमादपि ॥ 115

शिवतीर्थमपीत्वापि मा मा भुङ्क्ष्व कदाचन ।
कुरु यत्नेन सततं महादेवनिरीक्षणम् ।। 116

कुरु यत्नेन सततं शिवमन्त्रजपं सदा ।
सर्वदा नीलकण्ठेति महादेवेति संवद ।। 117

हृदि शङ्करमाराध्यं ध्यात्वा संवस सर्वदा ।
रुद्राक्षभस्मना सम्यग्भूषयस्व स्वकं वपुः ।। 118

यदा पुत्रा भविष्यन्ति तदा तानखिलानपि ।
शिवनामाङ्कितानेव कुरु यत्नेन सादरम् ।। 119

तानप्यवश्यं सम्बोध्य शाम्भवान्कुरु सर्वदा ।
प्रत्यहं शिवपूजायां नियोजय नृपात्मजान् ।। 120

यदा तु फलदध्यादि भोक्तव्यं ते भविष्यति ।
तदा स्तोकं नमः सोमेत्यादि मन्त्रान्पठ क्रमात् ।। 121

'हावुहावुहावु' इत्यादि मन्त्रान्पठ ततः परम् ।
अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ।। 122

ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक् ।
इति वैदिकमन्त्रेण शिवपात्रं निवेदय ।। 123

शैवेभ्योऽप्यमुनान्नानि मनुनैव निवेदय ।
ततः परं तु तत्वायामीत्यादिमनुपञ्चकम् ।। 124

प्रत्येकं समनूद्यैव ततः प्राणाहुतिं कुरु ।
ततः परमुमाकान्तं कवले कवले स्मर ।। 125

मध्ये जलादिपानेऽपि स्मर साम्बं महेश्वरम् ।
स्मरन्हृदि महादेवं कुरु मौनेन भोजनम् ।। 126

वक्तव्यं यदि मध्ये स्यात्तदा शिवकथां वद ।
भुङ्क्ष्व शैवैः सहान्नानि पिब शैवैः सहामृतम् ।। 127

वस शैवैः सदा प्रीत्या यज शैवैः सहेश्वरम् ।
शृणु शैवकथां नित्यं घोरपातकनाशिनीम् ।। 128

वद शङ्कर सर्वेश महादेवेति सर्वदा ।
अयं द्विजातिमात्रस्य धर्मोऽत्र समुदीरितः ।। 129

ब्रह्मक्षत्रियवैश्यानामेष धर्मः सनातनः ।
शिवक्षेत्रमिदं ज्ञेयमरुणाचलनामकम् ।। 130

अरुणाचलनाथस्य त्रिकालं कुरु पूजनम् ।
अशैवानां शिवक्षेत्रे प्रवेशो न यथातथा ।। 131

कुरु दैवादागतांस्तान्प्राणैरेव वियोजय ।
वाजपेयफलं प्राप्यमशैवानां विनाशने ।। 132

शैवधर्मेषु सततं निष्णातो भव सर्वदा ।
त्र्यम्बकेति च मन्त्रेण जप साम्बं सदाशिवम् ।। 133

त्र्यम्बकेति च मन्त्रेण यः पूजयति शङ्करम् ।
स सर्वान् लभते कामानिति जाबालवादिनः ।। 134

त्र्यम्बकैकशरण्यांस्तान् साम्बकानिति मन्महे ।
निरम्बकान्मन्महे तांस्त्रियम्बकपराङ्मुखान् ।। 135

सदाशिव उवाच -

इत्युक्त्वा पूजितो राज्ञा गौतमः स्वाश्रमं ययौ ।
तदाप्रभृति मत्पूजानियतो बालकोऽप्यभूत् ।। 136

तत्पिता तं सुतं दृष्ट्वा कृतकृत्यममन्यत ।
स्वात्मानमपि भूपालः कृतकृत्यममन्यत ।। 137

ततस्तस्मिन्पुरे राज्यं निवेद्य स्वयमादरात् ।
गृहीत्वा शाम्भवीं दीक्षां तत्रैवोवास सन्ततम् ।। 138

तत्पुत्रस्याभवत्प्रीतिर्महादेवे मयि प्रिये ।
स नानादेशराजन्याज्जगृहे कन्यकाः शुभाः ।। 139

एवं गृहीत्वा वसतस्तस्य लक्षं मनोरमाः ।
जाया बभूवुरमले रूपलावण्यशोभिताः ।। 140

शिवाग्रे नर्तनायैताःपत्नीः सोऽयंन्ययोजयत् ।
नियोजिताःस्त्रियस्ताश्च चक्रुर्नर्तनमादरात् ।। 141

त्रिकालं नर्तनं कृत्वा पत्न्यस्ताः साधु शिक्षिताः ।
सम्पूज्य शङ्करं नित्यं मां याति सदनं प्रति ।। 142

गायन्ति ता ममैकाग्रे प्रतिवासरमम्बिके ।
एकैकस्यां पञ्च पञ्च पुत्रास्तस्याभवन्प्रिये ।। 143

मन्नामचिह्नितांश्चक्रे स पुत्रानखिलानपि ।
सर्वान् शाम्भवदीक्षायां न्ययोजयत् अथाम्बिके ।। 144

पुत्रास्तस्याभवन् सर्वे मदर्चनपरायणाः ।
शिवव्रतानि सततं तैः कृतानि प्रयत्नतः ।। 145

दृष्ट्वा तान्ब्रह्मविष्ण्वाद्या भीता एवाभवन् सदा ।
कदाचित्ते गताः पूर्वं विष्णुलोके नृपात्मजाः ।। 146

तदा विष्णुः समुत्थाय चक्रे तत्पूजनं मुदा ।
ब्रह्मलोकादिलोकेषु स्थितं तैस्तु कदाचन ।। 147

कदाचिद्भुवि ते स्थित्वा स्थितास्ते त्रिदशालये ।
तानिन्द्रः पूजयामास बृहस्पतिसमन्वितः ।। 148

कदाचित्ते गताः पूर्वं सत्यलोके नृपात्मजाः ।
तदा ब्रह्मा समुत्थाय चक्रे तत्पूजनं मुदा ।। 149

एवं समभवन्नेते बाला मत्पूजने रताः ।
मद्ध्यानमनसः सर्वे शैवव्रतपरायणाः ।। 150

तस्य पुत्रस्तु यो ज्येष्ठश्चन्द्रमौलिरिति श्रुतः ।
स ददर्श बहिर्ग्रामान्मृद्भालं ब्राह्मणं वने ।। 151

ततः परमशैवोऽयं मया दृष्ट इति प्रिये ।
ततोऽस्य यातना का व शाङ्करस्य भविष्यति ।। 152

इति विज्ञातुमनसा स ययावन्तकान्तकम् ।
ततस्तस्माद्गतं वीक्ष्य चन्द्रमौलिं नृपात्मजम् ।। 153

अभ्युत्थाय प्रयत्नेन चक्रे पूजां तदा यमः ।
ततः परं समानोतः समृद्भालो द्विजो भटैः ।। 154

तं वीक्ष्य कालस्तदनु चित्रगुप्तमुवाच च ।

यम उवाच -

किमनेन कृतं पापं तत्सर्वं वद तत्वतः ।। 155

यद्ययं घोरपापी स्याद्भुक्ता अत्रत्ययातनाः ।
इत्युक्तं तद्वचः श्रुत्वा चित्रगुप्तो विचक्षणः ।। 156

विचारपूर्वकं प्राह बचनं वाग्विशारदः ।

चित्रगुप्तः -

अधीतवेदशास्त्रोऽयं कृतयागश्च सादरम् ।। 157

एतादृशोऽप्यय भाले मृत्तिकां लेपयत्यतः ।
एतस्य नरकाद्घोरात्सर्वथा नास्ति निष्कृतिः ।। 158

अधीतवेदो विप्रोऽसौ मृत्तिकालिप्तभालकः ।
एतस्य नरके वासो भविष्यति न संशयः ।। 159

यातनास्वतिघोरासु प्रत्यहं पातयतामयम् ।
एतस्मिन्न दया कार्या पापे शङ्करदूषके ।। 160

ईश्वरः उवाच -

इत्युक्तं तद्वचः श्रुत्वा कालः कालानलोपमः ।
पातयामास तं सद्यो वह्निकुण्डादिषु क्रमात् ।। 161

स चन्द्रमौलिस्तं दृष्ट्वा पतितं नरकालये ।
हृष्टः स्वनगरं प्राप पूजितः सन्यमादिभिः ।। 162

चन्द्रमौलिर्विहारार्थं यदा याति वहिस्तदा ।
मृद्भालान्ब्राह्मणान् दृष्ट्वा ताडयामास चाशुगैः ।। 163

अशैवान्निहतान् श्रुत्वा तत्पिता हृष्टमानसः ।
तदा कृतार्थमात्मानममन्यत गिरीन्द्रजे ।। 164

शैवव्रतपरा जाताः पुत्राः सर्वे ममेदृशाः ।
इतोऽधिकं महद्भाग्यं कस्य वात्र भविष्यति ।। 165

एकोऽपि यदि यद्वंशे शाम्भवो भवति स्वतः ।
सोऽपीह सत्तमो वंशो यतः शाम्भववानयम् ।। 166

पञ्चलक्षममी पुत्रा मम सर्वेऽपि शाङ्करा: ।
अनल्पपुत्रभाग्यं च मया प्राप्तं शिवार्चनात् ।। 167

मासद्वयं बिल्वपत्रैः पूजितः पार्वतीपतिः ।
कथमेतादृशं भाग्यं ददौ मह्यमनामयम् ।। 168

यदि वत्सरमात्रं चेत्पूजितः शङ्करस्तदा ।
ददाति कीदृशं भाग्यं तन्न विज्ञायते मया ।। 169

कृपामृतमहाम्भोधिं शङ्करं लोकशङ्करम् ।
ये नार्चयन्ति ते मूढाः सत्यं सत्यं न संशयः ।। 170

शिवार्चनं महत्पुण्यमिहामुत्रार्थदं नृणाम् ।
कार्यं शिवार्चनं पुण्यंमिहामुत्रफलार्थिभिः ।। 171

जातिस्मरत्वं बहुपुत्रतां च
भूचक्रनाथत्वमखण्डितं च ।
मोक्षं च दातुं शिव एव शक्तः
सत्यं पुनः सत्यमिदं च सत्यम् ।। 172

कः शङ्करान्यो वितरेत भाग्यं
कः शङ्करान्यो वितरेत मोक्षम् ।
कः शङ्करान्यस्तनुते सुखानि
कः शङ्करान्यो विधिविष्णुसेव्यः ।। 173

यत्पादपद्मं निगमान्तवेद्यं
यत्पादपद्मं मुनिवृन्दवन्द्यम् ।
यत्पादपद्मं विधिविष्णुमृग्यं
तत्पादपद्मं शरणं व्रजामि ॥ 174

यत्पादपद्माम्बुजमादिविष्णुः
स्वनेत्रपद्मेन मनोहरेण ।
समर्चयामास तदर्चनेन
सौभाग्यमुक्ति सुलभेन लप्स्ये ॥ 175

यत्पादपद्माम्बुजरेणुमिष्टं
मुकुन्दचन्द्रेन्द्रचतुर्मुखाद्याः ।
समर्चयन्त्यन्वहमादरेण
तत्पादपद्मं शरणं व्रजामि ॥ 176

यन्नामसङ्कीर्तनमेकमेव
विनाशयत्याशु महाघसङ्घम् ।
तदेवमीशं शरणं व्रजामि
ब्रह्मेन्द्रविष्ण्वादिसुरैकवन्द्यम् ॥ 177

यन्नाममात्रोच्चरणेन सद्यो
धन्या भवन्त्येव हि पापिनोऽपि ।
तदेवमीशं शरणं .... ॥ 178

यन्नाम देहक्षयपूर्वकाले
स्मृतं ददात्येव हि मोक्षमेकम् ।
तदेवमीशं .... ॥ 179

यन्नामतत्वं न विधिर्विवेद
यन्नामतत्वं न विवेद विष्णुः ।
तदेवमीशं .... ॥ 180

यन्नामतत्वं न विवेद वेदो-
ऽप्यनन्तशाखः सकलस्वरूपः ।
तदेवमीशं .... ॥ 181

यन्नामसंसारसमुद्रमुद्रा-
विद्रावकं सर्वभयापहारि ।
तदेवमीशं .... ॥ 182

यन्नामदिव्यामृतपानसक्ता
निन्दन्ति देवानपि विष्णुमुख्यान् ।
तं देवमीशं .... ॥ 183

यन्नामपीयूषमपीय मूढा
भवन्ति संसारसमुद्रमग्नाः ।
तं देवमीशं .... ॥ 184

यन्नाम गोकोटिसहस्रकोटि-
प्रदानपुण्याधिकपुण्यपुण्यम् ।
तदेवमीशं .... ॥ 185

यन्नाम यागायुतकोटिकोटि-
सहस्रपुण्याधिकपुण्यपुण्यम् ।
तदेवमीशं .... ॥ 186

यन्नाम मत्तोन्नतदन्तिकोटि-
प्रदानपुण्याधिकपुण्यपुण्यम् ।
तदेवमीशं .... ॥ 187

यन्नाम रत्नोन्नतकोटिकोटि
तुलाप्रदानाधिकपुण्यपुण्यम् ।
तदेवमीशं .... ॥ 188

यन्नाम शुभ्रोत्तमवाजिकोटि-
प्रदानपुण्याधिकपुण्यपुण्यम् ।
तदेवमीशं .... ॥ 189

यन्नाम सन्तप्तसुवर्णकोटि-
कोटिप्रदानाधिकपुण्यपुण्यम् ।
तदेवमीशं .... ॥ 190

यन्नाम कन्याजनकोटिकोटि-
प्रदानपुण्याधिकपुण्यपुण्यम् ।
तदेवमीशं .... ॥ 191

यन्नाम सस्यावृतासर्वपृथ्वी-
प्रदानपुण्याधिकपुण्यपुण्यम् ।
तदेवमीशं .... ॥ 192

इत्युक्त्वा स ततः पुत्रान्सर्वानाहूय सादरम् ।
उवाच वचनं चारु स्वपुत्राणां हितावहम् ॥ 193

राजोवाच -

अर्चयध्वं महादेवं विष्णुब्रह्मादिवन्दितम् ॥ 194

त्रिकालमप्रमादेन बिल्वपत्रादिसाधनैः ।
भजध्वमप्रमादेन शिवं ब्रह्मादिवन्दितम् ॥ 195

जपध्वमनिशं यत्नाच्छैवं पञ्चाक्षरं परम् ॥ 196

उद्धूलनं त्रिपुण्ड्रं च तथा रुद्राक्षधारणम् ।
मा त्यजध्वं मा त्यजयध्वं निद्राकालेऽपि सर्वथा ॥ 197

शृणुध्वमतियत्नेन मोक्षदां शाम्भवीं कथाम् ।
शाम्भवैः सह सल्लापं कुरुध्वं भस्मभूषिताः ॥ 198

विशुद्धां शाम्भवीं दीक्षां पालयध्वं प्रयत्नतः ।
मया कार्या तपश्चर्या शिवमुद्दिश्य सन्ततम् ॥ 199

कुर्वन्तु सकलान्धर्मान्प्रजापालनपूर्वकम् ॥ 200

शिवः उवाच -

इत्युक्त्वा स्वसुतान् राजा स्नात्वा ब्रह्मसरोवरे ।
तपः कर्तुं समारेभे नियतो निर्जितेन्द्रियः ॥ 201

उद्धूलनत्रिपुण्ड्राभ्यां रुद्राक्षैश्च विभूषितः ।
शिवलिङ्गार्चनपरः शुशुभे नृपतिः शिवे ॥ 202

मल्लिङ्गपूजनं पुण्यं तप इत्युच्यते बुधैः ।
अतस्तदर्चने निष्ठा तस्य जाता वरानने ॥ 203

जलानि भक्षयित्वैव मासमात्रमुवास सः ।
ततो मासं जलाहारं चकार नियतेन्द्रियः ॥ 204

ततश्चक्रे निराहारं वत्सरत्रयमात्मवान् ।
तेनैव तपसा देवा बभूवुः क्षुभिता भृशम् ॥ 205

ततस्तस्य मनो द्रष्टुं विष्णुरूपं धृतं मया ।
धृत्वा च वैष्णवं रूपं ततस्तत्र गतं मया ॥ 206

वैनतेयसमारूढं शङ्खचक्रगदाधरम् ।
पीताम्बरधरं राजा मां दृष्ट्वाऽचलवत्स्थितः ।। 207

ततो वृणु वरं राजन्नित्युक्तं सादरं मया ।
ततो मां प्रत्युवाचेदं तद् वक्ष्ये शृणु सादरम् ।। 2

न भवन्तं वरं याचे न स्वतन्त्रोऽसि वै यतः ।
परन्तु सर्वदेवेशाद्वरं याचे महेश्वरात् ।। 209

आदिविष्णुर्भवान्पूर्वं यस्माज्जातो महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ।। 210

यतश्चतुर्मुखो जातो देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ।। 211

यस्मादिन्द्रादयो जाता दिक्पालाः श्रीमहेश्वरात् ।
तस्मादेव .... ।। 212

वेदा यस्मात्समुत्पन्ना देवदेवान्महेश्वरात् ।
[1] (यस्य निःश्वसितं वेदा देवदेवस्य शूलिनः ।।)
तस्मादेव वरं याचे .... ।। 213

---

1 वेदानां ईश्वरसमुत्पन्नत्वे तेषां स्वतःप्रमाण्यं भज्येत इति श्लोकः एवं परिवर्तितः ।

यस्मात्सूर्यः समुत्पन्नो देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे .... ॥ 214

यस्माच्चन्द्रः समुत्पन्नो देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे .... ॥ 215

यस्मादजायताकाशो देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 216

यस्माद्वायुः समुत्पन्नो देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 217

यस्मादग्निः समुत्पन्नो देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 218

यस्मादापः समुत्पन्ना देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 219

यस्मात्क्षोणी समुत्पन्ना देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 220

यस्मादेषधयो ज़ाता देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 221

यस्मादन्नं समुत्पन्नं देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 222

यस्माद्द्वीपाः समुत्पन्ना देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 223

यस्माद् द्विपादः सम्भूता देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 224

यस्माच्चतुष्पदा जाता देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 225

यस्मादिष्टपदो(?) जाता देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 226

यस्माद्वनानि जातानि देवदेवान्महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 227

यस्माद्गिरिवरा जाता देवदेवान्महेश्वात् ।
तस्मादेव वरं याचे ... ... ॥ 228

यस्यान्तं न विदुर्देवा भवदाद्याः पिनाकिनः ।
तस्मादेव वरं याचे ... ... ॥ 229

---

1 अत्रेयं श्रुतिः - तस्मादात्मन आकाशः सम्भूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । इत्यादिः ॥

यस्य स्वरूपं न ज्ञातं सर्वथा भवदादिभिः ।
तस्मादेव वरं याचे ... ... ॥ 230

यत्प्रसादेन विष्णुत्वं त्वया प्राप्तं पुरा हरे ।
तस्मादेव वरं याचे ... ... ॥ 231

ब्रह्मत्वं ब्रह्मणा प्राप्तं यत्प्रसादात्पुरा हरे ।
तस्मादेव वरं याचे ... ... ॥ 232

इन्द्रत्वं प्राप्तमिन्द्रेण यत्प्रसादात्पुरा हरे ।
तस्मादेव वरं याचे ... ... ॥ 233

वात्ययं वायुरनिशं यस्माद्भीतो महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 234

[1]सूर्योऽप्यहरहो नित्यं यस्माद्भीतो महेश्वरात् :
तस्मादेव वरं याचे ... ... ॥ 235

[2]उदेति वह्निश्चन्द्रश्च यस्माद्भीतो महेश्वरात् ।
तस्मादेव वरं याचे ... ... ॥ 236

---

1 "सूर्योऽप्युदेति यद्भीत्या " इति पाठः श्रुत्यर्थानुसारी भवेत् ।

2 "ज्वलत्यग्निश्च यद्भीत्या मृत्युश्चैव प्रधावति"। इति निगमानुगः पाठः कविहृदयानुसारी भवेत् ॥

यद्भक्तैर्भेदिताः शैला मन्दरप्रमुखाः पुरा ।
तस्मादेव वरं याचे ... ... ॥ 237

यद्भक्तैः क्षणमात्रेण समुद्राश्चुलुकीकृताः ।
तस्मादेव वरं याचे ... ... ॥ 238

यद्भक्तैः क्षणमात्रेण लोका व्यत्ययिताः पुरा ।
तस्मादेव वरं याचे ... ... ॥ 239

तृणीकृतोऽसि यद्भक्तैस्त्वमेव गरुडध्वज ।
तस्मादेव वरं याचे ... ... ॥ 240

तृणीकृतश्चतुर्वक्त्रो यद्भक्तैर्हंसवाहनः ।
तस्मादेव वरं याचे ... ... ॥ 241

तृणीकृतः शचीनाथो यद्भक्तैः स्वर्गनायकः ।
तस्मादेव वरं याचे ... ... ॥ 242

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
तस्मादेव वरं याचे ... ... ॥ 243

यद्दतं सत्परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
तस्मादेव वरं याचे ... ... ॥ 244

यदक्षरं विरूपाक्षमक्षय्यफलदायकम् ।
तस्मादेव वरं याचे ... ... ॥ 245

यदूर्ध्वरेतमनघं विश्वरूपमनामयम् ।
तस्मादेव वरं याचे ... ... ॥ 246

यो निर्गुणो निराकारो निरुपाधिर्निरञ्जनः ।
तस्मादेव वरं याचे ... ... ॥ 247

यस्सर्ववेदवेदान्तप्रतिपाद्यो महेश्वरः ।
तस्मादेव वरं याचे ... ... ॥ 248

यः सृजत्यवति स्वैरं हन्ति सर्वमिदं जगत् ।
तस्मादेव वरं याचे ... ... ॥ 249

त्वया स्वनेत्रपद्मेन पूजितं यत्पदाम्बुजम् ।
तस्मादेव वरं याचे ... ... ॥ 250

कन्दर्पदर्पं व्यदलद्यः स्वनेत्राग्निना हरः ।
तस्मादेव वरं याचे ... ... ॥ 251

यो व्यदारयदत्युग्रं नृसिंह्मं शरभाकृतिः ।
तस्मादेव वरं याचे ... ... ॥ 252

कण्ठे दधार यो हालाहलं लोकरिरक्षया ।
तस्मादेव वरं याचे ... ... ॥ 253

मधुसूदन यो देवो मधुसूदनसूदनः ।
तस्मादेव वरं याचे ... ... ॥ 254

यः स्वभक्तैकरक्षार्थं निजघानान्तकं पुरा ।
तस्मादेव वरं याचे ... ... ॥ 255

न यस्मात्परमो देवो यो ज्यायानणुरप्युत ।
तस्मादेव वरं याचे ... ... ॥ 256

यः सर्वदेवदेवेशो महादेवोऽखिलेश्वरः ।
तस्मादेव वरं याचे शङ्कराल्लोकशङ्करात् ॥ 257

त्वया मह्यं कथं देयो हरे स्वेष्टतमो वरः ।
महेशादपरः को वा भवेदिष्टवरप्रदः ॥ 258

वरो देय इति स्वैरं कथं धार्ष्ट्यं कृतं त्वया ।
अस्वतन्त्रेण भवता कथं देयो वरो मम ॥ 259

यथाऽहमस्वतन्त्रोऽस्मि तथा त्वमपि माधव ।
स्वतन्त्रस्तु महादेवः परतन्त्राः परेऽखिलाः ॥ 260

अस्वतन्त्रस्ततो मह्यं वरदाता कथं भवान् ।
त्वदधीनं तु यत्किञ्चिद्यदि तेऽस्ति तदीरय ॥ 261

पीताम्बरं जीर्णमेकं त्वदीयमिह तिष्ठति ।
गोविन्द तत्र मे नास्था जीर्णमुच्छिष्ठमेव तत् ॥ 262

त्वदधीनोऽस्ति गरुडः सोऽपि वृद्धोऽस्ति दुर्बलः ।
वैकुण्ठलोकवासस्तु त्वया दातुं न शक्यते ॥ 263

महेशानुग्रहादेव यतः प्राप्तस्त्वयाऽम्बुधिः ।
सुदर्शनमहाचक्रं त्वया दातुं न शक्यते ॥ 264

यत्कियत्कालापर्यन्तं स्थित्वा शङ्करमेष्यति ।
लक्ष्मीतोऽत्यधिकाः शुद्धाः सन्ति लक्षं स्त्रियो मम ॥ 265

ततो लक्ष्म्यां मम प्रीतिर्न स्वल्पाप्यस्ति सर्वथा ।
ये मोहवशगा लोके तेष्वेव भवता हरे ॥ 266

वरं दास्ये वरं दास्ये इति कार्या प्रतारणा ।
शाम्भवेषु व्रतस्थेषु मादृशेषु त्वया हरे ॥ 267

वरं दास्य इति स्वैरं नैव कार्या प्रतारणा ।
न तेऽस्ति वरदातृत्वमिति जानेऽहमच्युत ॥ 268

हरे वैकुण्ठलोके तेऽप्यधिकारो न शाश्वतः ।
शिवे रुष्टे तु विष्णुत्वमन्यस्मै दास्यते प्रभुः(?) ॥ 269

तथा चक्रं च विष्णुत्वं कस्मैचिद्दास्यतेप्रभुः(?) ।
बहवो विष्णवो जाता भविष्यन्ति तथा परे ॥ 270

असङ्ख्याता हताः पूर्वं महादेवेन विष्णवः ।
बहवोऽग्रेऽपि हन्तव्या विष्णवः शूलपाणिना ॥ 271

शिवमुद्दिश्य यो मर्त्यो विष्णुत्वप्राप्तये तपः ।
करिष्यति प्रयत्नेन विष्णुत्वं तेन लभ्यते ॥ 272

ब्रह्मत्वमप्येवमेव लभ्यते बहुभिर्हरे ।
अधिकारविशेषोऽयं विष्णुत्वं तेन चञ्चलम् ।। 273

अतोऽपि चञ्चले तस्मिन् प्रीतिं मा कुरु माधव ।
विष्णुत्वप्राप्तिमात्रेण गर्वश्चेदीदृशस्तव ।। 274

गाणपत्यस्य तु प्राप्त्या भूयान्गर्वो भविष्यति ।
गर्वं विहाय सततं पूजयस्व महेश्वरम् ।। 275

गर्वं न सहते शर्वः सर्वगर्वापहारकः ।
गाणपत्येच्छया शर्वं पूजयस्वेह माधव । 276

किमस्ति तव वैकुण्ठे विष्णुत्वे वा वदस्व मे ।
शिवार्चनेन सन्तुष्टो गाणपत्यं महेश्वरः ।। 277

तुभ्यं दास्यति गोविन्द सिद्धिक्षेत्रमिदं यतः ।
शिवो दास्यति मुक्तिं च शङ्करः करुणाकरः ।। 278

तिष्ठेह यद्वा गच्छेतस्त्वत्तः कार्यं न मे हरे ।
स्थातुमिच्छसि चेदत्र तदा मौनेन संवस ।। 279

श्रीमहादेव उवाच -

इत्युक्त्वा स नृपो देवि भस्म धृत्वा शिवार्चकः ।
मदेकशरणो भूत्वा मामभ्यर्च्य स्थितो मुदा ।। 280

तदा मदेकशरणं तं दृष्ट्वा नृपतिं शिवे ।
सन्तुष्टेन मया तस्मै स्वस्वरूपं प्रदर्शितम् ।। 281

अनन्तोद्यद्भानुकान्ति नानाभरणभूषितम् ।
मां विलोक्यातिसन्तुष्टस्तुष्टाव नृपतिः शिवे ।। 282

राजोवाच -

कृतार्थोऽस्मि महादेव कृतार्थोऽस्मि महेश्वर ।
कृतार्थोऽस्मि हरानन्त कृतार्थोऽस्मि शिवापते ।। 283

नमस्ते देवदेवाय नमस्ते शङ्करप्रभो ।
नमस्ते पार्वतीनाथ नमस्ते करुणाकर ।। 284

नमस्ते मुक्तिमन्दार नमस्ते भक्तवत्सल ।
नमस्ते शर्व सर्वेश नमस्ते पुरसूदन ।। 285

नमस्ते नीलकण्ठाय नमस्ते नीललोहित ।
नमस्ते भगवञ्छम्भो नमस्ते वृषभध्वज ।। 286

नमस्ते निर्गुणामेय नमस्ते सगुण प्रभो ।
नमस्ते निष्कल श्रीमन् नमस्ते शशिशेखर ।। 287

नमस्ते चन्द्रचूडाय नमस्ते भूतिभूषण ।
नमस्ते सर्पभूषाय नमस्ते शूलपाणये ।। 288

नमस्ते विश्वरूपाय नमस्ते विश्वचक्षुषे ।
नमस्ते विश्वगर्भाय नमस्ते विश्वबाहवे ॥ 289

नमोऽनन्तगुणाधार नमो विश्वम्भराय ते ।
नमःखट्वाङ्गहस्ताय नमस्ते परमात्मने ॥ 290

नमस्ते भूरिरूपाय नमस्ते भूरितेजसे ।
नमो विष्ण्वादिवन्द्याय नमस्ते सुरपूजित ॥ 291

नमस्ते देवदेवेश नमस्ते सुरसत्तम ।
नमस्ते अस्तु भगवन्नमो विश्वेश्वराय ते ॥ 292

महादेव नमस्तेऽस्तु त्रियम्बक नमोऽस्तु ते ।
नमस्त्रिकाग्निकालाय नमस्ते त्रिपुरान्तक ॥ 293

नमः कालाग्निरुद्राय महारुद्राय ते नमः ।
नमस्ते कालरुद्राय नमः सर्वेश्वराय ते ॥ 294

नमः परमरूपाय सदाशिव नमोनमः ।
नमः श्रीविश्वनाथाय विष्णुनेत्रार्चिताय ते ॥ 295

नमो वन्द्याय विश्वाय शाश्वताय नमोनमः ।
नमो वेदान्तवेद्याय निर्मलायामितात्मने ॥ 296

नमस्त्रिशूलहस्ताय कन्दर्पदलनाय ते ।
नमो डमरुहस्ताय विराड्रूपाय ते नमः ॥ 297

विदारितनृसिह्माय सन्दग्धमदनाय ते ।
हृतब्रह्मोत्तमाङ्गाय शम्भवे प्रभवे नमः ॥ 298

विश्वाकाराय विश्वाय नमस्ते बिश्वतस्त्विषे ।
विश्वभर्त्रे नमस्तुभ्यं नमस्ते विश्वमूर्तये ॥ 299

अनन्तविभव श्रीमन् अप्रमेयगुणार्णव ।
अपराधान्क्षमस्वेश करुणासागर प्रभो ॥ 300

धृत्वा रूपान्तरं पूर्वं स्थितं पूर्वं त्वया विभो ।
नार्चितोऽर्घ्यादिभिस्तत्र नापराधो मम प्रभो ॥ 301

सोमार्धशेखर श्रीमन् विश्वरूपस्त्वमस्यतः ।
विश्वरूपस्य ते पूजा कर्तुमेवं न शक्यते ॥ 302

विष्णुब्रह्मादिरूपाणि गृह्यन्ते शङ्कर त्वया ।
उमार्धविग्रहा मूर्तिः पूजनीया यथा द्विजैः ॥ 303

निर्गुणं निर्मलं साक्षाच्छिवलिङ्गं शिवात्मकम् ।
पूजनीयं प्रयत्नेन द्विजैर्वेदविदां वरैः ॥ 304

शिवात्मकं पूजनीयं लिङ्गमेव द्विजैः सदा ।
निधनेत्यादिभिर्मन्त्रैर्लिङ्गस्यप्रतिपादनात् ॥ 305

मूर्तिपूजापि चेत्कार्या मूर्तिः सोमार्धशेखरः ॥ 306

शिव उवाच -

इति स्तुत्वार्घ्यपाद्याद्यैर्मामभ्यर्च्य प्रयत्नतः ।
कृताञ्जलिपुटोऽतिष्ठद्विनयानतकन्धरः ।। 307

(अथावोचमहं देवि तं भूपं तुष्टमानसः) ।
वरं वृणीष्व राजेन्द्र वरमिष्टं ददाम्यहम् ।। 308

भक्त्या त्वव्यभिचारिण्या त्वयि प्रीतोऽस्मि भूपते ।
इत्युक्तं तद्वचः श्रुत्वा सम्पूज्यार्घ्यादिभिर्नृपः ।। 309

कृताञ्जलिपुटो भूत्वा ययाचे वरमुत्तमम् ।

राजोवाच -

महादेव कृपासिन्धो विष्णुब्रह्मादिवन्दित ।। 310

ममास्त्वचञ्चला भक्तिस्त्वय्येवाव्यभिचारिणी ।
महाप्रलयकालेऽपि शम्भो त्वत्पादपङ्कजात् ।। 311

मच्चित्तचञ्चरीकोऽयं मा यात्वन्यत्र सर्वथा ।
महापद्यपि घोरायां त्वदन्यं नार्चयाम्यहम् ।। 312

यथा त्वदन्यपूजायां मतिर्मे न भविष्यति ।
तथा कुरु महादेव प्रसादं मयि सर्वदा ।। 313

सदाशिव महेशेति नमोच्चारणतत्परा ।
रसनेयं ममास्त्वीश त्वत्प्रसादादहर्निशम् ।। 314

नित्यं त्रिपुण्ड्ररुद्राक्षधारणे प्रीतिरस्तु मे ।
त्वत्पादपद्मपूजायामस्तु प्रीतिरखण्डिता ॥ 315

प्रीतिरस्तु महादेव शिवलिङ्गैकपूजने ।
निवृत्तमस्तु मच्चित्तं पुत्रपौत्रादितः प्रभो ॥ 316

त्वत्पूजासाधनव्यग्रं चित्तमस्तु ममान्वहम् ।
शिवास्तु त्वत्कथामात्रश्रवणप्रवणं मनः ॥ 317

ममास्तु प्रीतिरनिशं त्वत्सेवायामुमापते ।

श्रीशिव उवाच -

इत्यनेके वरास्तेन वृता राज्ञा वरानने ॥ 318

दत्ताश्च ते वरास्तस्मै मया सर्वेऽपि मोक्षदाः ।
ततः परं स भूपालो मामभ्यर्च्य प्रयत्नतः ॥ 319

प्रणम्य बहुधा भक्त्या कृताञ्जलिपुटः स्थितः ।
ततः सर्वेषु पश्यत्सु तत्रैवान्तर्हितं मया ॥ 320

तदाप्रभृति राजापि मदेकशरणोऽभवत् ॥ 321

मत्पादपद्ममकरन्दरसाश्रयाणां
मामेव पूज्यतममित्यनुचिन्तकानाम् ।

सर्वार्थदं सकलदेवगणाभिवन्द्यं
विश्वेश्वरत्वमनुसेव्यमुमासहायम् ॥ 322

॥ इति श्रीशिवरहस्ये सप्तमांशे
शिवगौरीसंवादो नामैक-
विंशोऽध्यायः ॥

॥ द्वाविंशोऽध्यायः ॥

पार्वत्युवाच -

किं चकार स भूपालः करुणाकर शङ्कर ।
तत्सर्वं वद सर्वज्ञ विस्तरेण विशेषतः ॥ 1

सदाशिवः (उवाच) -

शिवपूजारतं दृष्ट्वा स भूपालो मदर्चकः ।
अभ्युत्थायातियत्नेन कुर्वन्नेव स्थितोऽर्चनम् ॥ 2

मदर्चने यथा प्रीतिस्तथा मद्भक्तपूजने ।
प्रीतिरासीन्नृपस्यास्य ममैवानुग्रहात्सदा ॥ 3

शैवानां पूजने श्रद्धा यथा तस्य स्थिता प्रिये ।
तथा नान्यस्य सुभगे सर्वकालेष्वखण्डिता ॥ 4

एकदा स नृपो देवि गौतमं शैवपुङ्गवम् ।
भस्मोद्धूलितसर्वाङ्गं ददर्श गृहमागतम् ॥ 5

तं दृष्ट्वाऽसौ समुत्थाय कृताञ्जलिपुटो नृपः ।
प्रददावासनं रम्यं नानारत्नविराजितम् ॥ 6

तत्रोपविष्टं शैवेन्द्रं गौतमं मुनिसेवितम् ।
अर्घ्यपाद्यादिभिः सम्यक्पूजयामास सादरम् ॥ 7

भस्मना बिल्वपत्रैश्च समलङ्कृत्य तं मुनिम् ।
उवाच वचनं राजा कृताञ्जलिपुटः शिवे ॥ 8

राजोवाच -

गौतमाद्यास्मि धन्योऽहं भावुकं भावि भूरिशः ।
त्वादृशानां तु शैवानां दर्शनं दुर्लभं मुने ॥ 9

माननीयोऽपि जातोहं त्वदागमनतो मुने ।
शिवार्चनव्रतस्थस्य तवात्रागमनं शुभम् ॥ 10

पूतं च सदनं सर्वं त्वदागमनतो मुने ।
त्वदङ्घ्रिजलसंसेकाद्भूरेषा पावनीकृता ॥
त्वत्पादसेचकास्तृप्ताः पितरः साग्नयः सुराः ॥ 11

अतः परं भविष्यन्ति कल्याणानि च भूरिशः ।
मयि स्नेहवशादेव त्वयाद्यात्रागतं मुने ॥ 12

अन्यथा शिवभक्तस्य तवाद्यागमनं कुतः ।
वद मोक्षप्रदान् धर्मान्वर्णानामविशेषतः ।। 13

यद्धर्मश्रवणेनापि पापनाशो भविष्यति ।

शिव उवाच -

इत्युक्त्वा संस्थितो राजा तदानीमेव तत्सुताः ।। 14

पञ्चलक्षमिता देवि गौतमं द्रष्टुमागताः ।
गौतमः शाम्भवान् दृष्ट्वा तत्पुत्रानतिविस्मितः ।। 15

अद्य धन्योऽहमस्मीति ववन्दे स कृताञ्जलिः ।
दृष्टा हि भूरिभाग्येन शाम्भवा बहवो मया ।। 16

शाम्भवप्रेक्षणाज्जातं धन्यमद्य वरं दिनम् ।
प्रणतं तं मुनिं दृष्ट्वा स्वपुत्रेषु ततो नृपः ।। 17

कम्पमानः समुत्थाप्य बभाषे वचनं शिवे ।

राजोवाच -

स्वामिन्मत्तनयाः सर्वे शिष्यप्रायास्तव ध्रुवम् ।। 18

एतादृशेषु प्रणतिस्त्वया कार्या न सर्वथा ।

गौतमः -

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वान्येऽपि वा नृप ।। 19

शाम्भवा यदि तेस वें पूजनीयाः प्रयत्नतः ।
दुर्लभं शङ्करस्यैव शाङ्करस्यापि दर्शनम् ।। 20

शाङ्कराः शङ्करस्यैव प्रियाः पारिषदाः खलु ।
चण्डालोऽप्यर्चनीयः स्याच्छिवार्चनपरो यदि ।। 21

किमुतान्ये ब्राह्मणाद्याः शिवाराधनतत्पराः ।
चण्डालोऽप्युत्तमो विप्रादशैवाच्छिवपूजकः ।। 22

शिवार्चपरादन्यः को वा श्रेष्ठो भविष्यति ।
अशैवोऽधीतवेदोऽपि प्राप्नोति यमयातनाम् ।। 23

अन्त्यजोऽपि शिवाचारो न प्राप्नोत्येव यातनाम् ।
शिवाचाररतः शूद्रोऽप्युत्तमो भवति ध्रुवम् ।। 24

शैवाः सम्माननार्हाः स्युः सर्वदा सर्वदेहिनाम् ।
प्रीतो भवति गौरीशः शैवानां पूजया प्रभुः ।। 25

अयं तु परमो धर्मः शैवानां पूजनं नृप ।
वर्णानां परमो धर्मः शङ्करस्यार्चनं परम् ।। 26

द्विजानां तु विशेषेण शिवस्यैवार्चनं नृप ।
धर्मोऽस्त्यत्र न सन्देहः सत्यं सत्यं वदाम्यहम् ।। 27

धर्मार्थकाममोक्षास्तु न विना शङ्करार्चनम् ।
यत्फलं प्राप्यते राजन्महादेवस्य पूजया ।। 28

तत्फलं नैव सम्प्राप्यमश्वमेधादिभिः सदा ।
पुरा देवाः सगन्धर्वा ऋषयश्च मुमुक्षवः ।। 29

हिमवद्गिरिमाश्रित्य स्थितास्तत्वबुभुत्सवः ।
तदाविष्णुं सुखासीनमृषयो ब्रह्मवादिनः ।। 30

राजन्प्रणम्य पप्रच्छुर्विनयानतकन्धराः ।

ऋषय ऊचुः -

धर्मार्थकाममोक्षाणां कः कर्ता कश्च तत्प्रदः ।। 31

एतत्सर्वं विशेषेण वद माधव सादरम् ।

विष्णुरुवाच -

धर्मार्थकाममोक्षाणामधिपोऽहं मुनीश्वराः। । 32

मत्तः परतमो नास्तीत्यब्रवीन्मोहतो हरिः ।
इति तद्वचनं श्रुत्वा बभाषे वचनं विधिः ।। 33

धर्मार्थकाममोक्षाणामहं कर्तेति भूपते ।
इति तद्वचनं श्रुत्वा तमूचुर्मुनिपुङ्गवाः ।। 34

विष्णुं च मोहवशगं दृष्ट्वा शङ्करमायया ।
विधे विष्णुवदन्यत्र त्वयान्यत्समुदीर्यते ।। 35

एवं सति कथं ज्ञेयं तत्वमस्माभिरीदृशैः ।
सर्वैकवाक्यता यत्र तत्र तत्वविनिश्चयः ।। 36

नान्यत्र सर्वथा ब्रह्मन्नूनं तत्वविनिर्णयः ।
वाक्यमेतद्विरुद्धार्थप्रतिपादकमीदृशम् ।। 37

तत्वनिर्णायकं भूयात्कथं वा तद्वदाधुना ।
इति तद्वचनं श्रुत्वा ब्रह्मा भ्रूकुटिलाननः ।। 38

बभाषे वचनं भूयः शिवमायाविमोहितः ।

ब्रह्मोवाच -

मन्मायामोहितो विष्णुस्तथा वदति सत्वरम् ।। 39

अत एव हि तद्वाक्यमप्रमाणं न संशयः ।
स्रष्टाहं सर्वलोकानां पालकश्च न संशयः ।। 40

संहारकश्च लोकानामहमेव मुनीश्वराः ।
नास्ति मत्सदृशो देवस्ततः पूज्योऽहमन्वहम् ।। 41

धर्मार्थकाममोक्षाणां प्रदाता चाहमेव हि ।
इति तद्वचनं श्रुत्वा मुनयो विस्मयं गताः ।। 42

प्रमाणत्वेन ते सर्वे वेदानेव ततः परम् ।
ततो वेदाः समागत्य सर्वे मूर्तिधराः स्थिताः ।। 43

सन्तोषं परमं प्रापुर्वेदान्दृष्ट्वा मुनीश्वराः ।
नत्वा वेदांस्ततः सर्वे मुनयो ब्रह्मवादिनः ।। 44

पूजां चक्रुर्यथायोग्यं वेदानां भूमिनायक ।
वेदानूचुस्ततो राजन्मुनयो ब्रह्मवादिनः ।। 45

को वा पूज्यतमो देवस्तं वदन्त्विति सादरम् ।
प्रज्वाल्य पावकं सम्यगृग्वेदः प्रथमं ततः ।। 46

सव्यं भुजं समुद्धृत्य तत्वमाह नृपोत्तम ।। 47

ऋग्वेद उवाच -

सोमस्त्रिणेत्रो जनिता .... दिवः ।
पृथिव्याश्च तथानिलाग्नयोः ।।

सूर्येन्द्रयो रश्मिमरुद्गणानां
सोमस्त्रिणेत्रो जनिता च विष्णोः ।
तस्मात्स विष्णोर्जनिता महेशः
सर्वप्रयत्नैः सततं भवद्भिः ।। 43

सेव्यः स सोमः स च मुक्तिदाता
स एव मोक्षाधिपतिश्च सत्यम् ।
तस्मान्महेशादपरं न जाने
मुक्त्यर्थिसेव्यं सुरवृन्दवन्द्यम् ।। 49

तस्मान्महेशं शरणं व्रजध्वं
सत्यं पुनः सत्यमिदं त्रिसत्यम् ।
स्वर्गापवर्गादिफलप्रदाता
महेश्वरान्यत्र न सर्वथैव ॥ 50

असारसंसारसमुद्रमग्ना
न सर्वथा ते शिवभक्तिभाजः ।
तस्मान्महेशादपरं न जाने
मुक्त्यर्थिसेव्यं सुरवृन्दवन्द्यम् ॥ 51

न शङ्करान्यः करुणानिधानं
न शङ्करान्योऽखिलवेदवेद्यः ।
तस्मान्महेशा .... ॥ 52

ये पूजयन्त्यन्वहमम्बिकेशं
ते गर्भभाजो न भवन्ति भूयः ।
तस्मान्महेश .... ॥ 53

येषामनन्यं चरमं शरीरं
तेषां शिवे भक्तिरुदेति नित्यम् ।
तस्मान्महेश .... ॥ 54

यन्माययायं विधिरद्य मोहितो
यन्मायया विष्णुरयं च मोहितः ।

तमेव भस्माङ्कितसर्वगात्रा

भजध्वमद्यप्रभृति त्रिणेत्रम् ।। 55

संसारपाशौघविनाशहेतुं

गुणौघसेतुं मुनिमुक्तिहेतुम् ।

श्रीपार्वतीनाथमनन्यभाजो ....

भजध्वमद्यप्रभृति त्रिणेत्रम् ।। 56

यत्पादपद्मार्चनमात्रलभ्यो

मोक्षः समस्तैरपि दुर्लभोऽपि ।

श्रीपार्वतीनाथमनन्यभाजो

भजध्वमद्यप्रभति त्रिणेत्रम् ।। 57

भजन्ति मोहेन शिवान्यमन्ये

सदा महापातकसङ्गदुष्टाः ।

भजन्ति धन्याः शिवमेकमीशं

विश्वाधिकः शङ्कर एव सत्यम् ।। 58

सत्यं ब्रवीमि ध्रुवमद्य सत्यं

सत्यं ब्रवीमि ध्रुवमद्य सत्यम् ।

रुद्राधिकत्वं प्रतिपादयामि

देवो न रुद्रादधिको ऽस्ति कश्चित् ।। 59

रुद्रस्य पुत्रः स हरिः स रुद्रा-
दाप्तः कथं स्यादधिकस्य पुत्रः ।
पुत्रः पितुः सेवक एव (नित्यं)
सोमस्त्रिणेत्रोऽस्य यतः पितास्य ॥ 60

यजुर्वेद उवाच -

अणोरणीयान्महतो महीया-
नात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशम् ॥ 61

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं वदाम्यहम् ॥ 62

हिरण्यबाहुमीशानं हिरण्यपतिमव्ययम् ।
भस्म धृत्वा ललाटादौ भजध्वं वृषभध्वजम् ॥ 63

अम्बिकापतिमव्यक्तमुमापतिमनामयम् ।
भस्म धृत्वा .... ॥ 64

रुद्रं पशुपतिं स्थाणुमाद्यन्तरहितं शिवम् ।
भस्म धृत्वा .... ॥ 65

अनन्तमप्रतीकारमपरावृत्ततेजसम् ।
भस्म धृत्वा .... ॥ 66

आनन्दमयमीशानमद्वैतं निष्कलं प्रभुम् ।
भस्म धृत्वा .... ॥ 67

निर्गुणं निर्मलं शुद्धं निरवद्यं निरञ्जनम् ।
भस्म धृत्वा .... ॥ 68

शान्तं प्रसन्नवदनमुमासंश्लिष्टविग्रहम् ।
भस्म धृत्वा ललाटादौ भजध्वं वृषभध्वजम् ॥ 69

उग्रं भीमं भवं शर्वं भक्तसर्वप्रदं हरम् ।
भस्म धृत्वा .... ॥ 70

महेशं शङ्करं शम्भुं शरणागतवत्सलम् ।
भस्म धृत्वा .... ॥ 71

भगवन्तमुमाकान्तमनन्तमपराजितम् ।
भस्म धृत्वा .... ॥ 72

विश्वेश्वरं महादेवं त्रियम्बकमजं शिवम् ।
भस्म धृत्वा .... ॥ 73

त्रिपुरान्तकमाराध्यमाराधकवरप्रदम् ।
भस्म धृत्वा .... ॥ 74

त्रिकाग्निकालं साकारं निराकारं सुमङ्गलम् ।
भस्म धृत्वा .... ॥ 75

कालाग्निरुद्रं कामारिं कालकूटविषादनम् ।
भस्म धृत्वा ... ... ॥ 76

नीलकण्ठं भस्मभूषं सर्वेश्वरमकल्मषम् ।
भस्म धृत्वा ... ... ॥ 77

सदाशिव शिवाकारं महादेवमुमापतिम् ।
भस्म धृत्वा .... ॥ 78

ईशानं सर्वविद्यानां सर्वविद्याप्रदं सदा ।
भस्म धृत्वा .... ॥ 79

ईश्वरं सर्वभूतानां ब्रह्माधिपतिमक्षयम् ।
भस्म धृत्वा .... ॥ 80

ब्रह्मणोऽधिपतिं देव परब्रह्म शिवात्मकम् ।
भस्म धृत्वा .... ॥ 81

विश्वतश्चक्षुषं देवं विश्वतोमुखमव्ययम् ।
भस्म धृत्वा .... ॥ 82

विश्वतो बाहुमव्यक्तं विश्वतःपादमक्षरम् ।
भस्म धृत्वा .... ॥ 83

समस्तहेतुमाशास्यं सोमं सोमार्धशेखरम् ।
भस्म धृत्वा .... ॥ 84

भजध्वं श्रीमहादेवं चतुर्वर्गफलप्रदम् ।
हरिं हरन्तं श्रीरुद्रं विश्वस्येशानमव्ययम् ॥ 85

भजध्वं मुनयो नित्यं त्यक्त्वान्यामरपूजनम् ।
भ्रमं त्यक्त्वा भवन्तस्तु भवानीरमणं प्रभुम् ॥ 86

भगवन्तं भवारातिं भजध्वमभयप्रदम् ॥ 87

सामवेद उवाच -

नमो भवाय रुद्राय मोहनाय नमो नमः ।
मार्गीहिमाय शुद्धाय धुन्वते च नमो नमः ॥ 88

नमो नमस्तापसाय तापसेशाय वै नमः ।
नमो नमो विशालाय श्रीपुनर्वसवे नमः ॥ 89

नमः शिवाय पाराय सुपाराय नमो नमः ।
महापाराय पार्याय पारदाय नमो नमः ॥ 90

धुन्वते पारविन्दाय पुरुषाय नमो नमः ।
नमः सुपुरुषार्थाय श्रीमहापुरुषाय च ॥ 91

नमोऽन्नायान्नपतये एकाक्षायामितेक्षिणे ।
नमः प्रतिपदायापि नमः प्रतरिणे सदा ॥ 92

नमस्त्रियम्वकायापि नमस्तस्मै कपर्दिने ।
नमो ब्रह्माधिपतये श्रीविष्णुपतये नमः ॥ 93

नमोऽखिलाधिपतये विरूपाक्षाय सुन्वते ।
एक एव महारुद्रः सर्वदेवोत्तमो नमः ॥ 94

न तस्मादधिकः कोऽपि सत्यमेवोच्यते मया ।
न यस्मादधिको देवो देवदेवान्महेश्वरात् ॥ 95

स एव सर्वदा सेव्यः श्रीरुद्रो विश्वशासकः ।
विष्णुमुख्याः सुराः सर्वे शङ्करस्यैव किङ्कराः ॥ 96

इन्द्रोपेन्द्रप्रभृतयः सर्वे शङ्करकिङ्कराः ।
शिवमेवाधिकं मन्ये देवदेवोत्तमं प्रभुम् ॥ 97

देवोत्तमान्महादेवात्कोऽपि नास्त्यधिकः सुराः ।
देवोत्तमो महादेवः सर्वदेवनमस्कृतः ॥ 98

सत्यमेतत्पुनः सत्यं सत्यमेतन्न संशयः ।
शिवः कल्याणनिलयः सर्वदेवशिखामणिः ॥ 99

सत्यमेतत्पुनः .... ।
शिव एव सदा पूज्यो भुक्तिमुक्तिफलेप्सुभिः ॥ 100

सत्यमेतत्पुनः .... ।
सृष्टिस्थितिविनाशानां शिव एव हि कारणम् ॥ 101

सत्यमेतत्पुनः .... ।
तस्मै मया नमस्काराः कृताः पूर्वमघापहाः ॥ 102

सर्वव्यापीति यो ज्ञेयः सोऽनन्त इति मन्महे ।
योऽनन्त इति विज्ञेयस्स तार इति मन्महे ॥ 103

यत्तारमिति विज्ञेयं तत्सूक्ष्ममिति गीयते ।
यत्सूक्ष्ममिति विज्ञेयं तच्छुक्लमिति मन्यताम् ॥ 104

यच्छुक्लमिति विज्ञेयं तद्धि वैद्युतमेव हि ।
यद्वैद्युतं तदेवैकं परब्रह्मेति मन्यताम् ॥ 105

स एकः सर्वभूतात्मा स एको रुद्र उच्यते ।
स ईशानः स भगवान्स महेश्वर उच्यते ॥ 106

स महादेव एवेशः स सदाशिव ईर्यते ।
अद्वितीयो विभुः श्रेष्ठः स एको रुद्र उच्यते ॥ 107

रुद्रस्त्रियम्बको नान्यो रुद्र इत्यभिधीयते ।
सर्वव्यापी त्रिणयनस्तस्मादीशान उच्यते ॥ 108

स पश्यत्यखिलाण्डानि स्वात्मसृष्टानि सर्वशः ।
सृष्टानि चाखिलाण्डानि स्वयमेषोऽवति प्रभुः ॥ 109

लोकान्सङ्क्षपयते सर्वान्कल्पान्ते स्वेच्छया शिवः ।
शिवोऽयं विश्वतश्चक्षुः शिवोऽयं विश्वतोमुखः ॥ 110

शिवोऽयं विश्वतोबाहुर्विश्वतस्मान्महेश्वरः ।
ततः सर्वं परित्यज्य पूजयन्तु महेश्वरम् ॥ 111

गौतम उवाच -

इति मूर्तीभूय वेदैरुक्तानि वचनानि ते ।
श्रुत्वा सन्तोषमापन्ना मुनयः शौनकादयः ॥ 112

तदानीमभवद्राजन्नाविर्भूताऽशरीरवाक् ।
तामेव वाचं वक्ष्यामि श्रृणु पापविनाशिनीम् ॥ 113

मुनयः सत्यमेवोक्तं वेदैः सर्वैरकृत्रिमैः ।
शिवान्यो नाधिकः कोऽपि सत्यं सत्यं न संशय ॥ 114

शिवादन्योऽधिको नास्ति शिवेन सदृशोऽथवा ।
भगवन्तमुमाकान्तं भाग्यवन्तो भजन्त्यतः ॥ 115

भवन्तोऽपि भजन्त्वीशमनिशं शशिशेखरम् ।
यन्मायया मोहितोऽयं विष्णुर्ब्रह्माप्ययं द्विजाः ॥ 116

तमेव देवदेवेशं भजध्वं वृषभध्वजम् ।

गौतम उवाच -

एवमानन्ददा सजन् श्रुता तैरशरीरवाक् ॥ 117

सन्तोषं परमं प्रापुर्मुनयो ब्रह्मवित्तमाः ।
शिवमायाविनिर्मुक्तो विष्णुश्च तदनन्तरम् ॥ 118

ऋषीन्देवान्पुरस्कृत्य बभाषे वचनं नृप ।

विष्णुरुवाच -

मोहितोऽहं महादेवमायया ऽवार्यया पुरा ।। 119

पूज्योऽहं मुक्तिदाता चेत्युक्तमज्ञानतो मया ।
उन्मत्तवत्प्रलपितं महामायाप्रभावतः ।। 120

तद्विस्मरन्तु मुनयो यदज्ञानान्मयोदितम् ।
ग्रस्ताश्च सन्निपातेन प्रलपन्ति जनाः स्वयम् ।। 121

तथ मया प्रलपितं मोहितेनेशमायया ।
यं यं माहेश्वरी माया मोहयिष्यति मोहिनी ।। 122

तमुन्मत्तं विजानीत प्रलपन्तं यथेच्छया ।
शिव एव महादेवो देवदेवोत्तमः प्रभुः ।। 123

शिव एव ममाराध्यः शिव एव धनं मम ।
शिव एव मम स्वामी शिव एव प्रभुर्मम ।। 124

शिव एव हि निक्षेपः शिव एव हि जीवनम् ।
शिव एव हि कल्याणं शिव एव हि भूषणम् ।। 125

शिव एव ममाशास्यः शिव एव परा गतिः ।
शिव एव ममाभ्यर्च्यः शिव एव ममेष्टदः ।। 126

श्रृणोम्यहं शिवकथां शिवमेवार्चयाम्यहम् ।
पश्यामि च जगत्सर्वं शिवरूपं चराचरम् ॥ 127

सर्वपापहरं पुण्यं शिवनाम जपाम्यहम् ।
यमाहुः पार्वतीनाथं वेदास्तमहमीश्वरम् ॥ 128

पूजयाम्यतियत्नेन प्रणमामि च सर्वदा ।
यमाहुः श्रीविरूपाक्षं वेदास्तमहमीश्वरम् ॥ 129

पूजयाम्यतियत्नेन .... ।
यमाहुर्जगतामीश वेदास्तमहमीश्वरम् ॥ 130

पूजयाम्यतियत्नेन .... ।
यमाहुः परमेशानं वेदास्तमहमीश्वरम् ॥ 131

पूजयाम्यति .... ।
यमाहुः शम्भुमनघं वेदास्तमहमीश्वरम् ॥ 132

पूजयाम्यति .... ।
यमाहुस्तारकं ब्रह्म वेदास्तमहमीश्वरम् ॥ 133

पूजयाम्यति .... ।
यमाहुस्सर्वकर्तारं वेदास्तमहमीश्वरम् ॥ 134

पूजयाम्यतियत्नेन ... ... ।
यमाहुर्निष्प्रतिद्वन्द्वं वेदास्तमहमीश्वरम् ॥ 135

पूजयाम्यतियत्नेन ... ... ।
यमाहुर्यज्ञफलदं वेदास्तमहमीश्वरम् ।। 136

पूजयाम्यति ... ... ।
यमाहुर्ज्ञानदातारं वेदास्तमहमीश्वरम् ।। 137

पूजयाम्यति ... ... ।
यमाहुः शिवमद्वैतं वेदास्तमहमीश्वरम् ।। 138

पूजयाम्यति ... ... ।
यमाहुर्निर्गुणं शान्तं वेदास्तमहमीश्वरम् ।। 139

पूजयाम्यति ... ... ।
यमाहुर्निष्क्रियं शुद्धं वेदास्तमहमीश्वरम् ।। 140

पूजयाम्यति ... ... ।
यमाहुर्निष्कलं नित्यं वेदास्तमहमीश्वरम् ।। 141

पूजयाम्यति ... ... ।
यमाहुर्मृत्युहन्तारं वेदास्तमहमीश्वरम् ।। 142

पूजयाम्यतियत्नेन प्रणमामि च सर्वदा ।

गौतम उवाच -

इति विष्णुवचः श्रुत्वा ते सर्वे मुनयो नृप ।। 143

प्रमोदं परमं प्रापुस्तदा लब्धधना इव ।

ब्रह्मोवाच -

महेश्वरमहामायामोहितेन मया पुरा ॥ 144

पूज्योऽहं मुक्तिदश्चेति स्वयं मोहादुदीरितम् ।
पूज्यस्तु शिव एवेति ज्ञाततत्वेन यन्मया ॥ 145

कथितं निखिलं पूर्वं तत्तु मोहफलं द्विजाः ।
इदानीं ज्ञाततत्वोऽहं शिवैकशरणोऽस्म्यहम् ॥ 146

शिवमायामोहितेन यद्यदाचरितं मया ।
तत्क्षमध्वं मुनिश्रेष्ठा मनोवाक्कायकर्मभिः (जम्) ॥ 147

पूज्यः सर्वोत्तमो देवः शिव एव न चापरः ।
पूज्यश्च सर्वथा देवः शिव एव मुमुक्षुभिः ॥ 148

मन्यन्ते शिवमद्वैतं चतुर्थं ब्रह्मवादिनः ।
स एव परमात्माऽतो विजिज्ञास्यो मुमुक्षुभिः ॥ 149

सर्वव्यापी सर्वरूपः परमात्मा सदाशिवः ।
स एव सर्वदा पूज्यो मुमुक्षुभिरनेकधा ॥ 150

यमाहुरक्षरं वेदाः सर्वदेवशिखामणिम् ।
स एव सर्वदा पूज्यो मुमुक्षुभिरनेकधा ॥ 151

यमाहुः सर्वगं वेदाः सर्वदेवशिखामणिम् ।
स एव सर्वदा पूज्यो .... ॥ 152

शिवाभिधं परं ब्रह्म सेवनीयं प्रयत्नतः ।
पार्वतीसहितो नित्यं ध्यातव्यः श्रीमहेश्वरः ।। 153

पूजनीयो लिङ्गरूपी त्र्यम्बकस्त्रिपुरान्तकः ।
जप्तव्यश्च मनुः शैवः पञ्चाक्षरमयो नृभिः ।। 154

यमाहुः प्रणवाकारं वेदा देवशिखामणिम् ।
स एव सर्वदा पूज्यो मुमुक्षुभिरीश्वरः ।। 155

मुक्तिर्हस्तगता नृणां यस्य देवस्य पूजनात् ।
स एव सर्वदा पूज्यो मुमुक्षुभिरीश्वरः ।। 156

गौतम उवाच -

इत्युदीरितमाकर्ण्य ब्रह्मणो वचनं द्विजाः ।
स्वात्मानं मेनिरे सर्वे कृतार्थं नृपसत्तम ।। 157

ततः परं मुनिश्रेष्ठाः शिवमेव सुरोत्तमम् ।
मत्वा पूज्यतमं नित्यं पूजयामासुरन्वहम् ।। 158

देवोत्तम महादेव शङ्करोमापते शिव ।
नीलकण्ठेति सततं वदन्तः संस्थिताः सुराः ।। 159

तस्मात्सर्वप्रयत्नेन सर्वं सन्त्यज्य शङ्करम् ।
संपूजयातियत्नेन चतुर्वर्गफलप्रदम् ।। 160

राजन् किं बहुनोक्तेन सत्यमेकं वचः शृणु ।
ब्रह्मक्षत्रियवैश्यानां वेदमार्गानुवर्तिनाम् ।। 161

शिव एव सदापूज्यो ध्येयः स्वाभीष्टसिद्धये ।
यस्योपनयनं राजन्स एव द्विज उच्यते ।। 162

विभूतिधारणं कृत्वा कर्म कुर्याच्च वैदिकम् ।
गायत्रीमूलमेवाहुर्ब्रह्मण्यं मुनिपुङ्गवाः ।। 163

उपदेशस्तु गायत्र्या न कार्यो भस्मना विना ।
तस्माद्भस्मविहीनस्य ब्रह्मण्यं नास्ति सर्वथा ।। 164

शिवव्रतेषु यस्यास्ति प्रीतिः साहजिकी नृप ।
स तरत्येव सहसा घोरं संसारसागरम् ।। 165

राजोवाच -

भगवन्मुनिशार्दूल व्रतमेकं वदस्व मे ।
साङ्गे यस्मिन्व्रते चीर्णे सर्वान्कामानवाप्नुयाम् ।। 166

गौतम उवाच -

उमामहेश्वरं नाम किञ्चिदस्ति व्रतोत्तमम् ।
साङ्गे तस्मिन्व्रते चीर्णे कामः सर्वोऽप्यवाप्यते ।। 167

मासि भाद्रपदे शुक्ले पूर्णिमायां प्रयत्नतः ।
तद्व्रतं कार्यमनघैर्ब्राह्मणाद्यैर्विधानतः ।। 168

भाद्रशुक्लचतुर्दश्यां प्रातः स्नात्वा विधानतः ।
शिवं सम्पूज्य यत्नेन शैवानप्यतियत्नतः ।। 169

शिवं ध्यात्वा जगद्वन्द्यं सोमं सोमार्धशेखरम् ।
कृताञ्जलिपुटो भूत्वा मन्त्रमेनं पठेत्ततः ।। 170

श्वः करिष्ये व्रतं यत्नादुमामाहेश्वराभिधम् ।
आज्ञां देहि महादेव सोमसोमार्धशेखर ।। 171

इति विज्ञाप्य देवाय पुनः सम्पूज्य यत्नतः ।
मध्याह्नेऽपि महादेवमर्चयन्नियतो व्रती ।। 172

ततो देवानृषीन्सर्वानभ्यर्च्य विधिवन्नृप ।
हविष्याशी शिवं सायं पूजयेद्विधिपूर्वकम् ।। 173

निद्रा कार्या यथायोगं यथाशास्त्रं यथाक्रमम् ।
निद्रा कार्या यथायोगं महादेवस्य सन्निधौ ।। 174

उत्थाय पश्चिमे यामे महादेवं स्मरेत्ततः ।
ततः शौचादिकं सर्वं निर्वर्त्य प्रीतमानसः ।। 175

परिधाय ततो वस्त्रं क्षालितं शुभ्रमक्षतम् ।
उद्धूलनं ततः कार्यं त्रिपुण्ड्रं च यथाक्रमम् ।। 176

रुद्राक्षधारणं कार्यं सन्ध्या कार्या ततः परम् ।
ततः शिवार्चनं कार्यं विल्वपत्रादिभिर्नवैः ॥ 177

ततो होमश्च कर्तव्यः शिवप्रीत्यर्थमादरात् ।
ततः परं नियमतः प्रणमेत्साम्बमव्ययम् ॥ 178

देशकालौ च सङ्कीर्त्य स्नात्वा विधिवदादरात् ।
अथ पञ्चदशग्रन्थिदोरकं कुसुमान्वितम् ॥ 179

सम्पादनीयं यत्नेन व्रतनिष्ठैरनाकुलैः ।
उमामहेश्वराकारं सौवर्णं प्रतिमाद्वयम् ॥ 180

सम्पादनीयं यत्नेन राजतं वा मनोहरम् ।
पलादूनं न कर्तव्यं प्रतिमाद्वयमुत्तमम् ॥ 181

अधिकं चेद्यथाशक्ति कर्तव्यमतियत्नतः ।
सौवर्णो राजतो वापि ताम्रो वा कलशो नवः ॥ 182

सम्पादनीयो यत्नेन प्रयतैर्व्रततत्परैः ।
ततः सदर्भपुञ्जीले वस्त्रयुग्माश्चिते शुभे ॥ 183

पृथक् पृथक्स्थापनीयं कलशं प्रतिमाद्वयम् ।
आपोहिष्ठादिभिर्मन्त्रैस्तथा त्रैयम्वकैरपि ॥ 184

अभिषिच्य प्रयत्नेन पूजयेत्प्रतिमाद्वयम् ।
ततः स्वबन्धुवर्गैश्च गच्छेच्छ्रीमच्छिवालयम् ॥ 185

शिवस्थानं ततो गत्वा तोरणाद्यैरलङ्कृतम् ।
ततः षोडशपद्माङ्के बहिरन्तश्चतुर्गुणेः ।। 186

अलङ्कृते स्वस्तिकाद्यैः स्थापयेत्कलशं नवम् ।
ध्यायेत्ततो महादेवमुमादेहार्धधारिणम् ।। 187

मुक्तामालापरीताङ्गं दुकूलपरिवेष्टितम् ।
पञ्चाननमुमाकान्तमनन्तेन्दुरविप्रभम् ।। 188

चन्द्रार्धशेखरं नित्यं जटामकुटमण्डितम् ।
त्रिपुण्ड्ररेखाविलसद्भालभागमनामयम् ।। 189

भस्मोद्धूलितसर्वाङ्गं रुद्राक्षाभरणान्वितम् ।
मन्दस्मितमुखाम्भोजमाधारं जगतां प्रभुम् ।। 190

वेदैरनन्तैरनिशं स्तूयमानमनेकधा ।
वेदात्मकं वेदवेद्यं विष्णुब्रह्मादिवन्दितम् ।। 191

विष्णुनेत्रार्चितं भक्तकल्पद्रुममुमापतिम् ।
अप्रतिद्वन्द्वमद्वन्द्वं सर्ववृन्दारकार्चितम् ।। 192

सर्वोत्तममनाद्यन्तं सर्वदेवनिषेवितम् ।
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।। 193

ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं चिदात्मकम् ।
निष्कलं निर्गुणं शान्तं निरवद्यं निरञ्जनम् 194

अप्रमेयं जगज्जन्मस्थितिसंहारकारणम् ।
विश्वबाहुं विश्वपादं विश्वाक्षं विश्वशम्भुवम् ।। 195

विश्वं नारायणाराध्यमक्षरं परमं पदम् ।
विश्वतः परमं नित्यं विश्वस्येशमनामयम् ।। 196

एवं ध्यात्वा महादेवं सर्वदेवोत्तमोत्तमम् ।
ध्यायेत्ततः परं गौरीमादिविद्यामनामयाम् ।। 197

लक्ष्मीसेवितपादाब्जां शचीसेवितपादुकाम् ।
सरस्वत्यादिभिर्नित्यं स्तूयमानपदाम्बुजाम् ।। 198

अधरोष्ठाधरीभूतपक्वबिम्बफलामिमाम् ।
मुखकान्तिकलोद्धूतपूर्णचन्द्रां शिवात्मिकाम् ।। 199

तिरस्कृतालिमालां तामलकावलिभिः सदा ।
पीनवक्षोजनिर्धूतचक्रवाकवराङ्गनाम् ।। 200

नित्यां तिरस्कृताम्भोजनयनां विश्वमातरम् ।
सीमन्तधिक्कृताशेषकामभल्लामहर्निशम् ।। 201

भ्रुकुटीनिर्जितानङ्गचापां भक्तजनेष्टदाम् ।
बाहुनालप्रभोद्धूतहेमनालां विलासिनीम् ।। 202

रोमराजितिरोभूतसम्भ्रमद्भ्रमरावलिम् ।
नाभिरन्ध्रतिरोभूतघनावर्तोमिवर्तुलाम् ।। 203

उत्तमोरुतिरोभूतरम्भास्तम्भां शुभावहाम् ।
पादयुग्मप्रभापूरनिर्जितारुणपङ्कजाम् ।। 204

ब्रह्मेन्द्रोपेन्द्रजननीं महेशार्धाङ्गभागिनीम् ।
महेशाश्लिष्टवामाङ्गां वरदाभयदां सदा ।। 205

प्रसन्नवदनाम्भोजां स्मितपूर्वाभिभाषिणीम् ।
सर्वश्रृङ्गारवेषाढ्यां नानाभरणभूषिताम् ।। 206

देवैर्वेदैश्च वेदान्तैः स्तूयमानात्मवैभवाम् ।
एवं ध्यात्वा तथाबाह्याप्युपचारान्प्रकल्पयेत् ।। 207

ततः पुष्पाणि सङ्गृह्य शिवमावाहयेच्छिवाम् ।
महादेव कृपासिन्धो विश्ववन्द्यपदाम्बुज ।। 208

आवाहयामि देवेश प्रसीद परमेश्वर ।
लक्ष्म्यादिदेववनितापरिषेवितपादुके ।। 209

आवाहयामि देवेशि प्रसीद परमेश्वरि ।
गृहाण सोम विश्वात्मन्नासनं रत्ननिर्मितम् ।। 210

अनन्तासन विश्वेश करुणासागर प्रभो ।
उमे सोमसमाश्लिष्टे सोमार्धकृतशेखरे ।। 211

नानारत्नसमाकीर्णमासनं प्रतिगृह्यताम् ।
अर्घ्यं गृहाणदेवेश सपुष्पं गन्धसंयुतम् ।। 212

शिवानन्तगुणग्राम सर्वाभीष्टप्रदायक ।
गृहाणार्घ्यं शिवे नित्यं सर्वावयवशोभिनि ॥ 213

शिवप्रिये शिवाकारे नित्यं भक्तवरप्रदे ।
पाद्यं गृहाण गौरीश हेमपात्रस्थितं नवम् ॥ 214

गृहाण देवि पाद्यं त्वं वेदवेदान्तसंस्तुते ।
गृहाणाचमनं शम्भो कल्पितं निर्मल प्रभो ॥ 215

निर्मले निर्मलाकारे गृहाणाचमनीयकम् ।
मधुपर्कं गृहाणेश सच्चिदानन्दविग्रह ॥ 216

मधुपर्कप्रदानेन प्रीतो भव महेश्वर ।
मधुपर्कमिदं देवि स्वीकुरु प्रियशङ्करे ॥ 217

मधुपर्कप्रदानेन प्रीता भव सुशोभने ।
शिव शम्भोऽमृतस्नानं स्वीकुरुष्व कृपानिधे ॥ 218

सर्वतीर्थमय स्वामिन् सर्वपावनपावन ।
शिवे पञ्चामृतस्नानं स्वीकुरुष्व शिवप्रिये ॥ 219

सृष्टतीर्थोत्तमे शुद्धे तीर्थराजनिषेविते ।
शम्भो शुद्धोदकस्नानं स्वीकुरुष्व सुरोत्तम ॥ 220

प्रसीद कृपया भक्तं पाहि मां पार्वतीपते ।
शिवे शुद्धोदकस्नानं गृह्यतां मीनलोचने ॥ 221

प्रसीद देवि दीनं त्वं पाहि मां शरणागतम् ।
सोत्तरीयं सङ्गृहाण दुकूलमिदमुत्तमम् ॥ 222

पाहि पाहि कृपासिन्धो करुणावरुणालय ।
सोत्तरीयं गृहाणेदं दुकूलं शङ्करप्रिये ॥ 223

प्रसीद पाहि मां दीनमनन्यशरणं शिवे ।
उपवीतं गृहाणेश शम्भो चन्द्रार्धशेखर ॥ 224

गृह्यतामुपवीतं यन्नवतन्तुविनिर्मितम् ।
देवि देवाधिदेवेशि यथाशक्त्युपकल्पितम् ॥ 225

गृहाण चन्दनं देव नानागन्धोपकल्पितम् ।
प्रसीद पार्वतीनाथ शरणागतवत्सल ॥ 226

गृहाण चन्दनं देवि कस्तूरीकुङ्कुमाञ्चितम् ।
विश्वं विश्वात्मिके पाहि विश्वनाथप्रिये सदा ॥ 227

गृहाणाभरणानीश निरीश निगमाश्रय ।
विश्वाभरण विश्वेश रत्नाभरणभूषित ॥ 228

गृहाणाभरणान्यम्ब सर्वाभरणभूषिते ।
सर्वप्रिये जगद्वन्द्ये जगदानन्ददे शिवे ॥ 229

गृहाण बिल्वपत्राणि पुष्पाणि च महेश्वर ।
सुगन्धीनि नवानीश सबिल्वकुसुमप्रिय ॥ 230

गृहाण विल्वपत्राणि नूतनानि शिवप्रिये ।
नागपुन्नागमन्दारमालिकासमलङ्कृते ।। 231

दशाङ्गं गुग्गुलुं धूपं सगोघृतमनुत्तमम् ।
गृहाण पार्वतीनाथ घ्राणतर्पणमादरात् ।। 232

दशाङ्गं गुग्गुलुं धूपं सगोघृतमनुत्तमम् ।
गृहाण भक्तवरदे लक्ष्मीवाण्यादिसेविते ।। 233

साज्यं त्रिवर्तिविस्फूर्जद्दीपं शिव शिवापते ।
गृहाणानन्तसूर्याग्निचन्द्रप्रभ नमोऽस्तु ते ।। 234

साज्यं त्रिवर्तिविस्पूर्जद्दीपमीशानवल्लभे ।
गृहाण चन्द्रसूर्याग्निमण्डलाधिकसुप्रभे ।। 235

शम्भो गोघृतसंयुक्तं परमान्न मनोहरम् ।
सशर्करं गृहाणेश नित्यतृप्त महेश्वर ।। 236

शिवे गोघृतसंयुक्तं परमान्नं मनोहरम् ।
सशर्करं गृहाणाम्ब परमान्नप्रदायिनि ।। 237

शम्भो गृहाण गन्धाढ्यमिदमाचमनीयकम् ।
निवेदनान्ते देवेश कल्पितं शुद्धविग्रह ।। 238

शिवे गृहाण गन्धाढ्यमिदमाचमनीयकम् ।
शुद्धे शुद्धिप्रदे देवि शिववामाङ्गरूपिणि ।। 239

नीराजनं गृहाणेश बहुदीपविरजितम् ।
स्वप्रकाश प्रकाशात्मन्प्रकाशितदिगन्तर ।। 240

नीराजनं गृहाणाम्ब सूर्यचन्द्राग्निलोचने ।
प्रभापूरित (सम्पूर्ण) सर्वाङ्गे मङ्गले मङ्गलास्पदे ।। 241

शम्भो गृहाण ताम्वूलमेलाकर्पूरसंयुतम् ।
प्रसीद भगवन् शम्भो सर्वज्ञामितविक्रम ।। 242

शिवे गृहाण ताम्वूलमेलाकर्पूरसंयुतम् ।
प्रसीद सस्मिते देवि शिवालिङ्गितविग्रहे ।। 243

गृहाण परमेशान सरत्ने छत्रचामरे ।
दर्पणं व्यजनं चेश सर्वदुःखविनाशक ।। 244

गृहाणेमे सुराराध्ये सरत्नेछत्रचामरे ।
दर्पणं व्यजनं चाद्ये विद्याधारे नमोऽस्तु ते ।। 245

प्रदक्षिणनमस्कारान्गृहाण परमेश्वर ।
नर्तनं च महादेव नाट्यप्रिय नमोऽस्तु ते ।। 246

प्रदक्षिणनमस्कारान्गृहाण परमेश्वरि ।
नर्तनं च महादेवि शिवनाट्यप्रिये शिवे ।। 247

एवं प्रयत्नतः कृत्वा शिवयोःपूजनं शिवम् ।
शिवं शिवां च यत्नेन पुनः सम्पूजयेत्पुनः ।। 248

ततोऽङ्गपूजा कर्तव्या शिवयोर्यत्नपूर्वकम् ।
मूलमन्त्रेण कर्तव्यं पूर्वोक्तमपि पूजनम् ॥ 249

उक्तमन्त्रं समुच्चार्य यथापूर्वं यथाक्रमम् ।
शिवस्य मूलमन्त्रस्तु श्रीमत्पञ्चाक्षरःस्मृतः ॥ 250

आवहन्तीति मन्त्रस्तु भवान्यः परिकीर्तितः ।

शिवाय नमः शिरः पूजयामि ।

कपर्दिने नमः कपर्दं पूजयामि ।

फलालोचनाय नमः फालं पूजयामि ।

सोमसूर्याग्निलोचनाय नमः - नेत्राणि पूजयामि

वेदवक्त्राय नमः वक्त्रं पूजयामि ।

श्रुतिश्रोत्राय	नमः	श्रोत्राणि [त्रे]	पूजयामि
घ्रातगन्धाय	,,	घ्राणानि [णं]	,,
स्मृतिदन्ताय	,,	दन्तान्	,,
श्रुतिजिह्वाय	,,	जिह्वाः [ह्वं]	,,
वेदकपोलाय	,,	कपोलानि [ले]	,,
ज्ञानोष्ठाय	,,	ओष्ठान् [ष्ठौ [	,,
नीलकण्ठाय	,,	कण्ठान् [ठम्]	,,
भूरिवक्षसे	,,	वक्षांसि [क्षः]	,,
हिरण्यबाहवे	,,	बाहून्	,,

विश्वोदराय	नमः	उदराणि [रं]	पूजयामि
विश्वपार्श्वाय	,,	पार्श्वान् [श्वौं]	,,
विश्वकटये	,,	कटीन् [टिं]	,,
विश्वोरवे	,,	ऊरून् [रू]	,,
विश्वजङ्घाय	,,	जङ्घान् [ङ्घे]	,,
विश्वपदे	,,	पादान् [दौ]	,,
विश्वनखाय	,,	नखान्	,,
सर्वात्मकाय	,,	सर्वाङ्गं	,,
शिवायै	,,	शिरः	,,
पृथुवेण्यै	,,	वेणीं	,,
सीमन्तविराजितायै नमः		सीमन्तं	,,
कुङ्कुमफालायै	,,	फालं	,,
सोमसूर्याग्निनेत्रायै नमः		नेत्राणि	,,
श्रुतिश्रोत्रायै	,,	श्रोत्रे	,,
गन्धप्रियायै	,,	घ्राणं	,,
सुभगकपोलायै	,,	कपोले	,,
कुड्मलदन्तायै	,,	दन्तान्	,,
विद्याजिह्वायै	,,	जिह्वां	,,
बिम्बोष्ठ्यै	,,	ओष्ठौ	,,

वृत्तकण्ठायै	नमः	कण्ठं	पूजयामि
पृथुकुचायै	"	कुचौ	"
विश्वगर्भायै	"	उदरं	"
शुभकट्यै	"	कटिं	"
दिव्योरुदेशायै	"	ऊरू	"
सुजङ्घायै	"	जङ्घे	"
लक्ष्मीसेवितपादुकायै	नमः	पादौ	"
महेश्वरप्रियायै	"	नखान्	"

शोभनविग्रहायै नमः सर्वाङ्गं पूजयामि ।
अङ्गपूजां समाप्यैवं दोरकं च समर्पयेत् ॥ 251

प्रत्येकं ग्रन्थिषु स्वच्छेष्वच्छैर्बिल्वदलादिभिः ।
प्रथमं ग्रन्थिमारभ्य नमः सोमेति मन्त्रतः ॥ 252

यथाक्रमेण सम्पूज्य ततो धार्यं हि दोरकम् ।
तत्रोपचारः सर्वोऽपि तेन मन्त्रेण सादरम् ॥ 253

व्रती प्रयत्नतः कुर्यात्कुङ्कुमाङ्कितदोरके ।
ततः पञ्चदशप्रस्थं गोधूमास्तण्डुलापि[स्तु]वा ॥ 254

उपायनार्थमानेयाः शुद्धाः कीटाद्यदूषिताः ।
यद्वा पञ्चदशाज्योक्ता अपूपा घृतपाचिताः ॥ 255

ततः शिवैकशरणः शैवः शैवव्रतप्रियः ।
पूजनीयः प्रयत्नेन गन्धपुष्पादिभिः क्रमात् ।। 256

ततः सवस्त्रं कलशं शिवयोः प्रतिमाद्वयम् ।
शैवाय देयं यत्नेन सुवर्णफलसंयुतम् ।। 257

उपायनं ततो देयं सफलं दक्षिणान्वितम् ।
उपायनस्य मन्त्रोऽपि वक्ष्यतेऽत्र विशेषतः ।। 258

उमेशः प्रतिगृह्णातु(ति) उमेशो वै ददाति च ।
उमेशस्तारको देवः उमेशाय नमो नमः ।। 259

अमुं मन्त्रं समुच्चार्य दत्वोपायनमादरात् ।
उपायनादिदानं यत्तच्छिवाय निवेदयेत् ।। 260

ततः शैवास्तथान्ये च भोजनीया विशेषतः ।
सुवासिन्योऽपि यत्नेन भोजनीयाः शिवप्रियाः ।। 261

शैवान्सम्यग्भोजयित्वा स्वयं भुञ्जीत वाग्यतः ।
अतिथीनपि सन्तर्प्य द्वारदेशगतान्नृप ।। 262

एवं प्रयत्नतः कार्यं प्रतिवत्सरमादरात् ।
नियमेनैव विधिवदुक्तरीत्या यथाक्रमम् ।। 263

ब्राह्मणैर्वेदनिरतैरिदं कार्यं व्रतं महत् ।
सर्वाभीष्टप्रदं पुण्यं व्रतमेतच्छिवात्मकम् ।। 264

प्राप्ते तु षोडशे वर्षे कार्यमुद्यापनं नृप ।
उद्यापनविधानं च वक्ष्ये शृणु यथाक्रमम् ।। 265

पौर्णमास्यां भाद्रपद्यां व्रतोद्यापनमादरात् ।
कर्तव्यमतियत्नेन द्रव्यं सम्पाद्य सादरम् ।। 266

हैमाः पञ्चदशोत्कृष्टाः शिवयोः प्रतिमाः शुभाः ।
करणीयाः प्रयत्नेन तत्तल्लक्षणसंयुताः ।। 267

एकैका प्रतिमा कार्या सार्धषष्टिपलान्विता ।
तदर्धेनाथवा कार्या तदर्धेनाथवा नृप ।। 268

राजतेनाथवा कार्या यथोक्तपलमानतः ।
तदर्धेनाथवा कार्यं तदर्धेनाथवा नृप ।। 269

सम्पादनीयाः कलशा हैमाः पञ्चदशोत्तमाः ।
अथवा राजताः कार्या यद्वा ताम्रमया नृप ।। 270

भाद्रशुक्लचतुर्दश्यां शैवा ब्राह्मणपुङ्गवाः ।
निमन्त्रणीया यत्नेन प्रातः सप्तदशोत्तमाः ।। 271

ततो गृहं वितानाद्यैरलङ्कृत्य प्रयत्नतः ।
स्वस्तिकाद्यैरलङ्कुर्याच्छिवस्थानमघापहम् ।। 272

ततः स्वलङ्कृते सायं तस्मिञ्छङ्करमन्दिरे ।
पूजनीयाः प्रयत्नेन प्रतिमास्ताः शिवात्मिकाः ।। 273

रात्रौ जागरणं कार्यं सोपवासं सभक्तितः ।
ऋत्विग्भिः सह सोत्साहं पयोमात्राशनेन वा ।। 274

रात्रौ शिवकथाः श्राव्याः श्रोतव्या यत्नतो नृप ।
कर्तव्या श्रद्धया रात्रौ पूजा यामचतुष्टये ।। 275

ततः प्रातः प्रयत्नेन स्नात्वा शङ्करसन्निधौ ।
सम्पूजनीयो यत्नेन शिवो देवशिखामणिः ।। 276

चतुरस्रं ततः कार्यं कुण्डमष्टदलान्वितम् ।
कटिदघ्नं प्रान्तदेशे द्विहस्तपरिमाणतः ।। 277

तत्र वह्निं प्रतिष्ठाप्य विधिवद्गृह्यमार्गतः ।
साज्येन परमान्नेन होमः कार्यस्ततः परम् ।। 278

पञ्चविंशतिसाहस्रं होमः सोमेति मन्त्रतः ।
कार्यः प्रयत्नतो राजन् नमः पूर्वं सतारकम् ।। 279

ततः पूर्णाहुतिं दत्वा शैवान्सम्पूजयेत्ततः ।
विल्वपत्रैः पुष्पमाल्यैर्भस्मना च यथाक्रमम् ।। 280

एकैकस्मै प्रदातव्यं शिवयोः प्रतिमाद्वयम् ।
कलशोऽपि प्रदातव्यस्ततो वस्त्रद्वयान्वितः ।। 281

आचार्याय प्रदातव्यं सुवर्णशतमादरात् ।
ततो वस्त्राणि देयानि गौश्च देया पयस्विनी ।। 282

तथैव ब्रह्मणे देयं सुवर्णं वस्त्रसंयुतम् ।
तदर्धमथवा देयं गौश्च देया पयस्विनी ।। 283

ततो यत्नेन शैवेन्द्रा भोजनीयाः कृतव्रतैः ।
सुवासिन्योऽपि शैवानां भोजनीयाः प्रयत्नतः ।। 284

ततो देयाः स्वशक्त्यैव भोजितेभ्यश्च दक्षिणाः ।
ततश्च स्वकृतं कर्म शिवाय विनिवेदयेत् ।। 285

उद्यापनं कृतं शम्भो मयैतदधुना प्रभो ।
इदं सम्पूर्णतामेतु त्वत्प्रसदान्महेश्वर ।। 286

मन्त्रहीनं क्रियाहीनं भक्तिहीनमुमापते ।
कृतं कर्म भवत्वद्य त्वत्प्रसादत्फलप्रदम् ।। 287

प्रायश्चित्तं वैदिकानां व्यङ्गानामपि कर्मणाम् ।
शिवस्मरणमेवेति कथितं मुनिपुङ्गवैः ।। 288

अतः कृतमिद श्रौतं कर्म व्यङ्गमपि प्रभो ।
साङ्गं भवतु विश्वेश तवैव स्मरणात्प्रभो ।। 289

इति सम्प्रार्थ्य देवेशं साम्वं सर्वसुरोत्तमम् ।
भुञ्जीयाद्बन्धुभिः साकं समौनं लौल्यवर्जितम् ।। 290

एवं यः कुरुते सम्यगुमामाहेश्वरं व्रतम् ।
स सर्वभोगान्भुक्त्वान्ते मोक्षं प्राप्नोति सर्वथा ।। 291

राजोवाच -

गौतमेदं व्रतं चीर्णं पुरा केन वदस्व मे ।
कस्य सिद्धोऽभवत्कामो व्रतस्यास्य प्रभावतः ।। 292

गौतम उवाच -

पुरा शैववरो राजन् दुर्वासाख्यो महामुनिः ।
कदाचित्सञ्चरन्लोकान्ददर्श कमलापतिम् ।। 293

ततः समागतं दृष्ट्वा दुर्वासाख्यं मुनिं हरिः ।
प्रीत्या संपूजयामास गन्धपुष्पादिभिः क्रमात् ।। 294

ततस्तदाज्ञया शीघ्रमारुह्य गरुडं हरिः ।
कैलासं गन्तुमुद्युक्तो महादेवालयं वरम् ।। 295

प्रस्थितं तं हरिं दृष्ट्वा दुर्वासाख्यो मुनिस्तदा ।
बिल्वमालां ददौ तस्मै शङ्कराय समर्पिताम् ।। 296

गृहीत्वा बिल्वमालां तां हरिर्गमनसम्भ्रमात् ।
शिरसा पूजनीयां तां न्यक्षिपद्गरुडोपरि ।। 297

ततस्तं तादृशं दृष्ट्वा दुर्वासाः क्रोधमूर्च्छितः ।
हरिं शशाप बहुधा धिग्धिक्त्वामिति संवदन् ।। 298

मया शिवार्पिता दत्ता माला तुभ्यमथापहा ।
सा कथं गरुडस्कन्धे विनिक्षिप्ता त्वया हरे ।। 299

गर्वस्य मूलभूतेयं लक्ष्मीस्तव विनश्यतु ।
लक्ष्मीः पततु दुग्धाब्धौ गरुडोऽपि विनश्यतु ॥ 300

वैकुण्ठस्याधिकारोऽपि तवापैतु मदाज्ञया ।
निस्तेजस्कोऽवनीपृष्ठे भ्रमाद्यप्रभृति स्वयम् ॥ 301

इत्युक्त्वा स तु दुर्वासा ययौ स्वेच्छं यथागतम् ।
ततः पपात दुग्धाब्धौ लक्ष्मीर्विष्णुमनोहरा ॥ 302

अथातिदुःखितो विष्णुः प्रलपन्वनमाश्रितः ।
उवास निर्जने तत्र स्वकृतं कर्म संस्मरन् ॥ 303

ततः कदाचिद्भूपालं तं विष्णुं दृष्टवानहम् ।
स मां समागतं वीक्ष्य पूजयामास केशवः 304

ततोऽश्रुपूर्णनयनः कृताञ्जलिपुटो हरिः ।
जगाद पूर्ववृत्तान्तं लक्ष्मीविरहकारणम् । 305

ततस्तद्दुःखनाशाय विष्णवे व्रतमुत्तमम् ।
तेन पृष्टोऽच्युतेनाहं प्रीत्या कथितवान् पुरा ॥ 306

अथासौ श्रद्धया युक्तश्चकारेदं व्रतं हरिः ।
उद्यापनं च विधिवच्चकार श्रद्धयान्वितः ॥ 307

ततः प्रसन्नो भगवान्हरये पार्वतीपतिः ।
ददौ लक्ष्मीं सगरुडां करुणानिधिरव्ययः ॥ 308

इदमेव व्रतं चीर्णमिन्द्रेणापि हृतौजसा ।
तेन प्राप्तस्ततः स्वर्गः स्वर्गभोगश्च शाश्वतः ॥ 309

ब्रह्मणापि व्रतं चीर्णमिदमेव पुरा नृप ।
नष्टा वागीश्वरी तेन सम्प्राप्ता दुर्लभापि सा ॥ 310

मुनिभिर्बहुभिश्चीर्णं व्रतमेतन्मुमुक्षुभिः ।
व्रतस्याचरणादस्य मुक्तिः प्राप्ता मुनीश्वरैः ॥ 311

व्रतमेतत्प्रयत्नेन यश्चरिष्यति भक्तितः ।
तस्य सौभाग्यसंसिद्धिर्भविष्यत्येव सर्वथा ॥ 312

यस्यास्त्यैश्वर्यभोगेच्छा मोक्षेच्छाप्यनपायिनी ।
यस्य सर्वाधिपत्येच्छा तेन कार्यमिदं व्रतम् ॥ 313

शारदो नाम विप्रोऽभूत्पुरा वेदान्तपारगः ।
मोक्षार्थमतियत्नेन तेन चीर्णमिदं व्रतम् ॥ 314

वैद्युतेनापि विप्रेण मोक्षार्थमतियत्नतः ।
कृतमेतद्व्रतं पूर्वं सर्वाभीष्टप्रदायकम् ॥ 315

इदमेव व्रतं पूर्वं मयापि कृतमुत्तमम् ।
एतदाचरणादेव नित्यमुक्तोऽस्म्यहं नृप ॥ 316

भूतं भव्यं भविष्यच्च ज्ञायतेऽस्माद्व्रतान्मया ।
मम श्रमोऽपि नास्त्येव व्रतस्यास्य प्रभावतः ॥ 317

यं यं कामं समुद्दिश्य व्रतमेतदनुत्तमम् ।
यः करिष्यति तं कामं स संप्राप्नोति सर्वथा ।। 318

इदं व्रतं महेशेन समाख्यातमुमां प्रति ।
कुमाराय समाख्यातमुमयैतद्व्रतं नृप ।। 319

नन्दिकेशाय कथितं कुमारेण व्रतं ततः ।
नन्दिकेशेन कथितं दुर्वासमुनये व्रतम् ।। 320

दुर्वाससापि कथितमगस्त्याय व्रतोत्तमम् ।
व्रतं तत्कथितं मह्यमगस्त्येन महात्मना ।। 321

मयातिक्लिष्टचित्ताय विष्णवे कथितं पुरा ।
तेन चीर्णं व्रतमितं सर्वसौभाग्यदायकम् ।। 322

ब्रह्मणे कथितं पूर्वमिदमेव व्रतं पुरा ।
तेन चीर्णं व्रतं साङ्गं वाणीप्राप्त्यर्थमादरात् ।। 323

सूर्यायेन्द्राय चन्द्राय मयैतत्कथितं व्रतम् ।
तैश्च चीर्णं व्रतं सम्यगिदं सौभाग्यदायकम् ।। 324

वसुभ्यः कथितं पूर्वं व्रतमेतच्छिवात्मकम् ।
तैश्च चीर्णं मुक्तिकामैर्व्रतमेतद्यथाविधि ।। 325

कश्यपादिमुनिभ्यश्च कथितं व्रतमुत्तमम् ।
तैश्च चीर्णं व्रतं सम्यग्भुक्तिमुक्तिफलप्रदम् ।। 326

भूप व्रतानि सन्त्येव बहूनि विविधानि च ।
तथाप्येतद्व्रतसमं भुवि नास्त्येव सर्वथा ॥ 327

त्वं चापि कुरु भूपाल व्रतमेतदनीदृशम् ।
इदं व्रत यतः श्रौत चतुर्वर्गफलप्रदम् ॥ 328

इदं व्रतं शिवक्षेत्रे यः करिष्यति भक्तितः ।
तस्य सर्वार्थसम्पत्तिर्भवत्येव न संशयः ॥ 329

श्रीमहादेव उवाच -

इति तद्वचनं श्रुत्वा स राजा प्रीतमानसः ।
सपुत्रः पूजयामास गौतमं मुनिपुङ्गवम् ॥ 330

अथोत्तमं व्रतं चेदमुपदिश्य स गौतमः ।
पुनः सम्पूजितो राज्ञा स्वाश्रमं प्रति संययौ ॥ 331

राजा सपुत्रस्तद्वाक्यादुमामाहेश्वराभिधम् ।
व्रतं चकार विधिवद्यथाक्रममतन्द्रितः ॥ 332

राजा शैवव्रतान्येवं कुर्वन्विध्युक्तमार्गतः ।
उवास प्रीतहृदयो मत्पूजानिरतोऽनिशम् ॥ 333

ततः स राजा विधिवन्मामभ्यर्च्य प्रयत्नतः ।
मयि सन्न्यस्य कर्माणि वने वासं चकार च ॥ 334

तत: सभार्य: सन्त्यक्त्वा वनं रेवातटं ययौ ।
तत्र दृष्ट्वा मुनिवरान्कश्यपाद्याञ्छिवार्चकान् । 335

ततो लिङ्गमयीं रेवां नत्वा स्नात्वा च तज्जले ।
विधिवत्पूजयामास तत्र लिङ्गानि कोटिश: ।। 336

तत: स राजा सुभगे रेवातो मत्प्रसादत: ।
अविमुक्तमिदं प्राप सर्वसिद्धिप्रदायकम् ।। 337

अत्र मां सर्वदेवेशं विश्वेश्वरमनामयम् ।
मल्लिङ्गेऽस्मिन्समभ्यर्च्य मयि लीनो वभूव स: ।। 338

चन्द्रमौलिप्रभृतयस्तत्पुत्राश्च तत: परम् ।
स्वराज्यपालनं चक्रुर्मत्पूजनपुर:सरम् ।। 339

तेऽपि सर्वे मत्प्रसादाद्भुक्त्वा भोगाननेकश: ।
पुत्रेषु राज्यं विन्यस्य काशीं प्रापुरिमां शिवे ।। 340

ये मामनन्यहृदया: सकलामरेशं
सम्पूजयन्ति सततं धृतभस्मलेपा: ।
ते मामुपेत्य विधुताखिलदु:खबन्धा
मद्रूपमेत्य सुखिनो निवसन्ति नित्यम् ।। 341

।। इति श्रीशिवरहस्ये सप्तमांशे शिवगौरीसंवादे
द्वात्रिंशोऽध्याय: ।।

।। त्रयोविंशोऽध्यायः ।।

शिव उवाच -

शिवे वृद्धाचलं नाम क्षेत्रमस्ति मदात्मकम् ।
तस्य स्मरणमात्रेण मुच्यते पापकोटिभिः ।। 1

तद्ब्रह्मोपेन्द्रचन्द्रेन्द्रप्रमुखैः सेव्यते सदा ।
मणिमुक्ता नदी तत्र प्रवहत्यतिनिर्मला ।। 2

तत्तीरे कोटिशः सन्ति मुनयो ब्रह्मवादिनः ।
तत्तीरे सन्त्यसङ्ख्याता बिल्ववृक्षाश्च शोभने ।। 3

स्नात्वादौ मणिमुक्तायां श्रीमद्वृद्धाचलेश्वरम् ।
यः पूजयति बिल्वाद्यैः स मद्रूपं प्रयास्यति ।। 4

पर्वतेन्द्रसुते यो मां मणिमुक्तानदीजलैः ।
भिषिच्यार्चयेद्भक्त्या स मद्रूपो भविष्यति ।। 5

वृद्धाचलेश्वरं भक्त्या पूजयित्वा नमन्ति ये ।
ते सर्वेऽपि भविष्यन्ति मम पारिषदाः प्रिये ।। 6

पुरा कश्यपकण्वाद्याः शिवतीर्थाटनोत्सुकाः ।
श्रीमद्वृद्धाचलं प्रापुर्दर्शनादेव मोक्षदम् ।। 7

मणिमुक्तानदीं दृष्ट्वा कश्यपाद्या मुनीश्वराः ।
तत्तीरे विल्ववृक्षांश्च ददृशुर्नवपल्लवान् ।। 8

तत्र शैववरांश्चान्यानपश्यञ्छिवपूजकान् ।
भस्मोद्धूलितसर्वाङ्गान् त्रिपुण्ड्राङ्कितमस्तकान् ।। 9

रुद्राक्षमालाभरणाञ्जटामण्डलमण्डितान् ।
शङ्करेति महेशेति शिवनामजपोत्सुकान् ।। 10

नित्यमव्यभिचारेण मल्लिङ्गैकार्चनप्रियान् ।
अद्वैतं परमं ब्रह्म शिव एवेति वादिनः ।। 11

श्रीमद्रुद्रजपासक्तान्पञ्चाक्षरपरायणान् ।
मणिमुक्तानदीं प्रापुस्ततस्ते मुनिपुङ्गवाः ।। 12

तत्र ते चक्रिरे स्नानं मणिमुक्तानदीजले ।
उद्धूल्य भस्मनाङ्गानि ततस्ते मुनिपुङ्गवाः ।। 13

त्रिपुण्ड्रधारणं चक्रुस्ततस्ते कश्यपादयः ।
अथ संपूजयामासुः शिवं मां लिङ्गरूपिणम् ।। 14

ततः सर्वैर्मुनिवरैर्जप्तं पञ्चाक्षरं शिवे ।
ततस्ते बिल्वपत्राणि मणिमुक्ताजलानि च । 15

गृहीत्वा मौनमासाद्य जग्मुर्वृद्धाचलेश्वरम् ।
ततो दृष्ट्वा मुनीन्द्रास्ते श्रीमद्वृद्धाचलेश्वरम् ।। 16

सन्तोषं परमं जग्मुरानन्दभरिता भृशम् ।
ततः सम्पूजयामासुः श्रीमद्वृद्धाचलेश्वरम् ।। 17

रुद्रसूक्तैर्लिङ्गरूपमभिषिच्य यथाक्रमम् ।
प्रदक्षिणनमस्कारांस्ततश्चक्रुर्मुनीश्वराः ।। 18

ततः स्तुत्वातिभक्त्या ते शिवनामजपोत्सुकाः ।
पञ्चाक्षरजपं कृत्वा श्रौतन्यासपुरःसरम् ।। 19

श्रीमद्रुद्रजपं कृत्वा तत्र तस्थुरचञ्चलाः ।
तदानीमागतो देवि गौतमोऽप्यरुणाचलात् । 20

अगस्त्यः पूजयामास श्रीमद्वृद्धाचलेश्वरम् ।
ततस्तुष्टाव शुद्धात्मा गौतमो मामुमापतिम् ।। 21

शैववर्येषु शृण्वत्सु श्रोत्रानन्दकरं शिवे ।

गौतम :-

यो वै रुद्रः स भगवन्ब्रह्मा साक्षान्महेश्वरः ।
सर्वतन्त्रस्वतन्त्रश्च तस्मै वै ते नमो नमः ।। 22

यो वै रुद्रः स भगवान्विष्णुब्रह्मादिवन्दितः ।
यश्च ब्रह्मा महारुद्रस्तस्मै वै ते नमो नमः ।। 23

यो वै रुद्रः स भगवान्पार्वतीरमणः प्रभुः ।
यश्च विष्णुर्विरूपाक्षस्तस्मै वै ते नमो नमः ॥ 24

यो वै रुद्रः स भगवान् या चोमा परमेश्वरी ।
उमाकान्तो निर्गुणोऽपि तस्मै वै ते नमो नमः ॥ 25

यो वै रुद्रः स भगवान् यश्च साक्षाद्विनायकः ।
यश्च नित्यो व्यापकश्च तस्मै वै ते नमो नमः ॥ 26

यो वै रुद्रः स भगवन् यश्च स्कन्दः सुरार्चितः ।
यश्च साक्षाज्जगत्कर्ता तस्मै वै .... ॥ 27

यो वै रुद्रः स भगवान् यश्चेन्द्रः स्वर्गपालकः ।
यश्च स्वर्गप्रदो नित्यं तस्मै .... ॥ 28

यो वै रुद्रः स भगवान् यश्चाग्निस्तेजसां निधिः ।
यश्च तेजोमयः साक्षत् तस्मै .... ॥ 29

यो वै रुद्रः स भगवान् यश्च सूर्यो मरीचिमान् ।
यश्च ग्रहगणाधीशस्तस्मै वै ते नमो नमः ॥ 30

यो वै रुद्रः स भगवान् यश्च चन्द्रस्तदात्मकः ।
चन्द्रकोटिसमप्रख्यस्तमै .... ॥ 31

यो वै रुद्रः स भगवान् भूर्भुवःस्वःप्रभुश्च यः ।
यश्च भूमेः समुद्धर्ता तस्मै वै ते .... ॥ 32

यो वै रुद्रः स भगवान् यस्तु नित्यो भुवः प्रभुः ।
भुवो यस्तु समुद्धर्ता तस्मै .... ॥ 33

यो वै रुद्रः स भगवान् नित्यो यश्च सुवःपरः
यश्चैव स्वपतिः सत्यं तस्मै वै ते .... ॥ 34

यो वै रुद्रः स भगवान् नित्यो यश्च महःपरः ।
महतोऽपि महान्यस्तु तस्मै .... ॥ 35

यो वै रुद्रः स भगवान् नित्यो यश्च तपःपरः ः ।
तपोरूपोऽपि यो देवस्तस्मै .... ॥ 36

यो वै रुद्रः स भगवान् नित्यो यश्च जनः परः ।
यश्च नित्यं जगद्व्यापी तस्मै .... ॥ 37

यो वै रुद्रः स भगवान् यश्च सत्यं सदात्मकम् ।
सत्यस्वरूपः सत्यं यस्तस्मै वै ते .... ॥ 38

यो वै रुद्रः स भगवान्यश्चापस्तन्मयः परः ।
यश्चापां जनको भर्गस्तस्मै वै ते नमो नमः ॥ 39

यो वै रुद्रः स भगवान् यश्च तेजः प्रकाशकम् ।
भासा यस्य विभात्यर्कस्तस्मै .... ॥ 40

यो वै रुद्रः स भगवान् यश्चवायुः सुशीतलः ।
यश्च वायोश्च जनकस्तस्मै वै .... ॥ 41

यो वै रुद्रः स भगवान् यश्चाकाशः सदात्मकः ।
यश्चाकाशादिजनकस्तस्मै वै .... ॥ 42

यो वै रुद्रः स भगवान् यश्च प्राणस्तदात्मकः ।
यस्य प्राणमयो नित्यस्तस्मै वै .... ॥ 43

यो वै रुद्रः स भगवान् यश्चकालः कलात्मकः ।
यश्चकालकलाधारस्तस्मै वै .... । 44

यो वै रुद्रः स भगवान् यश्च साक्षाद्यमः स्वयम् ।
यमस्यापि नियन्ता यस्तस्मै वै .... ॥ 45

यो वै रुद्रः स भगवान् यश्च मृत्युर्विषाददः ।
यश्च मृत्युञ्जयः साक्षात्तस्मै वै .... ॥ 46

यो वै रुद्रः स भगवान् यश्चामृतमनामयम् ।
अमृतात्माऽमृतं यश्च तस्मै वै .... ।: 47

यो वै रुद्रः स भगवान् यश्च भूतगणेश्वरः ।
प्रमथाधिपतिर्यश्च तस्मै वै .... ॥ 48

यो वै रुद्रः स भगवान् यच्च सर्वञ्चिदात्मकम् ।
यः सर्वप्रभुरीशानस्तस्मै वै .... ॥ 49

यो वै रुद्रः स भगवान् यश्च सत्यं ऋतं परम् ।
यश्च सत्याभिधं ब्रह्म तस्मै वै .... ॥ 50

यो वै रुद्रः स भगवान् यः परं ब्रह्म निष्कलम् ।
यश्च नित्यं चिदाकारस्तस्मै वै ते .... ॥ 51

त्वमेव विश्वरूपोऽसि ब्रह्मैकस्त्वं महेश्वर ।
एकत्वादिपरार्धान्तस्त्वमेवासि सदाशिव ॥ 52

अधश्चोर्ध्वं च मध्यं च त्वमेवासि महेश्वर ।
शान्तिः पुष्टिश्च तुष्टिश्च त्वं हुतं चाहुतं शिव ॥ 53

त्वं हि विश्वमविश्वं च दत्तं चादत्तमेव च ।
त्वं कृतं चाकृतं शम्भो त्वं परं चापरं प्रभो ॥ 54

परापराणां परमः पवित्रोऽसि महेश्वर ।
परात्परतरो यश्च तत्परात्परतोऽसि च ॥ 55

सर्वस्रष्टा च भगवान् त्व हि सर्वस्य रक्षकः ।
त्वमेव भगवन् शम्भो सर्वसंहारकारकः ॥ 56

हन्तासि नरसिंहस्य त्वमेवासि कृतागसः ।
हरेरपि नियन्ता त्वं तथैव ब्रह्मणोऽपि च ॥ 57

परं ब्रह्म त्वमेवासि निर्विकार निरञ्जन ।
निष्कलो निष्क्रियः शान्तस्त्वमेवासि शिव प्रभो ॥ 58

त्वत्त एव समुत्पन्ना विष्णुब्रह्मादयः सुराः ।
त्वयैव पालिता लोकास्त्वयैवैते विनाशिताः ॥ 59

त्वया व्याप्तमिदं सर्वं ब्रह्माण्डं स चराचरम् ।
त्वमेव व्यापकः शम्भो सर्वस्य जगतः प्रभुः ।। 60

त्वमेव स्वर्गफलदस्त्वमेवास्यपवर्गदः ।
त्वमेव सर्वलोकानां पूज्यो मुक्त्यर्थिनां प्रभो ।। 61

गतिस्त्वमेव लोकानामगतीनां गतिः परा ।
त्वदन्या न गतिः शम्भो सच्चिदानन्दविग्रह ।। 62

वेदैरपि न ते रूपं ज्ञातमस्ति महेश्वर ।
किमन्यैर्मादृशैरीश प्रमाणविषय प्रभो ।। 63

महादेव उवाच -

एवं तुष्टाव भक्त्या मां गौतमो विनयान्वितः ।
ततः प्रणम्य भक्त्या मां संप्रहृष्टतनूरुहः ।। 64

पञ्चार्णं वैदिकं मन्त्रं जजाप प्रणवादिकम् ।
तदानीमागतो विष्णुर्ब्रह्मेन्द्रादिसमन्वितः ।। 65

आगत्य पूजयामास मां भक्त्या परया युतः ।
तदानीमागतं श्रुत्वा गौतमं मुनिपुङ्गवम् ।। 66

सन्तोषं परमं जग्मुर्वृद्धाचलनिवासिनः ।
समागतास्ततः शीघ्रं बिल्वपल्लवपाणयः ।। 67

अथ ते मुनयः सर्वे श्रीमद्ब्रह्माचलेश्वरम् ।
सम्पूज्य विल्वपत्राद्यैस्तुष्टुवुश्च सहस्रशः ।। 68

ततः प्रणम्य साष्टाङ्गं मामनन्तमजं शिवम् ।
जप्त्वा पञ्चाक्षरं दिव्यं प्रापुरानन्दमम्बिके ।। 69

ततो भस्मानुलिप्ताङ्गं त्रिपुण्ड्राङ्कितमस्तकम् ।
रुद्राक्षमालाभरणं ददृशुर्गौतम मुनिम् ।। 70

पञ्चाक्षरजपासक्तं निमीलितविलोचनम् ।
आनन्दाश्रुसमाकीर्णं ध्यायन्तं हृदि मां शिवम् ।। 71

मदर्पितमनोबुद्धिं सन्यस्तविषयादरम् ।
सुप्तमीनह्रदमिव सन्निरुद्धाखिलेन्द्रियम् ।। 72

दृष्ट्वा ते मुनयः सर्वे गौतमं मुनिपुङ्गवम् ।
कृताञ्जलिपुटा भूत्वा समयं वीक्ष्य संस्थिताः ।। 73

ततः स गौतमो देवि पूजा निर्वर्त्य मानसीम् ।
समुन्मीलितनेत्रः सन् ददर्श मुनिपुङ्गवान् ।। 74

अथासौ गौतमो दृष्ट्वा भस्मोद्धूलितविग्रहान् ।
त्रिपुण्ड्रविलसद्भालान् शुद्धान् रुद्राक्षधारिणः ।। 75

शिवनामामृतास्वादलोलजिह्वानकल्मषान् ।
शिवध्यानपराञ्छान्तानुदतिष्ठत्कृताञ्जलिः ।। 76

ततस्ते मुनयः सर्वे गौतमं मुनिपुङ्गवम् ।
प्रणम्य पूजयामासुर्बिल्वपत्रादिभिर्मुदा ॥ 77

ततः कश्यपकण्वाद्यास्तं दृष्ट्वा गौतमं पुनः ।
चक्रुः पूजां विल्वपत्रैर्भस्मना कुसुमैरपि ॥ 78

अथोपविष्टाः सर्वेऽपि गोतमेन सहाम्बिके ।
अत्रान्तरे समायातो विष्णुः पद्मासनान्वितः ॥ 79

समीक्ष्य गौतमस्त्वेतान्बभाषे मधुरं वचः ।

गौतम :-

हरे शिवव्रत श्रीमन्कुशलं खलु सर्वतः ॥ 80

सुस्थिरं किल चित्तं ते महादेवे सुरोत्तमे ।

शिव उवाच -

इत्युक्तं तद्वचः श्रुत्वा विष्णुर्वचनमब्रवीत् ॥ 81

कुशलं सर्वतो विद्वन् स्वशक्त्या पूज्यते शिवः ।
मया शक्त्यनुरोधेन शिवमन्त्रोऽपि जप्यते ॥ 82

तथा शक्त्यनुरोधेन शिवमन्त्रोऽपि जप्यते ।
यावन्नाक्रमते विद्वन् शिवमाया दुरत्यया ॥ 83

तावत्स्वशक्त्या क्रियते मया शङ्करपूजनम् ।
यथा नाक्रमते माया मां मुने श्रीमहेशितुः ॥ 84

इति तद्वचनं श्रुत्वा कश्यपाद्या मुनीश्वराः ।
प्रणम्य गौतमं प्राहुर्विनयानतकन्धराः ॥ 85

ऋषय ऊचुः

विद्वन्माहेश्वरी माया सर्वेषां च दुरत्यया ।
देवान्नाक्रमते तद्वद्दृषीनपि कदाचन ॥ 86

किन्तु गर्वोद्धतानेतान् शिवमाया विमोहयेत् ।
प्रमाणं वयमेवात्र शिवमायाविमोहिताः ॥ 87

यथा नाक्रमते माया शिवस्य परमात्मनः ।
तथा कश्चिदुपायश्चेद्वद वेदविदां वर ॥ 88

शिवमायाविनिर्मुक्ता इच्छामो भवितुं मुने ।
तथाप्यन्येऽपि ये सन्ति मोहिता मुनिपुङ्गवाः ॥ 89

ते तन्मायाविनिर्मुक्ता भविष्यन्ति कथं वद ।
शिवमायाविनिर्मुक्तो यो भविष्यति भाग्यतः ॥ 90

तस्यैव मोक्षो नान्यस्येत्यपि संश्रूयते श्रुतिः ।
शिवमायामोहितानां सर्वदा पापकर्मणि ॥ 91

चित्तं प्रवर्तते तेन दुःखमप्यनुभूयते ।
किञ्च प्रात्यहिकं कर्म किं कर्तव्यं द्विजातिभिः ॥ 92

कश्श्रुतः परमो धर्मः साक्षान्मोक्षप्रदायकः ।
एतत्सर्वं मुनिश्रेष्ठ वक्तुमर्हसि साम्प्रतम् ।। 93

गौतमः आह -

भवद्भिः पृष्टमधुना सम्यगेव मुनीश्वराः ।
तत्सर्वमविशेषेण वक्ष्ये श्रृण्वन्तु सादरम् ।। 94

शिवमायापरिक्रान्ता ये यदा ते तदा द्विजाः ।
पापकर्मणि निष्णाता भविष्यन्ति न संशयः ।। 95

शिवमायामोहितानां दुराचारेषु सर्वदा ।
प्रीतिर्भवति तैरेव नरकेषु निपत्यते ।। 96

शिवमायामोहितानां वक्ष्ये कर्माण्यशेषतः ।
तैरेव कर्मभिर्ज्ञेयाः शिवमायाविमोहिताः ।। 97

त्यक्तं यैः श्रौतमनघं त्रिपुण्ड्रस्य च धारणम् ।
शिवमायामोहितास्ते नरकेषु पतन्ति च ।। 98

त्यक्तं यैः श्रौतमनघं नित्यं रुद्राक्षधारणम् ।
शिवमायामोहितास्ते नरकेषु पतन्ति च ।। 99

त्यक्तं यैः श्रौतमनघं शिवलिङ्गस्य पूजनम् ।
शिवमायामोहितास्ते नरकेषु पतन्ति च ।। 100

त्यक्तं यैः श्रौतमनघं महादेवाभिमर्शनम् ।
शिवमाया .... ॥ 101

त्यक्तं यैः श्रौतमनघं शिवतीर्थनिषेवणम् ।
शिवमाया .... ॥ 102

त्यक्तं यैः श्रौतमनघं शिवनामानुकीर्तनम् ।
शिवमाया .... ॥ 103

त्यक्तं यैः श्रौतमनघं शिवस्थानेषु नर्तनम् ।
शिवमाया .... ॥ 104

त्यक्तं यैः श्रौतमनघं बिल्वपत्रैः शिवार्चनम् ।
शिवमाया .... ॥ 105

त्यक्तं यैः श्रौतमनघं प्रदोषे शिवपूजनम् ।
शिवमाया .... ॥ 106

त्यक्तं यैः श्रौतमनघं श्रीमहादेववन्दनम् ।
शिवमाया .... ॥ 107

त्यक्तं यैः श्रौतमनघं शिवमन्त्रानुशीलनम् ।
शिवमाया .... ॥ 108

त्यक्तं यैः श्रौतमनघं रुद्राध्यायानुकीर्तनम् ।
शिवमाया .... ॥ 109

त्यक्तं यैः श्रौतमनघं श्रीमहादेवचिन्तनम् ।
शिवमाया .... ।। 110

त्यक्तं यैः श्रौतमनघं सोमवारव्रतं परम् ।
शिवमाया .... ।। 111

त्यक्तं यैः श्रौतमनघं शिवरात्रिव्रतं परम् ।
शिवमाया .... ।। 112

त्यक्तं यैः श्रौतमनघं महाकालाष्टमीव्रतम् ।
शिवमाया .... ।। 113

त्यक्तं यैः श्रौतमनघं शिवभक्ताभिवादनम् ।
शिवमाया .... ।। 114

त्यक्तं यैः श्रौतमनघं बिल्ववृक्षाभिवन्दनम् ।
शिवमायामोहितास्ते नरकेषु पतन्ति च ।। 115

अश्रौतकर्मनिरताः श्रौतकर्मविवर्जिताः ।
घोरे कलीयुगे प्राप्ते भविष्यन्ति द्विजाधमाः ।। 116

श्रौतं शिवार्चनं त्यक्त्वा करिष्यन्त्यन्यपूजनम् ।
घोरे कलियुगे प्राप्ते द्विजाः सङ्करवृत्तय. ।। 117

ऊर्ध्वपुण्ड्रं करिष्यन्ति द्विजा मृच्चन्दनादिभिः ।
त्यक्ष्यन्ति बाणलिङ्गेऽपि श्रीमहादेवपूजनम् ।। 118

ब्राह्मणः सन् स्वयं मोहात्तप्तमुद्रां बिभर्ति यः ।
स पतत्येवनरके यावदाचन्द्रतारकम् ।। 119

तस्मात्तत्त्याज्यमनवैद्विजैर्नरकभीरुभिः ।
ऊर्ध्वपुण्ड्रं धृत येन तेन तद्वंशजैः सह ।। 120

आब्रह्मकल्पं नरके स्थीयते नात्र संशयः ।
ऊर्ध्वपुण्ड्रं धृतं येन तस्य नैवास्ति निष्कृतिः ।। 121

न मुच्यते स पापिष्ठ. सुरापोऽपि विमुच्यते ।
ऊर्ध्वपुण्ड्रं धृतं येन .... ।। 122

न मुच्यते स पापिष्ठो ब्रह्महापि विमुच्यते ।। 123

ऊर्ध्वपुण्ड्रं भ्रमेणापि ललाटादौ बिभर्ति यः
तप्तकृच्छ्रं चरेत्सद्यः स तत्पापाद्विमुच्यते ।। 124

ऊर्ध्वपुण्ड्राङ्कितं दृष्ट्वा सद्यो भानुं विलोकयेत् ।
अन्यथा पातकी भूयात् इति जाबालवादिनः ।। 125

ब्रह्मणानां परो धर्मः श्रीमहादेवपूजनम् ।
तत्त्यक्तं येन विप्रेण स महापातकी भवेत् ।। 126

मनुष्येषु वयं श्रेष्ठा तथा तद्वत्सुरेष्वपि ।
स्वयं त्वजन्यो नित्यश्च निरीशश्च महेश्वरः ।। 127

अन्यानुत्पादयामास प्रथमं पार्वतीपतिः ।
शिवलिङ्गे कृता पूजा मोक्षाय परिकल्पते ॥ 128

पञ्चाक्षरेण मन्त्रेण शिवलिङ्गे शिवार्चनम् ।
यः करिष्यति यत्नेन स जीवन्मुक्त उच्यते ॥ 129

रुद्रमन्त्रैरविच्छिन्नमभिषेकं महेश्वरे ।
यः करिष्यति यत्नेन स जीवन्मुक्त उच्यते ॥ 130

चन्दनागरुकस्तूरीकर्पूराणि महेश्वरे ।
यः प्रयच्छति यत्नेन स जीवन्मुक्त उच्यते ॥ 131

कालागरुसमुद्भूतं धूपं शङ्करसन्निधौ ।
यः प्रयच्छति .... ॥ 132

दीपावलीमाज्यपूर्णां शिवलिङ्गस्य सन्निधौ ।
यः प्रयच्छति .... ॥ 133

क्षीरान्नं गोघृतप्लुष्टं सशर्करमुमापतेः ।
यः प्रयच्छति .... ॥ 134

प्रदक्षिणनमस्कारान् शिवलिङ्गस्य सादरम् ।
यः करोति प्रयत्नेन स जीवन्मुक्त उच्यते ॥ 135

कबले कबले भक्त्या महादेवानुकीर्तनम् ।
यः करोति प्रयत्नेन स जीवन्मुक्त उच्यते ॥ 136

गच्छंस्तिष्ठञ्श्वछयानो वा महादेवानुकीर्तनम् ।
यः करोति प्रयत्नेन स जीवन्मुक्त उच्यते ।। 137

गोक्षीरेण महादेवं योऽभिषिञ्चति सादरम् ।
स भुक्त्वा सकलान्भोगाञ्छिवलोकं गमिष्यति ।। 138

श्वेताक्षतैरपि स्वच्छैर्यः पूजयति शङ्करम् ।
स भुक्त्वा .... ।। 139

तिलाक्षतैरपि स्वच्छैर्यः पूजयति शङ्करम् ।
स भुक्त्वा .... ।। 140

घृतान्नेन गुडान्नेन यः शिवं पूजयिष्यति ।
स भुक्त्वा .... ।। 141

यो वै दुकूलवस्त्राद्यैः शम्भुं तं पूजयिष्यति ।
स भुक्त्वा .... ।। 142

यः सुवर्णेन रत्नैर्वा शङ्करं पूजयिष्यति ।
स भुक्त्वा .... ।। 143

यो महादेवभक्तानां परिचर्यां करिष्यति ।
स भुक्त्वा .... ।। 144

शरणं याति यः साम्बं मनोवाक्कायकर्मभिः ।
स भुक्त्वा सकलान् भोगान् शिवलोकं गमिष्यति ।। 145

अनन्यशरणा नित्यं शिवमेव भजन्ति ये ।
त एव धन्याः शैवाश्च कृतकृत्या न संशयः । 146

भजन्त्यनन्यभावेन भवानीरमणं प्रभुम् ।
भाग्यवन्तस्ततस्तेभ्यो नमो भूयो नमो नमः ।। 147

येषामन्त्यतनुर्विप्रास्त एव गिरिजापतिम् ।
अनन्यभावाः सततं भजन्त्यव्यभिचारतः ।। 148

येन सर्वाणि कर्माणि वैदिकानि महेश्वरे ।
समर्प्यन्तेऽनिशं तेन मुक्तिर्लभ्या न सशयः ।। 149

अत्यन्तदुर्लभा मुक्तिः प्राप्यते शिवपूजया ।
तादृशी शिवपूजैव कर्तव्या विधिवद्द्विजैः ।। 150

प्राणानायम्य सङ्कल्प्य स्नात्वोद्धूल्य च भस्मना ।
धृत्वा त्रिपुण्ड्ररुद्राक्षान्कर्तव्यं शिवपूजनम् ।। 151

महेश एव सम्पूज्यो मुक्त्यर्थिभिरहर्निशम् ।
यतो महेश्वरः साम्बो मुक्तिदः सर्वदेहिनाम् ।। 152

न रुद्रादपरो देवो भगवानिति गीयते ।
तस्मात्स भगवान्रुद्रो भजनीयो मुमुक्षुभिः ।। 153

भगवन्तमुमाकान्तं भजन्ति भवभीरवः ।
न रुद्रादपरो देवो भवभीमभयापहः ।। 154

यो "यो वै रुद्र" इत्यत्र वैकारो वर्तते द्विजाः ।
स एवकारस्तेनान्ययोग एव निषिध्यते ।। 155

भगवान्रुद्र एवेति वैकारेण विनिश्चिते ।
रुद्रान्यो भगवान्कोऽपि नेति निश्चीयते द्विजाः ।। 156

भगवन्तमुमाकान्तमनन्या ये भजन्ति तान् ।
नमस्कुर्मो नमस्कुर्मो नमस्कुर्मः पुनः पुनः ।। 157

शिवरुद्रमहादेव भगवन् शङ्करेश्वर ।
महेश्वरेति सततं वदन्त्वनुदिनं द्विजाः ।। 158

साम्ब शम्भो विरूपाक्ष विष्णुब्रह्मादिवन्दित ।
सदाशिवेति सततं वदन्त्वनुदिनं द्विजाः ।। 159

चन्द्रशेखर विश्वेश चन्द्रसूर्याग्निलोचन ।
परात्परेति सततं वदन्त्वनुदिनं द्विजाः ।। 160

अनन्तसोमसूर्याग्निप्रभाधिक महाप्रभो ।
विश्वनाथेति सततं वदन्त्वनुदिनं द्विजाः ।। 161

उमाकान्तामराराध्य भगवन्नीललोहित ।
ललाटाक्षेति सततं वदन्त्वनुदिनं द्विजाः ।। 162

हरामरेश शैलेशकन्याश्लिष्टवपुर्धर ।
कालकालेति सततं वदन्त्वनुदिनं द्विजाः ।। 163

कर्पूरगौर कामारे नरसिह्मनिषूदन ।
देवतासार्वभौमेति वदन्त्वनुदिनं द्विजाः ॥ 164

वामदेवामराधीश भसितोद्धूलनप्रिय ।
विश्वरूपेति सततं वदन्त्वनुदिनं द्विजाः ॥ 165

भव शङ्कर लोकेश शूलपाणे महेश्वर ।
शिवप्रियेति सततं वदन्त्वनुदिनं द्विजाः ॥ 166

उग्र भीम भवाराते भर्ग त्रिपुरसूदन ।
नीलकण्ठेति सततं वदन्त्वनुदिनं द्विजाः ॥ 167

विष्णुनेत्रार्चितानर्घ्य शरण्यपदपङ्कज ।
मृत्युञ्जयेति सततं वदन्त्वनुदिनं द्विजाः ॥ 168

त्रिकाग्निकाल कालज्ञ कालकूटविषाशन ।
कलिकल्मषापहेत्येवं वदन्त्वनुदिनं द्विजाः ॥ 169

खट्वाङ्गपाणे सर्वात्मन्नन्धकासुरसूदन ।
सर्वेश्वरेति सततं वदन्त्वनुदिनं द्विजाः ॥ 170

कैलासवासिन् गौरीश वृषाङ्क वृषभध्वज ।
सर्वोत्तमेति सततं वदन्त्वनुदिनं द्विजाः ॥ 171

काशीनाथाविमुक्तेश भवानीप्राणवल्लभ ।
उमासहाय चिद्रूप निरञ्जन निरामय ॥ 172

परमात्मेति [मरेति] सततं वदन्त्वनुदिनं द्विजाः ।
एतानि दिव्यनामानि महेशस्य महात्मनः ।। 173

जपनीयानि यत्नेन मुमुक्षुभिरहर्निशम् ।
स्मर्तव्योऽस्माभिरनिशं स्मरापस्मारनाशकः ।। 174

न हि स्मरहरादन्यः स्मर्तव्योऽस्माभिरन्वहम् ।
अतः संसारनाशाय स्मर्तव्यः परमेश्वरः ।। 175

शिवनामकुठारेण निर्मूलानि भवन्ति हि ।
संसारतरुमूलानां पातकं मूलमुच्यते ।। 176

तन्नाशस्तु भवत्येव शिवनामसकृज्जपात् ।
सादरं भस्मदिग्धाङ्गो वदेच्छिव शिवेति च ।। 177

स संसारविनिर्मुक्तो भवत्येव न संशयः ।
ये कुर्वन्ति शिवध्यानं भस्मरुद्राक्षभूषणाः ।। 178

ते भविष्यन्ति विप्रेन्द्राः शैवभूषणभूषिताः ।
अनेकजन्मभिर्नित्यं पुण्यं बहुकृतं यदि ।। 179

तदा शिवार्चने श्रद्धा भवेन्नामजपेऽपि च ।
शिवेति शिवदं नाम येनोच्चरितमादरात् ।। 180

तेन भूयो न संसारे प्रवेशः समवाप्यते ।
वाजपेयादिका यज्ञाः कृता येन विधानतः । 181

तेनैवोच्चार्यते भक्त्या शिवनाम शिवप्रदम् ।
कृतानि रत्नदानानि सत्पात्रे येन भूरिशः ॥ 182

तेनैवोच्चार्यते .... ।
कृतानि हेमदानानि सत्पात्रे येन भूरिशः ॥ 183

तेनैवो .... ।
कृतानि कन्यादानानि सत्पात्रे येन भूरिशः ॥ 184

तेनैवो .... ।
कृतानि गजदानानि सत्पात्रे येन भूरिशः । 185

तेनैवो .... ।
कृतानि गोप्रदानानि सत्पात्रे येन भूरिशः ॥ 186

तेनैवो .... ।
शिवपञ्चाक्षरी विद्या ब्रह्मविद्येति गीयते ॥ 187

सा विद्या शिवरूपैव मुक्तिदा जपतां नृणाम् ।
विद्यानामुत्तमा विद्या वेदविद्येति गीयते ॥ 188

तत्रापि वेदविद्यायां श्रीरुद्राध्यायमुत्तमम् ।
तत्राप्यत्युत्तमा विद्या शिवपञ्चाक्षरात्मिका ॥ 189

सैव विद्या महाविद्या मोक्षविद्येति गीयते ।
लोकानां प्रलये प्राप्ते लोका वेदे लयं गताः ॥ 190

ततः सर्वेऽपि वेदास्ते रुद्राध्याये लयं गताः ।
रुद्राध्यायो लयं प्राप्तः शिवपञ्चाक्षरे ततः ॥ 191

शिवपञ्चाक्षरः शुद्धो न कुत्रापि विलीयते ।
शिवपञ्चाक्षरो नाम ब्रह्मविद्येति कथ्यते ॥ 192

न परब्रह्मणो नाशः कदाचिदपि वस्तुतः ।
परंब्रह्मेति विज्ञेयं शिव इत्यक्षरद्वयम् ॥ 193

तद्ब्रह्मेति विदित्वैव तदुपास्यं मुमुक्षुभिः ।
तद्धि ब्रह्मेत्युपासीत भवति ब्रह्मवांस्ततः ॥ 194

ब्रह्मवान्ब्रह्मविद्भूत्वा ब्रह्मभूतो हि जायते ।
पञ्चाक्षरात्मकं ब्रह्म ज्ञेयं ब्रह्मेति वैदिकैः ॥ 195

न तद्ब्रह्मेदि विज्ञाय प्राप्नोति नरकं ध्रुवम् ।
अव्यक्तं परमं ब्रह्म शिवइत्यक्षरद्वयम् ॥ 196

तदेव सर्ववेदान्तैः प्रतिपाद्य न संशयः ।
पुराकैलासशिखरे सुखासीनं महेश्वरम् ॥ 197

पप्रच्छ परया भक्त्या पार्वती विनयान्विता ।

पार्वत्युवाच -

भगवन् श्रीमहादेव सर्वलोकशिवङ्कर । 198

अद्यैकं प्रष्टुमिच्छामि तद्वदस्व कृपानिधे ।
अष्टोत्तरसहस्रं तु नाम्नामुक्तं त्वया पुरा ॥ 199

तानि नामानि मुख्यानि मुक्तिदानि न संशयः ।
तत्राप्यत्युत्तमं नाम किमस्त्येकं वदस्व मे ॥ 200

यन्नामजपमात्रेण मुक्तिर्हस्तगता भवेत् ।

महादेव उवाच -

शिव इत्यस्ति यन्नाम तद्धि नामोत्तमोत्तमम् ॥ 201

तदेव परमं ब्रह्म तदेवाहं वरानने ।
शिवनामस्वरूपेण व्यक्तं ब्रह्माहमेव हि ॥ 202

शिवनामाहमेवेति विजानीहि यथार्थतः ।
तदव्यक्तं परं ब्रह्म वेदान्तप्रतिपादितम् ॥ 203

तत्तदेव विजानीहि शिव इत्यक्षरद्वयम् ।
इदं व्युत्पत्तिरहितं शिवनाम निरञ्जनम् ॥ 204

निराकारं परं ब्रह्म नैतस्माद्ब्रह्म विद्यते ।
उपासितव्यमेतद्धि ब्रह्मेत्यन्वहमादरात् ॥ 205

शिव इत्यक्षराकारमक्षरं ब्रह्म शाश्वतम् ।
नमःपूर्वं यकारान्तं ब्रह्मेदं चाद्य पूज्यते ॥ 206

ब्रह्मस्वरूपमाप्नोति ब्रह्मविद्ब्राह्मणो जनः ।
एवमेतद्ब्रह्मतत्वं यो विजानाति तत्वतः ॥ 207

स ब्रह्मविदिति ज्ञेयस्तदन्यो ब्रह्म(वि)तन्न हि ।
ब्रह्मकोशं चतुर्जालं यं मृत्युर्नावपश्यति ॥ 208

तदाप्यतीत्य प्राप्नोति ब्रह्म ब्रह्मविदीदृशम् ।
एवमुक्ता महाविद्या ब्रह्मविद्या मयाधुना ॥ 209

गोपनीया प्रयत्नेन नाख्येया यस्यकस्य चित् ।
इयं हि परमा विद्या मोक्षविद्येति गीयते ॥ 210

नातः परं मोक्षविद्या सर्वस्वमियमेव हि ।
तारकं ब्रह्म परमं शिव इत्यक्षरद्वयम् ॥ 211

नैतस्मादपरं किञ्चित्तारकं ब्रह्म सर्वथा ।
इदमेव परं ब्रह्म काश्यां मल्लिङ्गधारिणाम् ॥ 212

अन्तकालोपरक्तानां मया देव्युपदिश्यते ।
मल्लिङ्गमिति तज्ज्ञेयं केवलं भस्मधारणम् ॥ 213

रुद्राक्षधारणं तद्वत्केवलं लिङ्गपूजनम् ।
पञ्चाक्षरं जपेन्नित्यं रुद्राध्यायं जपेत्तथा ॥ 214

सोमवारव्रते निष्ठा मत्कथाश्रवणे रतिः ।
इमानि मम लिङ्गानि येषामव्यभिचारतः ॥ 215

तेभ्य एव पर ब्रह्म मया देव्युपदिश्यते ।
इदं यत्तारकं ब्रह्म शिवनामाभिधं शिवे ।। 216

एतस्मिन्ब्रह्मणि श्रद्धा न विना मदनुग्रहम् ।
अनन्तपुण्यपूतात्मा मदनुग्रहसंयुतः ।। 217

तारकं ब्रह्म परममिदं मत्वाधितिष्ठति ।
सर्वथा दीप्यते देवि न यस्मिन्मदनुग्रहः ।। 218

न तस्यात्र ब्रह्मबुद्धिर्जन्मकोट्यर्बुदैरपि ।
ब्रह्मबुद्धिः न यस्यात्र म ससारी भविष्यति ।। 219

पुनः पुनः स संसारी नरकं चाधिगच्छति ।
मदर्थं कोटिशो धर्माः कृता येनमुहुर्मुहुः ।। 220

तस्यात्र भवति श्रद्धा ब्रह्मबुद्धिश्च जायते ।
परं ब्रह्मेदमेवेति यो जानाति विशेषतः ।। 221

स न संसारभाग्भूयो भविष्यति वरानने ।
अनेककल्पपर्यन्तं तपस्तप्तं भवेद्यदि ।। 222

तदा ब्रह्मेदमेवेति विजानाति विशेषतः ।
अनेककल्पपर्यन्तं यदि मल्लिङ्गधृग्भवेत् ।। 223

तदा ब्रह्मेदमेवेति विजानाति विशेषतः ।
ब्रह्मविद्यामिमां देवि योऽन्यथा भावयिष्यति ।। 224

ब्रह्मविद्येयमधुना तुभ्यमुक्ता मया शिवे ।
न मयोक्ता पुरान्यस्मै सत्यं सत्यं न संशयः ।। 225

त्वयाप्यत्यन्तभक्ताय ब्रह्मविद्येयमुत्तमा ।
वक्तव्यातिविनीताय नान्यस्मै तु कदाचन ।। 226

विद्येयं गोपनीयैव प्रयत्नेन वरानने ।
यतो मोक्षप्रदा विद्या सेयमेवेति मन्महे ।। 227

त्वमत्यन्तप्रियासीति मोक्षविद्येयमम्बिके ।
तुभ्यमुक्ता मया प्रीत्या गोपनीयापि वस्तुतः ।। 228

गौतम उवाच -

इत्युक्तां परमां विद्यामिमां ज्ञात्वा तदा शिवा ।
आचख्यौ स्वकुमाराय षण्मुखाय शिवाज्ञया ।। 229

आचख्यौ नन्दिकेशाय कुमारो गिरिजाज्ञया ।
अगस्त्याय समाचख्यौ स कुमारज्ञया ततः ।। 230

अगस्त्यो मह्यमाचख्यौ नन्दिकेशाज्ञया ततः ।
युष्मभ्यमुक्ता विद्येयं प्रसङ्गादधुना मया ।। 231

इयं तु परमा विद्या दुर्लभा मोक्षदा द्विजाः ।
गोपनीया प्रयत्नेन ध्यातव्या च प्रयत्नतः ।। 232

सदाशिवशिवेत्येव शिवनामानुकीर्तनम् ।
कर्तव्यमतियत्नेन मुक्तिकामैरहर्निशम् ।। 233

यस्यास्त्यविकला बुद्धिः शिवनामानुकीर्तने ।
तस्मिन्ननुग्रहोऽस्त्येव महादेवस्य सन्ततम् ।। 234

शङ्करानुगृहीतानां शिवनामानुकीर्तनम्[ने] ।
भक्तिर्भवति नान्यषेयां सत्यं सत्यं न संशयः ।। 235

शिवेति नाम विमलं येन सादरमुच्यते ।
तेन घोरतरस्तूर्णं तीर्णः संसारसागरः ।। 236

शिवनामाग्निनेवायं घोरसंसारसागरः ।
शुष्यते तत्र सहसा नान्यदस्त्येव शोषकम् ।। 237

येन नोच्चारित प्रीत्या शिवनाम शिवात्मकम् ।
तेन सम्प्राप्यते भूयो यातना यमसद्मनि ।। 238

शिवनाम्नि न यस्यास्ति विश्वासो मोक्षदायके ।
तेन सम्प्राप्यते भूयो यातना यमसद्मनि ।। 239

अथवा प्राप्यते भूयो जन्म चण्डालयोनिषु ।
पुरा विन्ध्याचलप्रान्ते रेवातीरे मनोहरे ।। 240

बहुकालं स्थितं विप्रा मया मुनिवरैः सह ।
ततः परं मयोद्युक्तं काशीं गन्तुं मुनीश्वराः ।। 241

महर्षिप्रवरैः साकं ततः प्रचलितं मया ।
मध्येमार्गं क्वचिद्दृष्टः कुष्टः पूयपरिप्लुतः ।। 242

कृमिसङ्कुलसर्वाङ्गो मुमूर्षुः शुष्कतालुकः ।
सन्दश्यमानं कृमिभिर्दुःखं प्राप्यातिदारुणम् ।। 243

तदा शिव शिवेत्युक्त्वा जहौ प्राणान् सुदुःखितः ।
अयं शिव शिवेत्युक्त्वा मुमोचासूनतः परम् ।। 244

गतिः का भाविनीत्युक्त्वा मया तत्र स्थितं द्विजाः ।
ततः समागतास्तत्र कोटिशो यमकिङ्कराः ।। 245

नारायणाद्या देवाश्च ततस्तत्र समागताः ।
शैवोऽयं यमलोकाय नीतः कथमिति द्विजाः ।। 246

तानागतान्सुरान्दृष्ट्वा यमस्तान् शाङ्करानपि ।
भक्त्या सम्पूजयामास मामप्यर्घ्यादिभिर्द्विजाः ।। 247

यमः किं धर्मनिरतो नवायमिति शाङ्कराः ।
विज्ञातुं तस्य वृत्तान्तांस्थितांस्तूष्णीं विलोक्य तम् ।। 248

सम्पूज्य सादरं कालः स देवान् शिवकिङ्करान् ।
तमानीतं च संवीक्ष्य चित्रगुप्तमुवाच सः ।। 249

यम उवाच -

किमननेन कृतं पापं चित्रगुप्त वदस्व मे ।
कार्यं न मनुरूपेण सत्वरं शासनं मया ।। 250

चित्रगुप्तः –

कृतान्यनेन पापानि तेषामन्तो न विद्यते ।
कोटयो ब्रह्महत्यानामनेन बहुधा कृताः ।। 251

अनेनैव हि मत्तेन गोहत्याकोटयः कृताः ।
अनेनैव हि मत्तैन ब्रह्मस्वहरणं कृतम् ।। 252

कोटिशः पूर्वमेतेन दग्धा ब्राह्मणपुङ्गवाः ।
आब्रह्मकल्पपर्यन्तं यद्ययं नरके वसेत् ।। 253

तथापि नैतत्पापस्य विनाशः सम्भविष्यति ।
अयमेवं कृताघोऽपि स्वप्राणोत्क्रमणक्षणे ।। 254

स्वयं शिवशिवेत्याह सत्यमत्र न संशयः ।
शिवनामोच्चरणस्य वक्ष्येऽहं कारणं यम ।। 255

शृणुष्व सावधानेन यच्छ्रुत्वा प्रीतिमाप्स्यसि ।
अनेनैव वने पूर्वं दिष्टया दुष्कृतकर्मणा ।। 256

तस्मिन्नेव वने दृष्टः कश्चिच्छैवोऽतिदुर्बलः ।
तं दृष्ट्वा शैवमत्यन्तसन्तुष्टोऽयं तदा यम ॥ 257

चकार पोषणं तस्य स्वशक्त्या प्रीतिपूर्वकम् ।
तथा सम्पोषितः शैवस्तस्मै रुद्राक्षमुत्तमम् ॥ 258

विभूतिं च ददौ प्रीत्या दधारायं च तद्द्वयम् ।
तत्पुण्यस्य प्रभावेण सोऽयं देहव्ययक्षणे ॥ 259

शिवशब्द[नाम]द्वयं प्राह मोक्षपाथेयमद्वयम् । 260

गौतमः -

इत्युक्तं इद्वचः श्रुत्वा यमः सद्यः समुत्थितः ।
तत्पादमूले न्यपतत्सम्यक्कृत्वा प्रदक्षिणम् ॥ 261

ततः सिंहासने स्वीये नानारत्नविराजिते ।
उपवेश्यार्घ्यपाद्याद्यैः पूजयामास सादरम् ॥ 262

ततो बभाषे वचनं यमस्तान्स्वभटान्प्रति ।
कम्पयन् स्वभटान्सर्वान्भ्रुकुटीकुटिलोचनः ॥ 263

यम उवाच -

शिवनाम ब्रह्मरूपं यो वक्ति मरणक्षणे ।
स नात्र नेय इत्युक्तं भवद्भिर्विस्मृतं कथम् ॥ 264

शिवनाम ब्रह्मरूपं येनोक्तं मरणक्षणे ।
स पूज्यः सर्वथेत्युक्तं .... ॥ 265

महापातकयुक्तो वा युक्तो वा सर्वपातकैः ।
अन्तकाले शिवेत्युक्त्वा नायाति मम मन्दिरम् ॥ 266

मद्यपानादिकं कृत्वाप्यन्वहं यत्नपूर्वकम् ।
अन्तकाले .... ॥ 267

ब्रह्मस्वहरणं कृत्वाऽप्यन्वहं यत्नपूर्वकम् ।
अन्तकाले .... ॥ 268

यस्मिन्ननुग्रहः शम्भोस्तेनैव मरणक्षणे ।
शिवेत्युदीर्यते शव्दः शाक्षान्मोक्षप्रदायकः ॥ 269

येनैवोदीर्यते शव्दः शिवशव्दो मृतिक्षणे ।
तेनैव प्राप्यते मोक्षः स यतो मोक्षदायकः ॥ 270

शिवशव्दं समुच्चार्य ब्रह्महापि विमुच्यते ।
सर्वाणि शिवनामानि मोक्षदान्येव सर्वथा ॥ 271

तेष्वप्यत्युत्तमं नाम शिवेति ब्रह्मसंज्ञितम् ।
अघोरतरसंसारसागराप्लुतमप्लुतम् ॥ 272

उद्धरत्यन्तकालोक्तं शिवनाम शिवात्मकम् ।
शिवनामसमं वस्तु न दृष्टं क्वापि न श्रुतम् ॥ 273

रत्नरत्नमिदं नूनं नामरत्नमनुत्तमम् ।
नित्यं कण्ठे धृतो येन शिवनाममहामणिः ॥ 274

स नीलकण्ठो भूत्वान्ते नीलकण्ठे विलीयते ।
ब्रह्मप्रकाशकं साक्षाच्छिव इत्यक्षरद्वयम् ॥ 275

न तस्मादधिकं क्वापि नाम ब्रह्मप्रकाशकम् ।
प्रतिक्षणं शिवेत्येव नाम यो वक्तुमिच्छति ॥ 276

तस्मै नमो नमो भूयो नमस्तस्मै नमो नमः ।
यः श्रृणोति शिवेत्येव नाम भक्तिपुरःसरम् ॥ 277

तस्मै नमो .... ।
शिवेति नाम श्रुत्वैव यो हृष्टहृदयो भवेत् ॥ 278

तस्मै नमो .... ।
शिवेति नामपीयूषं यः पिबत्यन्वहं मुदा ॥ 279

तस्मै नमो .... ।
शिवनाम्नैव सततं व्यवहारं करोति यः ॥ 280

तस्मै नमो .... ।
महाप्रलयकालाग्निर्यथा दहति पर्वतान् ॥ 281

तथा दहति पापाद्रीन् शिवनामानलो ध्रुवम् ।
शिवनामविनाश्यानि पातकान्यमितान्यतः ॥ 282

महाघनाशकं नाम नमिताघौघनाशकम् ।
अनन्तान्यपि पापानि शिवनाम्नि स्मृते परम् ॥ 283

सद्यो विनाशयत्येव विचित्राण्यपि सत्वरम् ।
अन्तकाले शिवेत्युक्त्वा यस्तुप्राणान्विमुञ्चति ॥ 284

स सर्वथात्र नानेयः स यतः शाङ्करो जनः ।
शाङ्करा नैव पश्यन्ति दुष्टं मम निकेतनम् ॥ 285

अत एवात्र नानेयाः शाङ्कराः शङ्करप्रियाः ।
यस्याङ्गे शाङ्करं चिह्नं स नानेयोऽत्र सर्वथा ॥ 286

यतः स शङ्कराङ्काङ्कः शाङ्करः शङ्करप्रियः ।
शङ्कराङ्कानि वक्ष्यन्ते तानि शृण्वन्तु सादरम् ॥ 287

यदङ्कश्रवणेनापि पापनाशो भविष्यति ।
रुद्राक्षधारणं शुद्धं केवलं भस्मधारणम् ॥ 288

केवला शिवपूजा च शङ्कराङ्कमिति श्रुतिः ।
शिवनामानुसन्धानं रुद्राध्यायानुवर्तनम् ॥ 289

उद्धूलनं च सर्वाङ्गे शङ्कराङ्कमिति श्रुतिः ।
सोमवारव्रते श्रद्धा तथा शिवकथाश्रुतौ ॥ 290

शिवभक्तजनप्रीतिः शङ्कराङ्कमिति श्रुतिः ।
इमानि केवलान्येव शिवाङ्कानि तथा श्रुतिः ॥ 291

इमान्यङ्कानि यस्याङ्के केवलानि स शाङ्करः ।
एतादृशाः शाङ्करास्तु नायान्ति मम मन्दिरम् ॥ 292

शाङ्कराः शङ्कराङ्काङ्का निरातङ्का निरङ्कुशाः ।
भुवि विन्यस्तपर्यङ्काः प्रयान्त्येव हि शङ्करम् ॥ 293

अद्य प्रभृति नानेयः शाङ्करोऽत्र कदाचन ।
यद्यत्रानीयते मोहात् युष्मान्हिंस्याम्यहं तदा ॥ 294

शिक्षैवमेव क्रियते प्रत्यहं सादरं मया ।
तथापि भवतां बुद्धिरन्यथैव हि जायते ॥ 295

गौतमः आह -

इत्युक्त्वा क्रोधसंविष्टो गृहीत्वा वेत्रमायतम् ।
ताडयामास बहुधा तदा यमभटान्यमः ॥ 296

ततः परं पुनः सर्वान्पूजयामास शाङ्करान् ।
देवाश्चातीव विनयात्पुष्पैर्मामिप्यपूजयन् ॥ 297

ततस्ते शाङ्कराः सर्वे तं गृहीत्वा विमानगम् ।
अतीत्य सत्यलोकादीन्ययुः शङ्करमन्दिरम् ॥ 298

ततस्तान्प्रस्थितान् दृष्ट्वा वैकुण्ठोपरि सत्वरम् ।
आदिविष्णुरयं सम्यक्पूजयामास सादरम् ॥ 299

ततः स समभूद्विप्रः शिवे लीनः शिवाज्ञया ।
शिवनामस्मृतिफलं तस्य लब्धं तथा तदा ॥ 300

ततः शिवेति नामैव जपनीयं मुमुक्षुभिः ।
सर्वं विहाय सततं यत्नपूर्वकमादरात् ॥ 301

शिवनामजपः कार्यो कार्यं च शिवपूजनम् ।
विभूतिधारणं कार्यं कार्यं रुद्राक्षधारणम् ॥ 302

कुलधर्मोऽयमस्माकं केवलं शङ्कराचंनम् ।
कुलधर्मोऽयमस्माकं केवलं शिवचिन्तनम् ॥ 303

कुलधर्मोऽयमस्माकं केवलं शिवसेवनम् ।
कुलधर्मोऽयमस्माकं केवलं भस्मधारणम् ॥ 304

कुलधर्मोऽयमस्माकं शुद्धरुद्राक्षधारणम् ।
कुलधर्मोऽयमस्माकं केवलं शैवपूजनम् ॥ 305

स चण्डाल इति ज्ञेयो जन्मजन्मान्तरे द्विजाः ।
न यस्य कुलधर्मोऽयं पञ्चाक्षरजपः परः ॥ 306

स चण्डाल इति ज्ञेयो जन्मजन्मान्तरे द्विजाः ।
न यस्य कुलधर्मोऽयं रुद्रध्यायानुवर्तनम् ॥ 307

स चण्डाल इति ज्ञेयो जन्मजन्मान्तरे द्विजाः ।
न यस्य कुलधर्मोऽयं केवलं शङ्कराचंनम् ॥ 308

स चण्डाल इति ज्ञेयो जन्मजन्मान्तरे द्विजाः ।
न यस्य कुलधर्मोऽयं श्रद्धा शिवकथाश्रुतौ ।। 309

पुरा कश्चिद्द्विजो विप्रः शिवपूजापरायणः ।
उवास हिमवत्प्रान्ते नित्यं वन्यफलाशनः ।। 310

तत्र कश्चन भिल्लोऽभूत् स तु ब्रह्मवधप्रियः ।
स समागत्य तं विप्रं तदा हन्तुं समुद्यतः ।। 311

उवाच स तदा भीत्या भिल्लं भल्लकरं द्विजः ।। 312

द्विज उवाच -

भिल्ल मां भल्लहस्तः सन् किमर्थं हन्तुमिच्छसि ।
ब्रह्मणोऽहमहं शैवो मम हत्याऽतिदुःखदा ।। 313

इत्युक्तं तद्वचः श्रुत्वा भिल्लः प्रोवाच तं द्विजम् ।
ब्रह्महत्यां विना विप्र न मया भुज्यते द्विज ।। 314

इति भिल्लवचः श्रुत्वा तमुवाच ततो द्विजः ।
शैवहत्या न कर्तव्या दुःखदा सा भविष्यति ।। 315

तमुवाच ततो भिल्लः शैवः किंलक्षणो द्विज ।
यस्य हत्या दुःखदा स्यादिति नम्रमुखो द्विजाः ।। 316

द्विज उवाच -

क्रियते येन सततं केवलं शिवचिन्तनम् ।
स शैव इति विज्ञेयस्तस्य हत्यातिदुःखदा ॥ 317

क्रियते येन सततं केवलं भस्मधारणम् ।
स शैव इति .... ॥ 318

क्रियते येन सततं केवलं शङ्करार्चनम् ।
स शैव इति .... ॥ 319

शुद्धां शिवकथां यस्तु शृणोति श्रद्धया सदा ।
स शैव इति .... ॥ 320

शैवं पञ्चाक्षरं नित्यं यो जपेद्भक्तिपूर्वकम् ।
स शैव इति .... ॥ 321

श्रीरुद्राध्ययनं नित्यं यः करोति प्रयत्नतः ।
स शैव इति विज्ञेयस्तस्य हत्याऽतिदुःखदा ॥ 322

कृतधर्मोऽपि बहुधा शैवहा नैव मुच्यते ।
शैवो यतः शङ्करस्य साक्षादनुचरः स्मृतः ॥ 323

किञ्चान्यदपि वक्ष्येऽहं परलोकहितं तव ।
तच्छृणुष्वापि यत्नेन चित्तमन्यत्र मा कुरु ॥ 324

शिवलिङ्गमिहास्त्येकमेतस्य कुरु पूजनम् ।
नित्यं बिल्वदलैः पुष्पैः सनिर्झरजलैर्मुदा ।। 325

नित्यमेतस्य लिङ्गस्य पूजनं चेत्करिष्यसि ।
तदा पापानि सर्वाणि विनश्यन्त्येव सर्वथा ।। 326

गौतम उवाच -

इत्युक्तं तद्वचः श्रुत्वा गुरुं मत्वा च तं द्विजम् ।
ततः परमभूद्भिल्लो निवृत्तस्तद्वधाद् द्विजाः ।। 327

स तु कृत्वापि पापानि बिल्वपत्रैर्महेश्वरम् ।
पूजयामास सततं पुष्पैरपि जलान्वितैः ।। 328

अथैकदा स वर्षतौं जगाम गहनं वनम् ।
तत्र बिल्वतरूनुच्चान्ददर्श बहुपल्लवान् ।। 329

प्रहृष्टवदनो जातः स विल्वतरुदर्शनात् ।
आरुरोह ततो भिल्लो बिल्ववृक्षमनुत्तमम् ।। 330

बहूनि बिल्वपत्राणि गृहीत्वैव ततःपरम् ।
अरण्यकदलीपत्रेष्ववस्थाप्य बबन्ध सः ।। 331

तदा मृत्युः सर्परूपी तं भिल्लं हन्तुमुद्यतः ।
न शशाक तदा हन्तुं भिल्लं बिल्वार्चनप्रियम् ।। 332

कदलीपत्रसम्बद्धबिल्वपत्रान्तरे तदा ।
प्रविष्टः सर्परूपेण मृत्युस्तद्धरणेच्छया ।। 333

अयं यदा बिल्वपत्राण्यधः संस्थापयिष्यति ।
तदैवेनं हनिष्यामि विषदंष्ट्रैर्न संशयः ।। 334

मृत्युरेवं विचार्यैव बिल्वपत्रान्तरे स्थितः ।
भिल्लः स बिल्वपत्राणि गृहीत्वैव ययौ ततः ।। 335

ततः शिवालये गत्वा भिल्लो बिल्वदलैः शिवम् ।
पूजयामास यत्नेन भस्मधारणपूर्वकम् ।। 336

ततः स मृत्युस्तं दृष्ट्वा भिल्लं शङ्करपूजकम् ।
स्वस्वरूपं समास्थाय तमुवाच कृताञ्जलिः ।। 337

मृत्युरुवाच -

कालमृत्युरहं भिल्ल भवन्तं हन्तुमुद्यतः ।
अहं हन्तुं न शक्नोमि भवन्तं शङ्करार्चकम् ।। 338

सर्परूपं समासाद्य पूर्वमेव समागतम् ।
बिल्वपत्रार्चनासक्तं तवचित्तमभूत्तदा ।। 339

तदा स्प्रष्टुमशक्तेन प्रविष्टं बिल्वसम्पुटे ।
इदानीं सुतरां स्प्रष्टुं न शक्नोमि शिवार्चकम् ।। 340

यः पूजयति यत्नेन मृत्युञ्जयमुमापतिम् ।
तस्य मृत्युभयं नास्ति यथा तव तथा ध्रुवम् ॥ 341

अकुण्ठितं हि गमनं मम सर्वत्र यद्यपि ।
तथापि शिवभक्तेषु कुण्ठितं गमनं मम ॥ 342

वरं वृणु वरं दास्ये भिल्लनायक सत्वरम् ।
विलम्बं मा कुरुष्वाद्य मम गन्तव्यमस्ति हि ॥ 343

गौतम उवाच -

इत्युक्तो मृत्युना भिल्लो ययाचे वरमुत्तमम् ।
वरेण येन स्वस्याग्रे प्रसीदति महेश्वरः ॥ 344

भिल्लः -

ममास्त्वविकला बुद्धिर्मृत्यो शङ्करपूजने ।
एतावता भविष्यामि कृतकृत्यो न संशयः ॥ 345

मन्त्रमात्रं न जानामि मृत्यो शङ्करपूजने ।
तथापि गिरिजानाथः करोत्येव कृपां मयि ॥ 346

मृत्युरुवाच -

इत एव वरो भिल्ल तवाभिलषितो मया ।
चेतः शङ्करपूजायां स्थिरं भवतु ते सदा ॥ 347

नित्यं शिवेति मन्त्रेण पूजयस्व सदाशिवम् ।
नैतस्मादुत्तमो मन्त्रः श्रेष्ठो वेदेष्वपीरितः ।। 348

अयमेव महामन्त्रो मोक्षदः शङ्करात्मकः ।
अयमेव सदा ध्येयो मन्त्रो मुक्त्यर्थिभिर्नरैः ।। 349

एतन्मन्त्रस्य महात्म्यं शिवो वेद न चेतरः ।
वेदैरपि न विज्ञातं तत्वमस्य मनोर्ध्रुवम् ।। 350

एतस्य तत्वं विज्ञातुं यतन्ते योगिनः सदा ।
तथापि तत्वमेतस्य ज्ञातुमेव न शक्यते ।। 351

तत्त्वं तु शिवमन्त्रस्य येन ज्ञातं भविष्यति ।
तेन तीर्ण इति ज्ञेयो घोरसंसारसागरः ।। 352

शिवेति यः परो मन्त्रः स परंब्रह्म कथ्यते ।
परब्रह्मस्वरूपं तु ततो ज्ञातुं न शक्यते ।। 353

तथापि परमो मन्त्रः शिवमन्त्रः श्रुतिश्रुतः ।
ततस्तेनैव मन्त्रेण पूजनीयः सदाशिवः ।। 354

नित्यं महेशपूजा चेत्क्रियते भक्तिपूर्वकम् ।
तदा नश्यन्ति पापानि बुद्धिपूर्वकृतान्यपि ।। 355

ब्रह्महत्यादिपापानि विविधान्यमितान्यपि ।
विनश्यन्ति क्षणेनैव श्रीमहादेवपूजया ।। 356

शतलक्षं पुरा विप्राः सम्पाद्य धनमुत्तमम् ।
स्वदेशं गन्तुमुद्युक्ता विन्ध्याचलमुपाययुः ।। 357

तदा विन्ध्याचले कश्चिद्ब्राह्मणो ब्रह्महा स्थितः ।
बिल्वार्चनस्य माहात्म्यं श्रुतं तेन पुरा मुदा ।। 358

बिल्वपत्रैर्महादेवं यः पूजयति शङ्करम् ।
स विधायापि पापानि न प्राप्नोत्येव तत्फलम् ।। 359

विल्वपत्रार्चनफलं श्रुत्वैवं हृष्टमानसः ।
बिल्वपत्रैर्महादेवं स संपूज्य स्थितः सदा ।। 360

ब्रह्महत्यां स कृत्वैवमेकं बैल्वदलं मुदा ।
समादायातियत्नेन समर्चयति शङ्करम् ।। 361

एवं स्थितेन तेनैव कोटिशो ब्राह्मणा हताः ।
तथान्यान्यपि पापानि कृतान्यगणितानि हि ।। 362

शतलक्षं द्विजास्तेन निहता धनलोभतः ।
स धनं बहु सम्प्राप्य हत्वा तान्द्विजपुङ्गवान् ।। 363

शतलक्षं बिल्वपत्राण्यादाय स ततः परम् ।
धृत्वा च भस्मरुद्राक्षान्पूजयामास त शङ्करम् ।। 364

एवमेव स्थितः पूर्वं स मृतस्तदनन्तरम् ।
ततः शिवप्रसादेन गाणपत्यमवाप सः ।। 365

कोटयो ब्रह्महत्यानां गोहत्यानां च कोटयः ।
सद्यःफलमदत्वैव नश्यन्ति शिवपूजया ।। 366

कोटयो भ्रूणहत्यानामगम्यागमकोटयः ।
सद्यःफलं .... ।। 367

ब्रह्महत्याद्यनन्तानि पापानि विविधान्यपि ।
विनश्यन्ति न सन्देहः सकृन्मृत्युञ्जयार्चनात् ।। 368

नव्यैर्बिल्वदलैरीशं संपूजयति यः पुमान् ।
स वंशकोटिसंयुक्तः शिवलोकं प्रयास्यति ।। 369

बिल्वपत्रैर्महादेवं भस्मधारणपूर्वकम् ।
यः पूजयति यत्नेन स सम्प्राप्नोति शङ्करम् ।। 370

अनन्यशरणो यस्तु महेशं पूजयिष्यति ।
तेन न प्राप्यते दुःखं मत्कृतं च किमन्यतः ।। 371

कालमृत्युर्महामृत्युरहमेवास्मि दुःखदः ।
ममाद्यैतादृशस्यापि न शक्तिस्त्वयि शाङ्करे ।। 372

नाश्चर्यमिदमत्यन्तं शाङ्करे शक्तिकुण्ठनम् ।
बहुधा मम जातं हि शाङ्करे शक्तिकुण्ठनम् ।। 373

दुःखं च मम नास्त्येव शाङ्करे शक्तिकुण्ठनम्(ने) ।
ममापि शासका यस्माच्छाङ्कराः शङ्करप्रियाः ।। 374

न मृत्युभयमाप्नोति श्रीमृत्युञ्जयपूजकः ।
सर्वथा सत्यमित्याह जाबालोपनिषत्स्वयम् ।। 375

अशाङ्करार्थं सृष्टोऽस्मि शङ्करेण पुरा ततः ।
अशाङ्करेषु मे शक्तिः कुण्ठिता न भविष्यति ।। 376

प्राप्यं मृत्युकृतं दुःखममृत्युञ्जयपूजकैः ।
मृत्युञ्जयाराधकैस्तु तन्नैव प्राप्यते ध्रुवम् ।। 377

मृत्युञ्जयान्याः सर्वेऽपि जन्ममृत्युजरादिभिः ।
पुनः पुनः परिक्रान्ताः दुःखिताः सन्ति सर्वथा ।। 378

नित्यमव्यभिचारेण प्रमादेनविना शिवम् ।
यः पूजयति यत्नेन स न जन्मादिभाग्ध्रुवम् ।। 379

विष्णुः पुरा महादेवं पूजयामास सादरम् ।
शिवार्चनेन सम्प्राप्तो वैकुण्ठस्तेन विष्णुना ।। 380

वैकुण्ठलोकं स प्राप्य गर्वितोऽभूज्जनार्दनः ।
तेन गर्वेण गौरीशमनभ्यर्च्य स्थितः पुरा ।। 381

ततस्तेनैव पापेन मत्स्ययोनिमुपागतः ।
महापापफलं ज्ञेयं मत्स्यजन्म मनीषिभिः ।। 382

मत्स्यगर्भनिवासस्तु नरकादतिरिच्यते ।
शिवोऽपि पुनरन्यस्मै दत्वा विष्णुत्वमादरात् ।। 383

सुदर्शनं ददौ तस्मै वैकुण्ठमपि सौख्यदम् ।
ददाति पूजितः शम्भुरदेयमपि सादरम् ।। 384

अपूजितस्तु संसारे पातयत्येव सर्वथा ।
अस्य दत्वापि वैकुण्ठं विष्णवे पुनरीश्वरः ।। 385

पातयामास संसारे विष्णुमेव स गर्वितम् ।
एवं ब्रह्मादिकान्सर्वान्गर्वितान्पार्वतीपतिः ।। 386

पातयत्येव संसारे पुनः पुनरधीश्वरः ।
विष्णुब्रह्मादिकान्हत्वा सर्वानपि महेश्वरः ।। 387

गणैराराधितः काश्यामुमया सह तिष्ठति ।
पुनः सृष्ट्वा जनान्साम्बः कस्मैचित्तदनन्तरम् ।। 388

दत्वा विष्णुत्वमन्यस्मै ब्रह्मत्वं च ददाति सः ।
इन्द्रत्वादिपदान्येवमन्येभ्योऽपि महेश्वरः ।। 389

ददाति स्वेच्छया लोकान्सृष्ट्वा पाति च हन्ति च ।
संहारेच्छा यदा शम्भोः सर्वज्ञस्यामितौजसः ।। 390

तदा संहृत्य सकलं स्वयमेकोऽधितिष्ठति ।
सिसृक्षया पुनः साम्बः सृष्ट्वा सर्वमिदं जगत् ।। 391

स एव पालनेच्छयां पालयत्येव शङ्करः ।
उत्पत्तिस्थितिसंहारा जायन्ते शङ्करेच्छया ।। 392

तत्र यत्नं महादेवो न करोत्येव सर्वथा ।
शिवेच्छयैव कार्याणि सिध्यन्त्याभूतसम्प्लवम् । 393

तथा च यत्नं कुत्रापि न करोत्येव शङ्करः ।
तत्रैव यत्नः क्रियते स्वेच्छया यन्न सिध्यति ॥ 394

स्वेच्छामात्रेण सिद्धेऽर्थे न यत्नस्य प्रयोजनम् ।
देवतासार्वभौमस्य स्वतन्त्रस्य पिनाकिनः ॥ 395

इच्छामात्रेण सिध्यन्ति सर्वकार्याणि सर्वदा ।
एतादृशं महादेवमप्रमादेन सर्वथा ॥ 396

यः पूजयति यत्नेन स संसारं तरिष्यति ।
संसारतरणोपायः शङ्करस्यैव पूजनम् ॥ 397

यतः स शङ्करः साम्बो भक्तसंसारतारकः ।
परन्त्वव्यभिचारेण शङ्करस्यैव पूजनम् ॥ 398

यः करोति स संसारं तरत्येव हि सर्वथा ।
संसारतरणापेक्षा यस्य जन्तोर्भविष्यति ॥ 399

तेन सर्वात्मना त्याज्यं शिवान्यसुरपूजनम् ।
शङ्करान्ये सुराः सर्वे यतः संसारिणस्ततः ॥ 400

तदर्चनं तु संसारतारकं न भविष्यति ।
येन तीर्णः स संसारः सोऽन्यं तारयितुं क्षमः ॥ 401

संसारिणं न संसारी तारयिष्यति सर्वथा ।
अन्धो यथान्धसंलग्नः पतत्येव पदे मदे ।। 402

तथा पतति संसारे शङ्करान्यसुरार्चकः ।
शिवः पशुपतिर्नित्यः पशुपाशविमोचकः ।। 403

यतः पशुपतिर्दृष्टः पशुपाशविमोचकः ।
विष्णुब्रह्मादयो देवा मर्त्याश्च पशवःस्मृताः ।। 404

तत्पाशमोचको देवः शिवः पशुपतिः स्मृतः ।
तेषां पशूनां पाशो यः स संसारस्तथा सति ।। 405

तन्मोचको महादेवादपरो नास्ति सर्वथा ।
पशुवाशविमोक्षाय सेव्यः पशुपतिः सदा ।। 406

तस्मात्पशुपतिं साम्बं पशुपाशविमोचकम् ।
पूजयस्वाप्रमादेन नित्यमव्यभिचारतः ।। 407

रहस्यमिदमाख्यातं भिल्ल सर्वं मयाधुना ।
दृष्ट्वाद्य शङ्करे भक्तिं बिल्वार्चनरतस्य ते ।। 408

गौतम उवाच -

एवमुक्त्वा ययौ मृत्युर्भिल्लेनाभ्यर्चितो द्विजाः ।
अथ भिल्लस्तु मृत्यूक्तं सर्वं स्वगुरवेऽवदत् ।। 409

स गुरुस्तद्वचः श्रुत्वा सन्तुष्टहृदयस्तथा ।
तमुवाचाथ सन्तुष्टं भिल्लं बिल्वार्चनप्रियम् ।। 410

द्विज उवाच -

यद्यदुक्तं मृत्युनाद्य तत्तत्सत्यं न संशयः ।
एवमेव वदन्त्यन्ये मुनयो ब्रह्मवादिनः ।। 411

तत्त्वमेतद्धि वेदानां यदुक्तं मृत्युनाद्य वै ।
तत्त्वमेतद्धि विज्ञातमद्य भाग्यवशात्त्वया ।। 412

तव भाग्यस्य नान्तोऽस्ति तत्वज्ञस्य महात्मनः ।
अतो भाग्यवतो भिल्ल शिवार्चनरतस्य ते ।। 413

दुर्लभं नास्ति लोकेऽस्मिन्नित्यनेनानुमीयते ।
अद्यप्रभृति यत्नेन भस्म धृत्वैव केवलम् ।। 414

पूजयस्व महादेवमप्रमादेन सन्ततम् ।। 415

गौतम उवाच -

इत्युक्तस्तेन गुरुणा स भिल्लो वीतकिल्बिषः ।
पूजयित्वा स्थितो नित्यं बिल्वपत्रैर्महेश्वरम् ।। 416

भिल्लो वन्यमृगान्हत्वा तन्मांसं घृतपाचितम् ।
निवेद्य परमेशाय तदश्नाति प्रयत्नतः ।। 417

नवानि बिल्वपत्राणि पुष्पाणि विविधानि च ।
मांसं चोत्तममादाय सम्पूजयति शङ्करम् ।। 418

विहङ्गा बिल्वशाखासु मा तिष्ठन्त्विति सायकैः ।
स हन्ति भूरिशो नित्यं नानारूपविहङ्गमान् ।। 419

तेनावरुद्धा विप्रेन्द्राः कोटिशो बिल्वभूरुहाः ।
वनद्विपाश्च निहतास्तेन बिल्वाशनप्रियाः ।। 420

नवानि भिल्वपत्राणि सोदकानि प्रयत्नतः ।
समादायातियत्नेन पूजयामास शङ्करम् ।। 421

बिल्वपत्रैर्महादेवं संपूज्य स पिबत्यपः ।
तदभावे जलं भिल्लो न पिबत्येव सर्वथा ।। 422

एवं नियममासाद्य स भिल्लस्तत्र संस्थितः ।
तेनैव नियमेनेशः सन्तुष्टोऽभूत्कृपानिधिः ।। 423

ततः कदाचित्तद्धैर्यं द्रष्टुकामो महेश्वरः ।
बिल्वपत्राण्यदृश्यानि चकार स्वेच्छया शिवः ।। 424

अदृष्ट्वा बिल्वपत्राणि स भिल्लो विस्मयं गतः ।
चचारारण्यमखिलं बिल्वपत्रगवेषकः ।। 425

शीतलोदकसंवीतं तटाकं कञ्चिदैक्षत ।
तृषार्तः क्षुत्परिश्रान्तः शुष्ककण्ठोऽपि तज्जलम् ।। 426

न पपौ विल्वपत्राणि न लब्धानीति दुःखितः ।
तदानीं मानुषं वेषं धृत्वा गौरीपतिः शिवः ।। 427

आजगाम तदभ्याशं लीलास्वीकृतविग्रहः ।
ततो भिल्लमुवाचेदं महादेवः कृपानिधिः ।। 428

ईश्वरः -

शीतं जलं तटाकस्थं गृहीत्वा स्वर्णभाजने ।
"जलं पिबेदममलं शीतं क्षुत्तृड्विनाशकम् ।। 429

भक्षयेदं नवं पक्वमरण्यकदलीफलम्" ।
इत्युक्तं तद्वचः श्रुत्वा भिल्लस्तं प्रत्युवाच सः ।। 430

शनैरतिप्रयासेन शुष्कजिह्वाग्रतालुकः ।। 431

भिल्लः -

नियमेन मया नित्यं बिल्वपत्रैर्महेश्वरः ।
पूज्यते बिल्वपत्राणि न प्राप्तानि मयाद्य तु ।। 432

अनर्चितमहेशेन पीयते न जलं मया ।
ततः कथमिदं पक्वं भक्षणीयं वद द्विज ।। 433

ईश्वरः -

जीवनं चेत्तदा नित्यं पूजयस्व महेश्वरम् ।
तृषया मरणं चेत्स्यात्पूजनीयः कथं शिवः ।। 434

धर्मः कार्यः प्रयत्नेन देहरक्षणपूर्वकम् ।
उपेक्षा नैव कर्तव्या शरीरे धर्मसाधने ।। 435

पूजनीयः कथं शम्भुः शरीरविगमे सति ।
एतच्छरीरमेवाद्यं शङ्करार्चनसाधनम् ।। 436

पूजा तु षड्विधा प्रोक्ता शङ्करस्य कृपानिधेः ।
सा षडिन्द्रियसाध्यैव तानि देहाश्रितानि हि ।। 437

द्रष्टव्यः श्रीमहादेवः पूजितश्चक्षुषा ततः ।
तदभावे कथ वा स्याच्चक्षुषा शिवदर्शनम् ।। 438

श्रोतव्यानि प्रयत्नेन शिवनामानि सन्ततम् ।
ततः श्रोत्रेन्द्रियाभावे तन्नामश्रवणं कथम् ।। 439

कर्तव्यमतियत्नेन शिवनामानुकीर्तनम् ।
ततस्तद्रसनाभावे कथं तन्नामकीर्तनम् ।। 440

शिवार्पितं विल्वपत्रमाघ्रेयमतिभक्तितः ।
ततस्तद्घ्राणविरहे तदाघ्रेयं कथं भवेत् ।। 441

शिवाभिमर्शनं कार्यं प्रयत्नेनान्वहं ततः ।
त्वगिन्द्रियस्य विरहे क्व शिवस्याभिमर्शनम् ॥ 442

चिन्तनीयः प्रयत्नेन मनसा पार्वतीपतिः ।
तच्चिन्तितं मनःसाध्यं तदभावे कथं भवेत् ॥ 443

सर्वाणीन्द्रियसाध्यानि तानि देहाश्रितान्यतः ।
देहसंरक्षणं कार्यं यत्नैर्नानाविधैरपि ॥ 444

प्रदक्षिणनमस्काराः शङ्कराय प्रयत्नतः ।
कर्तव्यास्ते कथं कार्याः शरीरेण विना वद ॥ 445

इति श्रुत्वा वचस्तस्य भिल्लो वाक्यमथाब्रवीत् ॥ 446

भिल्ल उवाच -

बिल्वपत्रैर्महादेवं यद्यनभ्यर्च्य भुञ्जते ।
भुञ्जते पापमित्येषा श्रुतिरर्थपरैव हि ॥ 447

शिवं बिल्वैरनभ्यर्च्य न पेयमुदकं द्विजैः ।
पिबेद्यदि स पापी स्यादिति श्रुतिभिरीरितम् ॥ 448

पेयं जलादिकं सर्वैः शिवाराधनपूर्वकम् ।
आपद्यपि न भोक्तव्यं न पेयं चोदकं द्विजैः ॥ 449

महादेवमनभ्यर्च्येत्यपि द्विज पराश्रुतिः ।
एतादृशशरीरस्य नोपयोगो ममाधुना ॥ 450

शरीरं त्याज्यमेवेदमेकवारमसंशयम् ।
वारद्वयं न मर्तव्यं देहेनैकेन सर्वथा ।। 451

एकवारं च मर्तव्यं तदद्यैव भविष्यति ।
नवबिल्वैरनभ्यर्च्य शिवलिङ्गं कथं मया ।। 452

पेयं जलमिदं स्वच्छं भक्षणीयं फलं तथा ।
अद्यवाब्दशतान्ते वा शरीरं मम गच्छतु ।। 453

बिल्वैः शिवमनभ्यर्च्य न पास्येऽहं जलं ध्रुवम् । 454

बिल्वपत्रार्चनासक्तं कालमृत्युरपि स्वयम् ।
स्प्रष्टुमप्यतिशक्तोऽपि नासौ स्प्रक्ष्यति मां ध्रुवम् ।। 455

तथापि बिल्वपत्रैस्तमनभ्यर्च्य महेश्वरम् ।
नाहं भवितुमिच्छामि पीत्वाम्भः पापभाग्द्विज ।। 456

अनभ्यर्च्य महादेवं विष्णुरप्यमरोत्तमः ।
मत्स्यजन्म समासद्य प्राप दुःखमिति श्रुतम् ।। 457

तथाचाम्भो न पास्येऽहमनभ्यर्च्य महेश्वरम् ।
जलमेव न पास्येऽहं भक्षयामि कथं फलम् ।। 458

इत्युक्तं तद्वचः श्रुत्वा दृष्ट्वा तद्धैर्यमीश्वरः ।
प्रत्यक्षोऽभूत्तदा साम्बो भिल्लाय करुणानिधिः ।। 459

स भिल्लः करुणासिन्धुं ददर्श वृषभध्वजम् ।
कोटिसूर्यौघसङ्काशमुमालिङ्गितविग्रहम् ।। 460

सोमसूर्याग्निनयनं सोमार्धकृतशेखरम् ।
नीलकण्ठं विरूपाक्षं भस्मोद्धूलितविग्रहम् ।। 461

जटामण्डलसंवीतं शूलमुण्डकरं परम् ।
व्याघ्रचर्मपरीधानं प्रमथौघनिषेवितम् ।। 462

बिल्वमालासमाक्रान्तमुक्तामलाविराजितम् ।
करुणारसपूर्णाक्षं महोक्षोपरि संस्थितम् ।। 463

मन्दस्मिताननं देवं वराभीतिलसत्करम् ।
शङ्खकर्पूरकुन्देन्दुधवलं भुवनेश्वरम् ।। 464

अथेशस्य कृपालेशाद्भिल्लोऽसौ बिल्ववृक्षकान् ।
सपल्लवानतिस्वच्छान्हस्तलभ्यान्ददर्श सः ।। 465

ततः स बिल्वपत्राणि समादाय प्रहर्षितः ।
पूजयामास सर्वेशं शिवेति मनुना शिवम् ।। 466

ततः शिवेति नाम्नैव तत्प्रणामांश्चकार सः ।
ततः शिवेति नाम्नैव तुष्टाव गिरिजापतिम् ।। 467

ततः प्रहृष्टो गौरीशस्तमुवाच तदा द्विजाः ।
वरं वरं वृणीष्वेति सानन्दं विनयान्वितम् ।। 468

भिल्लः -

कृतार्थोऽस्मि महादेव धन्य जात च जीवनम् ।
मम भाग्यस्य नान्तोऽस्ति प्रसन्नोऽसि यतो भवान् ।

कुलं ममाभवद्धन्यं देवदेव कृपानिधे ।
धन्यं नेत्रयुगं जात ममाद्य करुणाकर ।। 469

वेदैरपि न ते दृष्टं स्वरूपं परमेश्वर ।
तदद्य सर्वदेवेश दृष्टं त्वत्कृपया मया ।। 470

अतः परं याचनीयं किमस्ति परमेश्वर ।
पूर्णो मनोरथो जातः किमेतस्माद्वरं परम् ।। 471

यतन्ते योगिनो नित्यं दर्शनार्थं तवेश्वर ।
तादृशैरपि न प्राप्तं दर्शनं तव शङ्कर ।। 472

इदमेव वरं याचे पुनः पुनरुमापते ।
त्वद्दर्शनेन विधुरं मास्तु जीवनमेव मे ।। 473

यस्मिन्दिने महेशान न भवेत्तव दर्शनम् ।
तस्मिन्नेव दिने शम्भो प्राणांस्त्यक्ष्यामि सर्वथा ।। 474

न येन तव पादाब्जं दृष्टं यस्मिन्दिने प्रभो ।
तज्जीवनं वृथा नित्यं सत्यं सत्यं न संशयः ।। 475

तवामितप्रभावस्य दर्शनं कस्य जायते ।
तव प्रभावः केनापि न ज्ञातः परमेश्वर ।। 476

भूरिभाग्यवतां पुंसामनन्यमनसां प्रभो ।
शम्भो भवत्यभयदं तव दर्शनमुत्तमम् ।। 477

देवतासार्वभौमाद्य याचेऽहं वरमुत्तमम् ।
तावतापि महादेव कृतकृत्यो भवाम्यहम् ।। 478

शिवेति नाम परमं यन्मोक्षदमनुत्तमम् ।
तत्रास्तु रुचिरीशान ममान्वहमनुक्षणम् ।। 479

याचेऽहं करुणासिन्धो वरान्तरमनुत्तमम् ।
वरदोऽसि यतः शम्भो ततो याचे वरान्वहून् ।। 480

बिल्वपत्राणि रम्याणि शिवपूजार्थमन्वहम् ।
अदुर्लभानि सन्त्वीश मम सर्वत्र सर्वद ।। 481

अयमन्यो वरो देयः पार्वतीरमण प्रभो ।
कृपानिधान सर्वज्ञ स्वभक्तवरदेश्वर ।। 482

मम प्राणवियोगोऽस्तु शिवपूजापुरःसरम् ।
न ते वरान्तरं याचे वरदानविचक्षण ।। 483

इत्युक्तस्तद्वचःश्रुत्वा सन्तुष्टः करुणाकरः ।
तद्याचितान्वरान्दत्वा तत्रैवान्तर्दधे शिवः ।। 484

भिल्लोऽप्यत्यन्तसन्तुष्टो गत्वा स गुरुसन्निधिम् ।
सर्वं निवेदयामास वृत्तान्तमविशेषतः ।। 485

तस्मिन्नेव वने भिल्लो वहुकालमनातुरः ।
विल्वपत्रैर्महादेवं सम्पूज्योवास सन्ततम् ।। 486

ततः कदाचिद्भिल्लोऽसौ विल्वपत्रैः सदाशिवम् ।
सम्पूज्य संस्मरञ्छम्भुं शिवेत्युक्त्वा जहौ तनुम् ।। 487

तदाकाशादभूद्विप्राः पुष्पवृष्टिर्मनोहरा ।
नेदुर्दुन्दुभयो दिव्या ननृतुश्चाप्सरोगणाः ।। 488

विमानं प्रेषयामास ततः साम्बः सदाशिवः ।
तदा विमानमारुह्य स ययौ शिवसन्निधिम् ।। 489

ततः शिवप्रसादेन शिवे लीनो वभूव सः ।
भिल्लो गणेषु पश्यत्सु प्रीतिविष्फारिताक्षिषु ।। 490

भिल्लो नीचकुले जातोऽप्येवं शङ्करपूजया ।
अनायासेन लीनोऽभूद्विप्राः साम्बे सदाशिवे ।। 491

नित्यमव्यभिचारेण यः पूजयति शङ्करम् ।
सर्वथा स शिवे लीनो भवत्येव न संशयः ।। 492

द्विजश्चेच्छङ्करं नित्यमनन्यः पूजयिष्यति ।
स किं न स्याच्छिवे लीनश्चित्रमत्र न किञ्चन ।। 493

नित्यमव्यभिचारेण पूजयध्वं ततः शिवम् ।
पूजितः श्रीमहादेवो मोक्षं दास्यत्यसंशयम् ।। 494

श्रीरुद्राय निवेद्यान्नं भोक्तव्यं प्रत्यहं द्विजाः ।
रुद्राभिषिक्तमेवाम्भः पीतव्यं प्रत्यहं द्विजैः ।। 495

श्रीरुद्राघ्रातमाघ्रेयं पत्रपुष्पादिकं द्विजैः ।
परिधेयं नवं वस्त्रं श्रीरुद्राय समर्पितम् ।। 496

सर्वदा शिवनामैव जपनीयं द्विजैर्द्विजाः ।
सर्वदा शिवपूजैव कर्तव्या मुक्तिकाङ्क्षिभिः ।। 497

शिवपूजैव सर्वेषां मुक्तिदा मङ्गलावहा ।
शिवार्चनं विहायान्यन्नास्ति मोक्षस्य साधनम् ।। 498

शिवार्चनविहीनानामपि मुक्तिर्भवेद्यदि ।
तदा विन्ध्योऽपि जलधिं तरेदेव न संशयः ।। 499

शिवार्चनं विना मोक्षो न भविष्यति सर्वथा ।
सत्यमेतत्पुनः सत्यमुद्धृत्य भुजमुच्यते ।। 500

शिवस्यैव प्रसादेन मुक्ताः पूर्वं मुनीश्वराः ।
स शिवस्य प्रसादात्तु न शिवाराधनं विना ।। 501

शिवाराधनहीनानां शिवो नैव प्रसीदति ।
शिवप्रसादविरहे मोक्षोऽपि न भविष्यति ।। 502

येनैवाव्यभिचारेण कृतं शङ्करपूजनम् ।
तेनैव शाङ्करः प्राप्यः प्रसादो मुक्तिदायकः ।। 503

अत्यन्तदुर्लभा मुक्तिः सा तु शङ्करपूजया ।
अत्यन्तसुलभा जाता शङ्करैकरतात्मनाम् ।। 504

शङ्करैकरता धन्याः शङ्करैकार्चनप्रियाः ।
अतस्तैः प्राप्यते मोक्षो दुर्लभोऽप्यतिलीलया ।। 505

यथा गृहपतिः स्वीयं गृहं गृहपतिर्यथा ।
शिवैकशरणो मर्त्यः शिवं प्राप्नोति लीलया ।। 506

स्वाधीनमन्नं क्षुधितो यथा भुङ्क्ते मुदा तथा ।
शिवैकशरणो .... ।। 507

युवा यथा स्वकां कान्तां प्राप्नोति मुदितस्तथा ।
शिवैक .... ।। 508

न लभ्यते यथा रम्यं रत्नसिह्मासनं तथा ।
कदापि मनयो मुक्तिरशैवैस्तु न लभ्यते ।। 509

यथा न लभ्यते राज्यं बलहीनेन सर्वथा ।
तथा न लभ्यते मुक्तिरशैवैरपि सर्वथा ।। 510

यथा न लभ्यते सौख्यं दरिद्रैर्व्याधिपीडितैः ।
तथा न लभ्यते .... ।। 511

यथा न लभ्यते योगो विषयासक्तमानसैः ।
तथा न लभ्यते .... ॥ 512

यथा न लभ्यते कान्ता गलत्कुष्ठेन सर्वथा ।
तथा न लभ्यते .... ॥ 513

यथा न लभ्यते वृद्धैराशास्यं नवयौवनम् ।
तथा न लभ्यते .... ॥ 514

यथा न लभ्यते पुत्रो वन्ध्यया सुखदायकः ।
तथा न लभ्यते .... ॥ 515

यथा न लभ्यते धर्मो मद्यपानरतैर्नरैः ।
तथा न लभ्यते .... ॥ 516

न दृश्यते यथान्धेन रत्नदीपप्रभादिकम् ।
तथा न लभ्यते .... ॥ 517

यथा न श्रूयते शब्दो बधिरेण सुखप्रदः ।
तथा न लभ्यते .... ॥ 518

यथा न ज्ञायते गन्धो हतघ्राणेन सर्वथा ।
तथा न लभ्यते .... ॥ 519

ध्वस्तजिह्वो न जानाति यथावाञ्छं रसं नरः ।
तथा न लभ्यते .... ॥ 520

मुक्तिदः शिव एवातः स शिवः शैववत्सलः ।
शैवेभ्य एव सन्तुष्टो मुक्तिमिष्टां प्रयच्छति ॥ 521

कल्पान्ते मुच्यते मर्त्यो ब्रह्महापि मुनीश्वराः ।
अशैवस्त्वशिवाचारः कल्पान्तेऽपि न मुच्यते ॥ 522

अतो यत्नेन सतत यूयं मुक्त्यर्थिनो द्विजाः ।
पूजयध्वं महादेवं सर्वदेवशिखामणिम् ॥ 523

आदिविष्णुरयं पूर्वं नित्यं पञ्चाग्निमध्यगः ।
षट्कोटियुगपर्यन्तं पूजयामास शङ्करम् ॥ 524

ततः प्रापातियत्नेन विष्णुत्वमयमीश्वरात् ।
सुदर्शनं च सम्प्राप्तमनेन शिवपूजया ॥ 525

अयं विष्णुर्महाशैवः शिवपूजापरायणः ।
शिवस्यैव प्रसादेन शिवे लीनो भविष्यति ॥ 526

बहवो विष्णवः सृष्टा महेशेन पुरा द्विजाः ।
हताश्च विष्णवः पूर्वं बहवः शूलपाणिना ॥ 527

अग्रेऽपि विष्णून्सृष्ट्वेशः पालयित्वा हनिष्यति ।
सृष्टिपालननाशास्तु भवन्ति शिवलीलया ॥ 528

देवतासार्वभौमस्य लीलया गिरिजापतेः ।
विष्णुब्रह्मादयो देवा भवन्ति हि पुनः पुनः ॥ 529

तुष्टो ददाति विष्णुत्वं यस्मै कस्मैचिदीश्वरः ।
किमस्त्यत्र ददातीशो गाणपत्यमपि प्रभुः ॥ 530

अतो भजध्वमनिशं भगवन्तमुमापतिम् ।
यूयं विना विलम्बेन पशुपाशविमोचकम् ॥ 531

भगवान् श्रीमहारुद्रादपरो नास्ति सर्वथा ।
सत्यमेतत्पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ 532

यो वै रुद्रः स भगवानित्यथर्वशिरः स्वयम् ।
भगवान्रुद्र एवेति वदत्येव मुहुर्मुहुः ॥ 533

तस्मात्स एव भगवानिति 'वै' कारतो द्विजाः ।
निर्णयोऽपि कृतस्तेन दुष्टसंशयहारकः ॥ 534

नमस्ते अस्तु भगवन्नित्येषापि श्रुतिः श्रुता ।
नित्योऽयं भगवच्छब्दः शङ्करस्यैव वाचकः ॥ 535

अत एव महारुद्रान्नापरो भगवांस्तुतः ।
पूजयध्वं महारुद्रं भगवन्तमुमापतिम् ॥ 536

नित्यं श्रीरुद्रमाराध्य रुद्राध्यायेन योऽर्चयेत् ।
स निर्मुक्तो महापापैः शिवसायुज्यतामियात् ॥ 537

सर्वाङ्गोद्धूलनं कृत्वा कृत्वा रुद्राक्षधारणम् ।
यः श्रीरुद्रं जपेन्नित्यं स रुद्रो भवति ध्रुवम् ॥ 538

रुद्रावर्तनशीलानां श्रीरुद्राविष्टचेतसाम् ।
नित्य बिभेति कालोऽपि सत्यमेवोच्यते मया ।। 539

कृत्वापि ब्रह्महत्यां यः श्रीरुद्रमनुवर्तयेत् ।
स ब्रह्महत्यापापेन न लिप्तो भवति ध्रुवम् ।। 540

कृत्वापि विप्रगोहत्यां यो रुद्रमनुवर्तयेत् ।
स तेन पातकेनापि न लिप्तो भवति ध्रुवम् । 541

कृत्वाप्यन्यानि पापानि यो रुद्रमनुवर्तयेत् ।
स तेन पातकेनापि .... ।। 542

रुद्राध्यायजपे योग्यो भस्मरुद्राक्षभूषणः ।
तज्जपे नेतरो योग्यो यागे पुल्कसवद्ध्रुवम् ।। 543

रुद्राध्यायजपे योग्यो: शैव एव न चापरः ।
शैव एव यतो योग्यः शैवमन्त्रानुवर्तने ।। 544

यथा न योग्यश्चण्डालो वेदस्याध्ययने तथा ।
अशैवः सर्वथाऽयोग्यो रुद्रसूक्तजपे द्विजाः ।। 545

शिवमन्त्रपरिक्रान्तो रुद्राध्यायोऽत एव सः ।
जपनीयोऽतियत्नेन शैवैरेव शिवार्चकैः ।। 546

वेदेषु सन्ति यावन्तः शिवमन्त्राः शिवात्मकाः ।
अशैवैस्ते न जप्तव्या यतस्ते नाधिकारिणः ।। 547

अशैवः शिवमन्त्रं चेदुच्चरेन्मोहसंयुतः ।
स याति नरकं घोरं यावदाचन्द्रतारकम् ॥ 548

अधीत्य वेदं चण्डालो यथा नरकमेष्यति ।
तथा शिवमन्तुं जप्त्वा शैवान्यो नारकी भवेत् ॥ 549

शिवैकशरणो यस्तु मनोवाक्कायकर्मभिः ।
स शैव इति विज्ञेयो वेदविद्भिर्मुनीश्वराः ॥ 550

भवन्तोऽपि महादेवं मनोवाक्कायकर्मभिः ।
अनन्यमनसो नित्यं पूजयध्वं (न्तु) प्रयत्नतः ॥ 551

भस्मनोद्धूलनं कृत्वा सम्यगापादमस्तकम् ।
रुद्राध्यायेन गौरीशं तोषयन्तु प्रयत्नतः ॥ 552

ततो बिल्वदलैरीशमर्चयध्वं मुनीश्वराः ।
बिल्वार्चनाद्रुद्रजपात्तोषयध्वं महेश्वरम् ॥ 553

क्रियते येन सततं केवलं भस्मधारणम् ।
येनेशः पूज्यते बिल्वैः स याति शिवसन्निधिम् ॥ 554

यो भस्मोद्धूलितवपुर्यो रुद्राक्षविभूषितः ।
स एव योग्यो विप्रेन्द्राः श्रीमहादेवपूजने ॥ 555

त्यक्त्वा श्रुतिस्मृतं शुद्धं केवलं भस्मधारणम् ।
कुर्वन्वैदिककर्माणि यात्येव नरकं ध्रुवम् ॥ 556

इदं तु वैदिकं कर्म श्रीमहादेवपूजनम् ।
रुद्राक्षधारणं नित्यं केवलं भस्मधारणम् ।। 557

शिवार्चनं च विप्रेन्द्रा वैदिकं मोक्षसाधनम् ।
महादेवार्चनं कार्यं न विना भस्मधारणम् ।। 558

शैवधर्ममुपाश्रित्य रुद्राध्यायपरो द्विजाः ।
रुद्रलोकमवाप्यान्ते श्रीरुद्रमधिगच्छति ।। 559

अविच्छिन्नाम्बुधारावद्रुद्रमावर्तयेद्द्विजाः ।
शिवलिङ्गं योऽभिषिञ्चेत्स निष्पापो भविष्यति ।। 560

पुरा कश्चिद्द्विजवरः सर्वदा शिवचिन्तकः ।
मणिमुक्तानदीतीरे स्थितोऽत्रैव तपोनिधिः ।। 561

एतादृशं द्विजश्रेष्ठं दृष्ट्वा कश्चिद्द्विजो द्विजाः ।
प्रणम्य दण्डवद्भूमावुवाचेदं वचो मुदा ।। 562

द्विजवर्य वदस्वाद्य प्रायश्चित्तं ममाधुना ।
मया कृतानि पापानि ज्ञात्वैवादरपूर्वकम् ।। 563

अद्य पीतं मया मद्यं ज्ञात्वा मादकमित्यपि ।
अन्यच्च मादकं वस्तु स्वेच्छया भक्षितं मुदा ।। 564

युवती जननी चापि सम्यगालिङ्गिता मया ।
मातृयोनौ मया धाष्टर्याद्रेतःसेकः कृतो मुदा ।। 565

दृष्ट्वा मां मत्पिता विप्र मातृसङ्गमतत्परम् ।
निवारयितुमुद्युक्तः स पितापि मया हतः ।। 566

मद्यपेन मया मोहाद्बहवो ब्राह्मणा हताः ।
हता ब्राह्मणपत्न्यश्च गर्भिण्यः पतिदेवताः ।। 567

दोग्ध्रीसमूहो निहतो मया कालान्तरेऽपि च ।
एतादृशस्य मे पापकर्मणो निष्कृतिः कथम् ।। 568

वेदतत्त्वं विचार्यैतत्प्रायश्चित्तं वदस्व मे ।
इति तद्वचनं श्रुत्वा स विप्रो वेदवित्तमः ।। 569

प्रायश्चित्तं व्यधादेवं पापनिर्मूलनक्षमम् ।। 570

द्विज उवाच -

विभूतिधारणं कृत्वा शिवैकशरणोऽधुना ।
सर्वाघौघनिवृत्त्यर्थं रुद्रमावर्तय द्विज ।। 571

शिवमन्त्रसमूहोऽयं रुद्राध्यायः शिवात्मकः ।
अतस्तद्रुद्रपाठेन नश्यत्यघकुलं क्षणात् ।। 572

नामैकमपि रुद्रस्य सर्वपापविनाशकम् ।
स्वर्गापवर्गफलदं शैवं जप्तं न संशयः ।। 573

कृत्वाप्यघकुलं नित्यं शिवैकशरणो द्विज ।
यदि रौद्रं जपेन्मन्त्रं सर्वपापैः प्रमुच्यते ।। 574

रुद्रस्मरणमात्रेण महापातककोटयः ।
विनश्यन्त्यनलक्रान्ताः शलभा इव तत्क्षणे ।। 575

तावदेव हि पापानि यावन्न स्मर्यते शिवः ।
स्मृते शिवे पातकानि विनश्यन्ति बहून्यपि ।। 576

अशैवा ये भविष्यन्ति ते महापातकालयाः ।
पापानि स्वालयं त्यक्त्वा तिष्ठन्ति न कदाचन ।। 577

पुण्यालयेषु शैवेषु पुण्यान्येव न संशयः ।
न तिष्ठन्ति हि शेवेषु पातकानि कदाचन ।। 578

पुण्यैकनिलयः शैवो नाश्रयः पुण्यपापयोः ।
पुण्यपापाश्रयो नैकस्तेजस्तिमिरयोरपि ।। 579

यदा यत्रोज्ज्वलं तेजो न तत्र तिमिरं तदा ।
ततो यदा यत्र पुण्यं तदा तत्र न पातकम् ।। 580

ततो यदा यत्र पुण्यं तदा तत्र न पातकम् ।
मृद्घटे सङ्गृहीतस्य जलस्य क्षरणं यथा ।। 581

तथा शैवकृताघानि क्षरन्त्येव क्षणे क्षणे ।
अद्यप्रभृति भो विप्र शैवो भूत्वा शिवं यज ।। 582

शिवः शैवकृतां पूजां प्रीत्या गृह्णाति सादरम् ।
शैवो भूत्वा बिल्वपत्रैर्यः पूजयति शङ्करम् ।। 583

सर्वपापविनिर्मुक्तो भुक्तिं मुक्तिं च विन्दति ।
शिवलिङ्गार्चनेनैव तुष्टो भवति शङ्करः ।। 584

सन्तुष्टः पार्वतीनाथः प्रयच्छत्येव वाञ्छितम् ।
शैवो भूत्वा महादेवं पूजय श्रद्धयान्वहम् ।। 585

शिवपूजां कुरु प्रीत्या पातकेभ्यो भयं त्यज ।
कर्मणा मनसा वाचा भवानीरमणं यज ।। 586

इत्युक्तं तद्वचः श्रुत्वा स विप्रः सत्वरं द्विजाः ।
नत्वा तत्वविदे तस्मै हृष्टचित्तो बभूव ह ।। 587

ततः स्नात्वा स तत्रैव सम्यगुद्धूल्य भस्मना ।
त्रिपुण्ड्रधारणं कृत्वा धृत्वा रुद्राक्षमालिकाः ।। 588

चक्रे ततः परं भक्त्या रुद्राध्यायानुवर्तनम् ।
ततः परं तच्छरीरात्पापानि विविधान्यपि ।। 589

काकरूपं समासाद्य निर्गतानि द्विजोत्तमाः ।
सन्दग्धपक्षास्ते काका दग्धतुण्डाश्च भूरिशः ।। 590

निर्गतास्तच्छरीरात्ते दृष्टाः सर्वैरपि द्विजाः ।
स दृष्ट्वा तानि पापानि काकरूपाणि तत्क्षणे ।। 591

अतिसन्तुष्टहृदयो रुद्रमावर्तयत्पुनः ।
रुद्रावर्तनशीला ये रुद्रैकपरदेवताः ।। 592

ते भूगताः सुरास्ते तु पूजनीया मुहुर्मुहुः ।
मन्त्ररत्नाकरं रुद्रं यो नित्यमनुवर्तयेत् ॥ 593

स तरत्येव संसारं विधुताघकुलः स्वयम् ।
यस्तु भोजयते भक्त्या शैवं क्षीराज्यसाधनैः ॥ 594

तेन साक्षान्महादेवो भोजितः पार्वतीप्रभुः ।
यत्र भुङ्क्ते महादेवस्तत्र भुङ्क्ते शिवा स्वयम् ॥ 595

शिवाभ्यां भुज्यते यत्र तत्र भुङ्क्ते जगत्त्रयम् ।
पुरा कश्चिद्द्विजवरो दोग्ध्रीरक्षणतत्परः ॥ 596

चकार पोषणं नित्यं गवामेव तृणादिभिः ।
तेनैकं नार्मदं लिङ्गं स्थूलं सम्पादितं मुदा ॥ 597

स नित्यं पूजयामास तल्लिङ्गं नार्मदं शुभम् ।
स घृतक्षीरमधुभिर्नार्मदं लिङ्गमुत्तमम् ॥ 598

असेवत प्रयत्नेन रुद्रमावर्तयन्मुदा ।
अभिषिच्यान्वहं भक्त्या बिल्वपत्रैर्नवारुणैः ॥ 599

पूजयामास कुसुमैर्नूतनैर्विविधैरपि ।
गोघृताक्तैर्गुग्गुलैश्च धूपयित्वा महेश्वरम् ॥ 600

सहस्रघृतदीपांश्च महेशाय समार्पयत् ।
क्षीरान्नं सघृतं नित्यं नैवेद्यं स महेश्वरे ॥ 601

दधिखण्डान्वितं चान्नं शङ्कराय न्यवेदयत् ।
दधिक्षीरघृतप्लुतमन्नं शिवनिवेदितम् ॥ 602

दत्वा शङ्करभक्तेभ्यः स्वयं भुङ्क्ते ततः परम् ।
स दृष्ट्वा भस्मलिप्ताङ्गं केवलं शङ्करार्चकम् ॥ 603

तस्मै ददाति सघृतं क्षीरान्नं स्वादु भक्तितः ।
दीपान्करोति सततं शाङ्करः स शिवालये ॥ 604

गोघृतेन महादेवं स नित्यमभिषिञ्चति ।
एवं स दधिदुग्धाद्यैरभिषिच्य महेश्वरम् ॥ 605

शैवांश्च दधिदुग्धाद्यैः सन्तोषयति सादरम् ।
यदि मृष्टान्नदानाय कोऽपि शैवो न लभ्यते ॥ 606

तदा न भुज्यते तेन कृत्वापि शिवपूजनम् ।
कदाचित्तेन विप्रेण न प्राप्तः शाङ्करोऽतिथिः ॥ 607

अनश्नन्नतिथिं कञ्चिदासायं प्रत्यवैक्षत ।
ततः साक्षान्महादेवः स्वयमेवाम्बिकापतिः ॥ 608

वृद्धब्राह्मणरूपेण ह्यागतो द्विजसद्मनि ।
ततस्तं शङ्करो दृष्ट्वा क्षुधार्तं शुष्कतालुकम् । 609

उवाच वचनं मन्दं तद्धैर्यं ज्ञातुमीश्वरः ॥ 610

भिल्ल उवाच -

भुङ्क्ष्व विप्र क्षुधार्तेन किमर्थं स्थीयते त्वया ।
दत्वा शिवाय नैवेद्यं मा विलम्बं कुरु द्विज ॥ 611

शिव उवाच -

न भोजितो महादेवः शैवरूपो महाद्विजः ।
अभोज्य शैवं क्षीराद्यैर्भोक्तव्यं स्यात्कथं वद ॥ 612

भुङ्क्ते शाङ्कररूपेण शङ्करो भक्तवत्सलः ।
अतः शैवमभोज्याहं भोक्तुं नैव समुत्सहे ॥ 613

मरणं वा भवत्वद्य क्षुधार्तस्य ममाधुना ।
तथाप्यहं न भोक्ष्यामि क्षीरेणाभोज्य शाङ्करम् ॥ 614

शिवः - (उवाच)

यं कञ्चिदपि विप्रं त्वं भोजयस्वाधुना द्विज ।
भुङ्क्ष्व त्वमपि यत्नेन मौर्ख्यं मा कुरु सर्वथा ॥ 615

द्विजः - (उवाच)

मया सम्पादिता गावः पोषिताश्च प्रयत्नतः ।
अयं प्रयासः सर्वोऽपि शाङ्करार्थं मया कृतः ॥ 616

शैवानेवाज्यदुग्धाद्यैर्भोजयिष्ये प्रयत्नतः ।
न दास्येऽहमशैवाय क्षीरान्नं क्लेशसाधितम् ।। 617

शिवनिष्ठं भोजयिष्ये भिन्नवर्णं च सादरम् ।
देयमन्नं सूकराय शुनकायाथवा द्विज ।। 618

अशाङ्कराय विप्राय नान्नं देयं कदाचन ।
अशाङ्कराय यो दद्यान्मोहेनान्नं कदाचन ।। 619

स सर्वथाऽन्नदानस्य न प्राप्नोति फलं ध्रुवम् ।
अशाङ्करं द्विजं दृष्ट्वा भानुं यदि न पश्यति ।। 620

चान्द्रायणं ततः कार्यमन्यथा नारकी भवेत् ।
इति तद्वचनं श्रुत्वा शिवः सन्तुष्टसानसः ।। 621

स्वस्वरूपं कृपासिन्धुर्दर्शयामास सत्वरम् ।
उमासंश्लिष्ठवामाङ्गं चन्द्रशेखरमीश्वरम् ।। 622

दृष्ट्वा प्रहृष्टहृदयस्तुष्टावाष्टविधाकृतिम् ।। 623

द्विजः -

नमस्ते पृथिवीरूप नमस्ते जलरूपिणे ।
नमस्तेजःस्वरूपाय वायुरूपाय ते नमः ।।
नम आकाशरूपाय सूर्यरूपाय ते नमः ।। 624

नमश्चन्द्रस्वरूपाय नमो यज्वरूपिणे ।
नमः सर्वस्वरूपाय व्यापकाय नमो नमः ॥ 625

नमस्त्रिशूलहस्ताय नमः परशुधारिणे ।
नमो विधूतपापाय गौरीनाथाय ते नमः ॥ 626

नमश्चन्द्रकिरीटाय परमाय नमो नमः ।
नमो वेदस्वरूपाय नीरूपाय नमो नमः ॥ 627

नमो वेदान्तवेद्याय भववैद्याय ते नमः ।
निष्कलाय नमस्तेऽस्तु निर्गुणाय नमो नमः ॥ 628

नमः शान्ताय ते शम्भो निरवद्याय ते नमः ।
निरञ्जन नमस्तेऽस्तु निष्प्रपञ्च नमो नमः ॥ 629

निर्लिप्ताय नमस्तेऽस्तु निराधाराय ते नमः ।
निरीशाय नमस्तेऽस्तु सर्वेशाय नमो नमः ॥ 630

नमो ज्ञानस्वरूपाय ज्ञानातीताय ते नमः ।
नमो ज्ञानैकगम्याय ध्यानगम्याय ते नमः ॥ 631

नमः परमरूपाय परमानन्दरूपिणे ।
सच्चिदानन्दरूपाय नमस्ते सर्वसाक्षिणे ॥ 632

नमो यज्ञस्वरूपाय यज्ञकर्मफलप्रद ।
नमस्ते करुणासिन्धो करुणामूर्तये नमः ॥ 633

अनन्तसोमसूर्याग्निप्रतिमाय नमो नमः ।
अनन्तामेयकल्याणगुणपूर्णाय ते नमः ।। 634

सर्वज्ञाय नमस्तेऽस्तु भक्ताभीष्टप्रदाय च ।
भूतभावन भूतेश नमस्ते भक्तवत्सल ।। 635

भूतव्रतप्रिय श्रीमन्नमस्ते भूतिभूषण ।
भूतिभूषितभक्तेष्टभूतिदानविचक्षण ।। 636

अभयप्रद विश्वात्मन्वरदामरपूजित ।
विष्णुब्रह्मार्चितेशान प्रसीद गिरिजापते ।। 637

इति स्तुत्वा महादेवं पूजयित्वा च यत्नतः ।
प्रणम्य वहुधा तस्थौ कृताञ्जलिपुटो द्विजः ।। 638

ततः परं महादेवस्तमुवाच कृताञ्जलिम् ।
मत्तो वरं वृणीष्वेति स्मितपूर्वं तदा द्विजाः ।। 639

द्विजः (उवाच) -

दृष्टमद्य महादेव तवपादाम्बुजं मया ।
कृतार्थमभवज्जन्म मम साम्ब कृपानिधे ।। 640

महादेव कृपासिन्धो तव पादाम्वुजे सदा ।
अचञ्चला भक्तिरस्तु नित्यमव्यभिचारिणी ।। 641

तव पादाम्बुजं त्यक्त्वा मनो मा यातु मे सदा ।
त्वय्येवास्तु मनो नित्यं कृपामूर्ते महेश्वर ।। 642

त्वामेव चिन्तयेच्चित्तं त्वदन्यं नैव चिन्तयेत् ।
त्वमेव दैवतं शम्भो भक्तलोकावनक्षमः ।। 643

चक्षुः पश्यतु मे नित्यं शिवलिङ्गं समर्चितम् ।
शृणोतु श्रोत्रमनिशं सदा तव कथां विभो ।। 644

जिह्वा मम करोत्वीश शिवनामानुकीर्तनम् ।
घ्राणं जिघ्रतु मे नित्यं रुद्राघ्रातं त्रिलोचन ।। 645

करोतु मम हस्तोऽयं शिवलिङ्गस्य पूजनम् ।
चिन्तयत्वनिशं चेतो ममेशचरणाम्बुजम् ।। 646

सदा शिवव्रतेष्वेव भक्तिरस्तु महेश्वर ।
मद्वंशजा भवन्त्वीश शिवैकपरदेवताः ।। 647

मद्वंशजानामस्त्वीश त्वयि भक्तिरनन्यगा ।
कुर्वन्तु मत्कुलोत्पन्नाः केवलं भस्मधारणम् ।। 648

कुर्वन्तु मत्कुलोत्पन्नाः सदा रुद्राक्षधारणम् ।
कुर्वन्तु मत्कुलोत्पन्नाः केवलं शिवपूजनम् ।। 649

कुर्वन्तु मत्कुलोत्पन्नाः केवलं शिवकीर्तनम् ।
कुर्वन्तु मत्कुलोत्पन्नाः केवलं शैवपूजनम् ।। 650

कुर्वन्तु मत्कुलोत्पन्नाः शैवमेव व्रतं सदा ।
मा भूयान्मत्कुले जन्म तादृशस्य दुरात्मनः ।। 651

यस्य त्वयि न गौरीशे भक्तिरव्यभिचारिणी ।
मा भूयान्मत्कुले .... ।। 652

न यस्याव्यभिचारेण शिवलिङ्गार्चने मतिः ।
मा भूयान्मत्कुले .... ।। 653

न यस्याव्यभिचारेण शिवमन्त्रजपे मतिः ।
मा भूयान्मत्कुले .... ।। 654

न यस्याव्यभिचारेण भक्तिः शिवकथाश्रुतौ ।
मा भूयान्मत्कुले .... ।। 655

न यस्याव्यभिचारेण भक्तिः शङ्करकीर्तने ।
मा भूयान्मत्कुले .... ।। 656

न यस्य भक्तिरनिशं केवलं भस्मधारणे ।
मा भूयान्मत्कुले .... ।। 657

न यस्य भक्तिरनिशं शुद्धे रुद्राक्षधारणे ।
मा भूयान्मत्कुले .... ।। 658

न यस्य भक्तिरनिशं शिवतीर्थनिषेवणे ।
मा भूयान्मत्कुले .... ।। 659

न यस्य भक्तिरनिशं शिवनैवेद्यभोजने ।
मा भूयान्मत्कुले .... ॥ 660

न यस्य भक्तिरनिशं सोमवारव्रतादिषु ।
मा भूयान्मत्कुले .... ॥ 661

न यस्य भक्तिरनिशं शिवभक्तजनार्चने ।
मा भूयान्मत्कुले .... ॥ 662

न यस्य भक्तिरनिशं रुद्राध्यायानुवर्तने ।
मा भूयान्मत्कुले .... ॥ 663

न यस्य भक्तिरनिशं काशीक्षेत्रे शिवात्मके ।
याचेऽहं करुणासिन्धो वरान्तरमनुत्तमम् ॥ 664

तनुत्यागो ममास्त्वीश शिवस्मरणपूर्वकम् ।
तच्छिवस्मरण भूयाच्छिवपूजापुरःसरम् ॥ 665

भस्मरुद्राक्षभूपस्य कृतलिङ्गार्चनस्य मे ।
पञ्चाक्षरं च जपतो ममास्तु मरणं शिव ॥ 666

मद्वंशजानां सर्वेषां शिवस्मरणपूर्वकम् ।
मरणं भवतु श्रीमन्तवैव कृपया शिव ॥ 667

अशैवभावना मास्तु कुलस्त्रीणां मम प्रभो ।
वन्ध्या वास्तु महेशान नष्टगर्भाऽथवास्तु सा ॥ 668

अशैवभोजनप्रीतिर्मास्तु मत्कुलजन्मनाम् ।
अशैवैः सह सम्बन्धो मास्तु मत्कुलजन्मनाम् ॥ 669

अशैवैः सह संवेशो मास्तु मत्कुलजन्मनाम् ।
अशैवजलपानं च मास्तु मत्कुलजन्मनाम् ॥ 670

अशैवैः सह सल्लापो मास्तु मत्कुलजन्मनाम् ।
अस्तु ते चरणाम्भोजे मम भक्तिरचञ्चला ॥ 671

इति तद्याचितान्सर्वान् वरान्दत्वा महेश्वरः ।
परीक्ष्य तस्य भक्तिं च तत्रैवान्तर्दधे शिवः ॥ 672

ततः शैवान्भोजयित्वा विप्रः क्षीरघृतादिभिः ।
भुक्त्वा स्वयं च सन्तुष्टः स्वं कृतार्थममन्यत ॥ 673

अतः शिवः शिवपराननुगृह्णाति सादरम् ।
तस्माद्भजध्वमनिशं शिवमेवातियत्नतः ॥ 674

धर्तव्यं भस्म सततं कर्तव्यं शिवपूजनम् ।
मर्तव्यं च शिवक्षेत्रे प्राप्तव्यं शाङ्करं पदम् ॥ 675

शिवः सर्वसुराधीशः स्मर्तव्यः सततं बुधैः ।
ध्येयश्च सततं साम्बो भुक्तिमुक्तिफलार्थिभिः ॥ 676

शिवेत्यादीनि नामानि पञ्च नित्यं प्रयत्नतः ।
जपनीयानि विप्रेन्द्रा भस्म धृत्वा यथाविधि ॥ 677

शिवः सदाशिवः साम्बो महेशश्चन्द्रशेखरः ।
एतानि पञ्च नामानि रहस्यानि द्विजोत्तमाः ।। 678

इमानि पञ्च नामानि प्रत्यहं पार्वती स्वयम् ।
जपति प्रीतमनसा शिवप्रीत्यर्थमादरात् ।। 679

सद्योजातादयो मन्त्राः प्रातः काले प्रयत्नतः ।
जपनीयाश्च सन्ध्यादिमन्त्राश्च प्रीतिपूर्वकम् ।। 680

महादेव उवाच -

इति ते मुनयः सर्वे विष्णुप्रभृतयः सुराः ।
ततो वृद्धाचलाधीशं सम्पूज्य कुसुमादिभिः ।। 681

मदेकशरणास्तत्र तस्थुः सर्षिगणाः सुराः ।
गौतमोऽपि मुनीन् सर्वानुपदिश्य यथाक्रमम् ।। 682

काशीमिमामवाप्तो मे मुनिभिः शाम्भवैः सह ।
द्वात्रिंशल्लक्षममलाः शाम्भवा मत्परायणाः ।। 683

शिवे काशीमिमां प्रापुर्भुक्तिमुक्तिफलप्रदाम् ।
श्रीवृद्धाचलवासेन यत्पुण्यं समुपार्जितम् ।। 684

तेन पुण्यप्रभावेण काशीं प्रापुरिमां द्विजाः ।
वृद्धाचलं समाश्रित्य ये तिष्ठन्ति मदर्चकाः ।। 685

तेषां निर्दग्धपापानां काशीप्राप्तिर्भविष्यति

श्रीमद्वृद्धाचलेशं नवजलसहितैः कोमलैर्बिल्वपत्रैः ।
भक्त्या सम्पूजयन्तः सकलमुनिगणाः सावधानेन नित्यम् ।
ध्यायन्तो मामुमेशं निरवधिविभवं ब्रह्मविष्ण्वादिवन्द्यं
शृण्वन्तो नाम शैवं शिवजनकथितं तस्थुरत्यन्तहृष्टाः ।।

।। इति श्रीशिवरहस्ये सप्तमांशे वृद्धाचलमहिमवर्णनं नाम त्रयोविंशोऽध्यायः ।।

।। चतुर्विंशोऽध्यायः ।।

श्रीशिवः -

चिदम्बराभिधं क्षेत्रं शिवक्षेत्रमनुत्तमम् ।
तदप्येकं महत्स्थानं मम प्रियकरं शिवे ।। 1

वसामि तत्र सततं ब्रह्मविष्ण्वादिपूजितः ।
तत्र मां मुनयः सर्वे सेवन्ते प्रत्यहं शिवे ।। 2

तस्मिन्नेव शिवस्थाने कोटिशः सन्ति शाङ्कराः ।
तत्र रम्याणि तीर्थानि सन्ति पापहराणि च ।। 3

रुद्राक्षवनमस्त्येकं तत्र पापभयापहम् ।
तत्र बिल्ववनं चास्ति सर्वदा नवपल्लवम् ।। 4

नित्यं शिवकथालापाः जायन्ते तत्र वल्लभे ।
शिवैकशरणा एव तत्र सन्ति मम प्रियाः ।। 5

सदा मदासक्तचित्ताः सदा मत्पूजनप्रियाः ।
सदा मदेकशरणाः सदा मदुपपादकाः ।। 6

केचिद्वदन्ति मामीशं गौरीनाथेति सादरम् ।
गौरीनाथेति नाम्नैव पूजयन्ति मुहुर्मुहुः ।। 7

केचिद्वदन्ति मामीशं शिवेत्यनिशमादरात् ।
तन्नाम्नैव नमःपूर्वं विल्वैरभ्यर्चयन्ति माम् ।। 8

केचिद्वदन्ति मामीशं शङ्करेत्यनिशं मुदा ।
तन्नाम्नैव नमः पूर्वं बिल्वैरभ्यर्चयन्ति माम् ।। 9

केचिद्वदन्ति मामीशं चन्द्रचूडेति सादरम् ।
तन्नाम्नैव .... ।। 10

केचिद्वदति मामीशं विश्वनाथेति सादरम् ।
तन्नाम्नैव .... ।। 11

केचिद्वदन्ति मामीशमुमानाथेति सादरम् ।
यावन्तः सन्ति विप्रेन्द्रा नित्यं श्रीमच्चिदम्बरे ।। 12

सर्वे वदन्ति ते नित्यं महादेव शिवेति च ।
मन्नामचिह्निताः सर्वे सन्ति श्रीमच्चिदम्बरे ।। 13

मन्नामामृतपाः सर्वे श्रीचिदम्बरवासिनः ।
श्रीमच्चिदम्बरे तीर्थे यावन्तः सन्ति साधवः ।। 14

तावन्तोऽप्यर्चयन्त्येते मन्नामामृतपायिनः ।
अमिताः सन्ति शैवेन्द्रा नित्यं श्रीमच्चिदम्बरे ।। 15

चिदम्बरस्थशैवानां न सङ्ख्या विद्यते शिवे ।
शिवगङ्गाभिधं तीर्थं तत्रास्त्येकं वरानने ।। 16

तत्र स्नात्वा नरः सद्यो मुच्यते पापकोटिभिः ।
आर्द्रायां पातयुक्तायां तत्र स्नात्वा यथाविधि ।। 17

दत्वा सुवर्णं शैवाय मुच्यते भवबन्धनात् ।
शिवगङ्गातटे रम्ये नाट्यस्थलमुमेऽस्ति मे ।। 18

तत्र नाट्यं मया देवि क्रियते तव सन्निधौ ।
श्रीमदभ्रसभानाथं नृत्यन्तं मां महेश्वरम् (नटेश्वरम्) ।।

ब्रह्मविष्ण्वादयो देवाः सेवन्ते प्रत्यहं शिवे ।
नृत्यन्तं मामुमे नित्यं महाताण्डवनायकम् ।। 20

दृष्ट्वैव दूरतो देवास्तिष्ठन्ति भृशकम्पिताः ।
स्वर्गादिकान्सप्त लोकान्भूरादीनखिलानपि ।। 21

समावृत्य मया तत्र कृतं नृत्यं मनोरमे ।
तत्र लिङ्गं ममास्त्येकं श्रीमदभ्रसभास्थले ।। 22

तद्विलोकनमात्रेण न पुनर्भवबन्धनम् ।
आर्द्रायां तस्य लिङ्गस्य दर्शनं यः करिष्यति ।। 23

स महापापराशिभ्यो मुच्यते नात्र संशयः ।
यन्मे मूलेश्वरं लिङ्गं मूलस्थाना(नाथा)भिधं शिवे ।।

यन्मूलं सर्वजगतामुत्पत्यादेश्च कारणम् ।
मूलस्थानेश्वरं दृष्ट्वा पातार्द्रासोमवासरे ।। 25

विल्वपत्रैः समभ्यर्च्य मद्रूपं प्राप्नुयान्नरः ।
मूलेश्वरं समभ्यर्च्य जप्त्वा पञ्चाक्षरं ततः ।। 26

रुद्राध्यायं च जप्त्वान्ते मम सायुज्यमाप्नुयात् ।
तत्र द्वादशसाहस्रं जप्त्वा पञ्चाक्षरं शिवे ।। 27

ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संथयः ।
तत्र यन्निष्कमात्रं वा सुवर्णं सोदकं शिवे ।। 28

यो दद्याच्छिवभक्ताय स मुक्तो भवति ध्रुवम् ।
पुरा मलयदेशस्थो धर्मज्ञ इति भूपतिः ।। 29

धनं सम्पाद्य बहुधा प्राप श्रीमच्चिदम्बरम् ।
शिवतीर्थे ततः स्नात्वा राजा भस्मविभूषणः ।। 30

मूलेश्वरं समभ्यर्च्य बिल्वपत्रादिभिर्मुदा ।
चक्रे रत्नतुलां तत्र सभार्यो धनिनां वरः ।। 31

सम्पूज्य गन्धपुष्पाद्यैः पुष्पै (अन्यैश्च) स शिवार्चकान् ।
ददौ बहूनि रत्नानि शाङ्करेभ्यो विचक्षणः ।। 32

दुकूलानि ददौ प्रीतया काञ्चुकानि च सादरम् ।
ततो मां पूजयामस शिवे ताण्डवनायकम् ।। 33

रत्नपुष्पैर्हेमपुष्पैर्बिल्वपत्रैश्च कोमलैः ।
ततः स कारयामास रत्नमण्डपमुत्तमम् ।। 34

नानारत्नसमाकीर्णं रत्नस्तम्भविराजितम् ।
ततः स कारयामास रत्नप्रासादमुत्तमम् ।। 35

सहस्रद्वारसङ्कीर्णं नानागोपुरसङ्कुलम् ।
तत्प्रासादस्य शृङ्गाणि सत्यलोकमतीत्य च ।। 36

गतानि तत्प्रभाजालैर्निष्प्रभोऽभूद्दिवाकरः ।
तत्रैव वृषभस्तम्भः कश्चिद्धैमः कृतः शिवे ।। 37

स तु रत्नसमाकीर्णो नानालिङ्गसमावृतः ।
एतादृशैर्नृपैस्त्र बहुभिर्बहुधा शिवे ।। 38

कारितानि शिवस्थानान्यतिरम्याणि सादरम् ।
चिदम्बरे यः प्रविष्टः स्यात्स मदेकपरायणः ।। 39

भक्त्या करोति मत्पूजामनन्यशरणः शिवे ।
शिव शम्भो महेशेति शब्दः श्रीमच्चिदम्बरे ॥ 40

सर्वैरप्युच्यते नित्यं सोत्साहं भूतिभूषणैः ।
न श्रुतं शिवनामान्यनाम श्रीमच्चिदम्बरे ॥ 41

नोच्यते शिवनामान्यच्छ्रीचिदम्बरवासिभिः ।
कुर्वन्ति गन्धपुष्पाद्यैर्भस्मरुद्राक्षभूषणाः ॥ 42

पूजामव्यभिचारेण ममैव श्रीचिदम्बरे ।
चिदम्बरेति यन्नाम सतारं मम शोभने ॥ 43

तज्जप्यते प्रयत्नेन तत्रस्थैर्मुक्तिकाङ्क्षिभिः ।
पुरा वैकुण्ठभवने विष्णुं मल्लिङ्गपूजकम् ॥ 44

विलोक्य प्राह वचनं लक्ष्मीर्विनयसंयुता ॥ 45

लक्ष्मीः -

आदिविष्णो महाशैव शिवलिङ्गार्चनप्रिय ।
शिवतीर्थाटनं कर्तुं प्रीतिर्जाता ममाधुना ॥ 46

विष्णो (प्रभो) महेश्वरः शम्भुः पार्वतीप्राणवल्लभः ।
चकार पार्वतीयुक्तो विहारं यत्र कुत्र वा ॥ 47

यत्र यत्र शिवस्थानं तत्र तत्र जनार्दन ।
कर्तव्यमतियत्नेन श्रीमहादेवपूजनम् ।। 48

सन्निवेश्य महादेवो रत्नसिंहासने शिवाम् ।
चकार ताण्डवं यत्र गन्तुमिच्छामि तत्स्थलम् ।। 49

अन्यान्यपि शिवक्षेत्राण्यन्वहं मुक्तिदानि मे ।
सेवनीयानि यत्नेन सम्पूज्यानि च सादरम् ।। 50

शिवक्षेत्रनिवासेन जायते पापसङ्क्षयः ।
पुण्यवृद्धिश्च भवति शिवक्षेत्रे शिवार्चनात् ।। 51

दुर्लभं तन् शिवक्षेत्रं शिवभक्तिश्च दुर्लभा ।
शिवक्षेत्रनिवासोऽपि दुर्लभो मुक्तिदायकः ।। 52

पुण्यवृद्धिकरं श्रेष्ठं शिवक्षेत्रे शिवार्चनम् ।
तद्भूरिपुण्यतपसा लभ्यते नात्र संशयः ।। 53

यः करोति शिवक्षेत्रे शिवलिङ्गार्चननं मुदा ।
स धन्य इति विज्ञेयः श्रेष्ठो जनिमतां नृणाम् ।। 54

शिवैकरतचित्तानां शिवक्षेत्रनिवासिनाम् ।
महद्भाग्यं महद्भाग्यं भाग्यस्यान्तो न विद्यते ।। 55

विष्णुत्वस्थैर्यसिध्यर्थं पुनः पुरपीश्वरम् ।
पूजयस्वातियत्नेन शिवक्षेत्रे यथाविधि ।। 56

शिवैकशरणो भूत्वा शिवक्षेत्रे शिवं यज ।
शिवक्षेत्रे कृता पूजा यतोऽनन्तफलप्रदा ।। 57

महादेवः -

इति तद्वचनं श्रुत्वा विष्णुः सन्तुष्टमानसः ।
श्रीमच्चिदम्बरं प्राप लक्ष्म्या युक्तो वरानने ।। 58

ददर्श तत्र शैवेन्द्रान्विष्णुर्भस्मविभूषणान् ।
रुद्राक्षभूषणान् शुद्धांस्त्रिपुण्ड्राङ्कितमस्तकान् ।। 59

शिवनामजपासक्तान् छिवलिङ्गार्चनप्रियान् ।
व्याघ्रचर्मपरीधानाञ्छिवतीर्थतटे स्थितान् ।। 60

शिवतीर्थे ततः स्नात्वा विष्णुर्लक्ष्म्या समन्वितः ।
त्रिपुण्ड्रधारणं चक्रे भस्मोद्धूलनपूर्वकम् ।। 61

शिवतीर्थे ततः स्नात्वा विष्णुर्लक्ष्म्या समन्वितः ।
त्रिपुण्ड्रधारणं चक्रे भस्मोद्धूलनपूर्वकम् ।। 62

रुद्राक्षधारणं चक्रे सर्वाङ्गेषु हरिः स्वयम् ।
ततस्तीर्थस्थितान्सर्वान् पूजयामास केशवः ।। 63

पूजयामास मां लक्ष्मीस्ततः सर्वसुरोत्तमम् ।
रत्नमन्दारकुसुमैर्बिल्वपत्रैश्च कोमलैः ।। 64

पञ्चाक्षरजपं चक्रे लक्ष्मीश्च विधिपूर्वकम् ।
तदानीमागताः सर्वे ब्रह्मेन्द्रप्रमुखाः सुराः ।। 65

तेऽपि स्नात्वा भस्म धृत्वा पूजां चक्रुर्मम प्रिये ।
ततः समागता देवि शैवा विष्णुदिदृक्षवः । 66

विष्णुरप्यागताञ्छैवान्पूजयामास सादरम् ।
ततस्ते शाङ्करा विष्णुं शिवपूजापरायणाः ।। 67

शैवबुध्या प्रयत्नेन पूजयामासुरम्बिके ।
ततस्तमूचिरे विष्णुं शैवं ते शाङ्कराः शिवे ।। 68

शिवतत्वं वदस्वेति विष्णुः शैवानुवाच च । 69

विष्णुः (उवाच) -

शिवतत्वं शिवेनैव ज्ञायते परमात्मना ।
तत्तत्वज्ञानमेतस्य कथं मम भविष्यति ।। 70

ज्ञातं चेच्छाङ्करं तत्वं सद्यो मोक्षो भविष्यति ।
कथं स्यात्तादृशं भाग्यं मम संसारिणोऽधुना ।। 71

यदा संसारविच्छित्तिर्भविष्यति शिवाज्ञया ।
तदा ज्ञातमिति ज्ञेयं तत्वज्ञानं तु शाङ्करम् ।। 72

अधुना तत्कथं ज्ञेयं शिवतत्वं मया द्विजाः ।
ज्ञायते भूरितपसा शिवतत्वं शिवार्चकाः ।। 73

वेदाश्च नोत्सहन्ते यत्तत्वज्ञानाय शूलिनः ।
कथं ज्ञेयं मया तत्वं शिवस्य परमात्मनः ।। 74

परं यद्वेदविहितं महादेवस्य पूजनम् ।
क्रियते बिल्वपत्राद्यैर्यथाशक्ति मया सदा ।: 75

शिवपूजाविधानं च न मया ज्ञायते द्विजाः ।
तथापि क्रियते यावद्ज्ञातं शङ्करपूजनम् । 76

यथाकथञ्चित्कर्तव्यं नित्यं शङ्करपूजनम् ।
न ज्ञातो विधिरित्येतन्न त्याज्यं शङ्करार्चनम् ।। 77

नित्यमव्यभिचारेण यः कुर्याच्छिवपूजनम् ।
स सर्वपापनिर्मुक्तः शिवरूपं प्रयास्यति ।। 78

भक्तिश्रद्धासमेतेन भस्मनिष्ठेन सादरम् ।
पूजितः पार्वतीनाथो ददाति परमां गतिम् ।। 79

शिवलिङ्गार्चनेनैव सन्तुष्टः पार्वतीपतिः ।
पुरा मह्यं ददौ विप्रा विष्णुत्वं करुणानिधिः ।। 80

ददौ ततः परं मह्यं वैकुण्ठमपि शङ्करः ।
सुदर्शनामिधं चक्रं ददौ मह्यं ततः परम् ।। 81

यस्मै हृष्टो महादेवस्तस्मै स गिरिजापतिः ।
ददाति भुक्तिं मुक्तिं च स्वतन्त्रः करुणानिधिः ।। 82

शङ्कराराधनेनैव बहवो मुनिपुङ्गवाः ।
शिवस्वरूपमापन्नाः शिवैकपरदेवताः ।। 83

शिवनामसुधापानं ये कुर्वन्ति शिवार्चकाः ।
नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्यो नमो नमः ।। 84

ये कुर्वन्ति प्रयत्नेन केवलं शिवपूजनम् ।
नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्यो नमो नमः ।। 85

भवत्यनल्पतपसा श्रद्धा शङ्करपूजने ।
ततोऽनल्पतपोगम्यः शङ्करो याज्य एव मे ।। 86

येषां बाह्योपचारेषु शक्तिर्नैव भविष्यति ।
तैर्मानसोपचारैर्वा कर्तव्यं शिवपूजनम् ।। 87

अनन्तवाजपेयादियागानां यत्फलं द्विजाः ।
ततोऽनन्तगुणं पुण्यं शिवपूजाविधेः फलम् ।। 88

महादानानि यावन्ति तेषां यावत्फलं श्रुतम् ।
ततोऽनन्तगुणं पुण्यं शिवपूजाविधेः फलम् ।। 89

तपांस्युग्राणि यावन्ति तावतां यत्फलं श्रुतम् ।
ततोऽनन्त .... ।। 90

पौण्डरीकादियागानां स्वर्गमात्रं फलं द्विजाः ।
शिवार्चनं तु वेदोक्तं चतुर्वर्गफलप्रदम् ।। 91

धर्मार्थकाममोक्षास्तु प्राप्तव्याः शिवपूजया ।
अतः शिवार्चनफलं केन साम्यं प्रयास्यति ।। 92

शिवार्चानेन नश्यन्ति ब्रह्महत्यादिकोटयः ।
नश्यत्येका ब्रह्महत्या वाजिमेधेन च द्विजाः ।। 93

शिवस्मरणमात्रेण विनश्यन्त्यघकोटयः ।
ते न नश्यन्ति किं विप्राः सद्यः शङ्करपूजया ।। 94

स्वर्गापवर्गफलदं वैदिकं शङ्करार्चनम् ।
तन्न यागादिसदृशं यतः स्वर्गापवर्गदा(?) ।। 95
(ते स्वर्गैकफला यतः)

शिवनामाग्निमात्रेण दग्धं चेत्पापकाननम् ।
शिवार्चनेन दग्धं तन्नभविष्यति किं द्विज ।। 96

पुरा कश्चिदभूद्राजा सामन्तनृपमर्दनः ।
अधर्मप्रभवः क्रूरो यमवत्क्रूरदर्शनः (शासनः) ।। 97

भुक्ता युवत्यस्तेनैव स्वदेशे ब्राह्मणस्त्रियः ।
तेन तद्भोगसक्तेन ब्राह्मणा बहवो हताः ।। 98

यावन्तस्तेन निहता ब्राह्मणा धर्मतत्पराः ।
तेषां सङ्ख्या तु शैवेन्द्राः कर्तुमेव न शक्यते ।। 99

स पपौ प्रत्यहं मद्यं मद्यपानरतैः सह ।
ब्रह्मस्वहरणं तेन कृतमेव मुहुर्मुहुः ।। 100

एतादृशः समाविष्टः कदाचिद्विपिनं ययौ ।
स गत्वा तु मृगान्शुद्धान्(शान्तान्) जघानाधर्मतत्परः ।।

ततो वनगजास्तेन निहता बहवो द्विजाः ।
वनगावश्च निहता गवयाश्चामिता द्विजाः ।। 102

हरिण्यो हरिणाश्चान्ये निहतास्तेन पापिना ।
पक्षिणो निहतास्तेन बहवो गरुडादयः ।। 103

एवमासायमु[1]द्धृत्वा(?) हत्वा जीवान् यथेच्छया ।
(एवमासायमुत्साद्य सत्वानि स्वेच्छया वने)
रवावस्तंगते राजा स तत्रोवास कानने ।। 104

तत्र रात्रौ यथाकामं कृत्वा दुर्मांसभक्षणम् ।
पपौ मद्यं ततः पापी मद्यपानरतैः सह ।। 105

ततः स मद्यपो राजा बभूव मदनातुरः ।
ततः समानयामास वनस्था ऋषिकन्यकाः ।। 106

दृष्ट्वा स युवतीर्मोहादादाय मुनिकन्यकाः ।
यथेच्छमुपभुक्त्वा(भुज्याथ)तत्याज(ऋषि)मुनिकन्याकाः ।।

---

1. औद्धत्यात् ।

ततः सुष्वाप दुर्वृत्तः स राजा मद्यपावृतः ।
मद्यं पीत्वैव बहुधा कृत्वा मांसस्य भक्षणम् ।। 108

ततः समुत्थितो वायुर्नानापत्रनिशातनः ।
ततः समुत्थितो राजा निद्रां त्यक्त्वा स मद्यपः ।। 109

तदानीमागतो मृत्युः सर्परूपं समाश्रितः ।
तेन सर्पेण सन्दष्टः स राजा मद्यपावृतः ।। 110

ततो वायुसमानीता दवभस्मकणा द्विजाः ।
स्वयंशुद्धाः कणास्ते तु पेतुर्भूपतिविग्रहे ।। 111

ततो वायुसमानीतं बिल्वपत्रं च नूतनम् ।
पपात तस्य भूपस्य मद्यपस्यैव मूर्धनि ।। 112

स बिल्वपत्रं सहसा वामहस्तेन मद्यपः ।
गृहीत्वा पातयामास किमेतदिति विस्मितः ।। 113

दिष्ट्या निपतितं तत्तु पत्रं लिङ्गस्य मूर्धनि ।
तल्लिङ्गं नार्मदं चासीत्सर्वपापभयापहम् ।। 114

पुरा कश्चिद्द्विजवरः शिवपूजापरायणः ।
नार्मदान्येव लिङ्गानि पूजयामास सोऽन्वहम् ।। 115

वने सञ्चरमाणोऽसौ नार्मदं लिङ्गमुत्तमम् ।
विस्मृत्यैव ययौ तच्च लिङ्गं तत्रैव संस्थितम् ।। 116

मृत्युरूपेण सर्पेण दष्टस्तत्र स भूपतिः ।
प्राणाञ्जहौ ततस्तत्र यमदूताः समागताः ॥ 117

तदा मया गतं तत्र ब्रह्मादिविबुधैः सह ।
तदानीमागता वेगाद्विप्राः शङ्करकिङ्कराः ॥ 118

मया समर्चितास्तत्र सर्वे शङ्करकिङ्कराः ।
ततः पर यमभटास्तं बध्वा गन्तुमुद्यताः ॥ 119

ततः प्रहृष्टवदनास्तानूचुः शिवकिङ्कराः ॥ 120

शिवदूता (ऊचुः) -

न नेयोऽयं भवद्भिस्तु नेयोऽस्माभिरयं नृपः ।
भवद्भिर्नयनोद्योगः कर्तव्यो नात्र सर्वथा ॥ 121

इत्युक्तं तद्वचः श्रुत्वा कश्चिद्यमभटस्तदा ।
यमायेदं(मं) समाख्यातुं वृत्तान्तं त्वरया ययौ ॥ 122

ततस्तद्वचनं श्रुत्वा यमः सत्वरमुत्थितः ।
चित्रगुप्तेन सहितः सत्वरं प्राप तद्वनम् ॥ 123

ततो मदर्चितान् दृष्ट्वा शुद्धान् शैवांस्तदा यमः ।
पूजयामास यत्नेन ततो मामपि सादरम् ॥ 124

ततः परमुवाचेदं शैवान्प्रति वचो यमः ।
प्राणम्य दण्डवद्भूमौ नतमूर्धा कृताञ्जलिः ॥ 125

यम उवाच -

दृष्टमद्य प्रसङ्गेन शैवानां रूपमुत्तमम् ।
यद्दर्शनेन नश्यन्ति पापानि विविधानि च ॥ 126

त्रिपुण्ड्राङ्कितफालानां विभूतिकृतवर्मणाम् ।
रुद्राक्षभूषणानां च दर्शनं नः शुभप्रदम् ॥ 127

शिवार्चनैकनिरतः शैवो यस्तस्य दर्शनम् ।
विना न भूरिभाग्येन सत्यमेवोच्यते मया ॥ 128

यवसीकृतवैकुण्ठान् विष्णुत्वविगतस्पृहान् ।
पश्यन्ति शाङ्करजनान् भूरिपुण्यालया जनाः ॥ 129

एकस्य शाङ्करस्यापि दर्शनं पापनाशकम् ।
अनन्तपुण्यफलदं पुण्योपचयकारणम् ॥ 130

बहूनां भवतामद्य शाङ्कराणां महात्मनाम् ।
दर्शनं जातमधुना कृतकृत्योऽस्म्यहं ध्रुवम् ॥ 131

विष्णुश्च धन्यो यत्तेन शाङ्कराः पूजिता मुदा ।
क्व भवन्तः क्व वा विष्णुः क्व विष्णोः शैवदर्शनम् ॥

अद्य विष्णुकृतं पुण्यं परिपक्वमभूद्ध्रुवम् ।
शैवानां दर्शनं क्वास्ति शिवसन्निधिवर्तिनाम् ॥ 133

अद्य प्रसङ्गादभवच्छ्रीमतां दर्शनं हरेः ।
विष्णोर्ममापि सुकृतं फलोन्मुखमभूद्ध्रुवम् ।। 134

यतोऽद्य दर्शनं जातं शैवानामावयोर्द्वयोः ।
शिवतत्वं न जानेऽहं वस्तुतः शैवपुङ्गवाः ।। 135

भवद्भिर्ज्ञायते तत्तु शिवसन्निधिवर्तिभिः ।
कथं वा श्रीमहादेवो जन्तूस्तारयितुं क्षमः ।। 136

किमस्ति तारक रूपं तत्केनापि न बुध्यते ।
पुरानेन तपस्तप्त विष्णुना यत्नपूर्वकम् ।। 137

तथापि शाङ्करं तत्वं न ज्ञातं विष्णुना ध्रुवम् ।
न ज्ञातं शाङ्करं तत्वं देवैरपि शिवार्चकाः ।। 138

अस्ति मोक्षप्रदो धर्मो बहुधा श्रुतिचोदितः ।
स तु मोक्षप्रदो धर्मः शिवपूजैव केवलम् ।। 139

न ततोऽप्यधिको धर्मः साक्षान्मोक्षप्रदायकः ।
तथाचानेन न कृतं मोक्षदं शिवपूजनम् ।। 140

एनं नेतुं शिवेनाद्य भवन्तः प्रेषिताः कथम् ।
प्रायोऽनेन कृतो धर्मः शिवपूजात्मको ध्रुवम् ।। 141

अन्यथा श्रीमहेशेन भवन्तः प्रेषिताः कथम् ।
एतत्कृतानां पापानामन्तो नास्ति तथाप्ययम् ।। 142

भवद्भिर्नीयते शैवैः ब्रह्मविष्ण्वादिपूजितैः ।
महेशप्रेषितैरेव भवद्भिरयमीदृशः ॥ 143

नीयते किमु यद्वायं स्वत एवाद्य नीयते ।
नीयतेऽयं भवद्भिश्चेच्छिवेन प्रेपितैरपि ॥ 144

तथापि नीयतां स्वेच्छं मया तु न निवार्यते ।
भीतिरस्त्येव सततं शाङ्करेभ्यो मम ध्रुवम् ॥ 145

अतो निवारणं कर्तुं भवतां नाहमुत्सहे ॥ 146

विष्णुः (उवाच) -

इत्युक्तं तद्वचः श्रुत्वा सुमुखो नाम शाङ्करः ।
स्मितपूर्वमुवाचेदं यमं प्रति वचो द्विजाः ॥ 147

सुमुख उवाच -

कृतान्यनेन पापानि सत्यं नास्त्यत्र संशयः ।
अनेन नार्मदं लिङ्गं पूजितं बिल्वपत्रकैः ॥ 148

तदुत्तरक्षणेऽनेन त्यक्तमत्रैव पुष्करम् ।
शिवं सम्पूज्य बिल्वेन नर्मदालिङ्गसन्निधौ ॥ 149

त्यक्तं शरीरमेतेन राज्ञा शिवकृतात्मना ।
पश्येदं नार्मदं लिङ्गं बिल्वपत्रसमर्चितम् ॥ 150

मृतं च पश्य राजानं शिवलिङ्गस्य सन्निधौ ।
एतादृशः कथं नेयो यमाद्य नरकं प्रति ॥ 151

शिवलिङ्गं समभ्यर्च्य बिल्वपत्रादिसाधनैः ।
यस्त्यजेत्पुष्करं मर्त्यः स याति शिवसन्निधिम् ॥ 152

अत्राद्यागतमस्माभिः शङ्करप्रेषितैर्यम ।
शङ्कराज्ञां विनाऽस्माभिर्यम क्वापि न गम्यते ॥ 153

सर्वसाक्षी कृपासिन्धुः सर्वज्ञः पार्वतीपतिः ।
सर्वं जानात्ययं शर्वः तेनातः प्रेषिता वयम् ॥ 154

शिवार्चनं विना मोक्षो नास्तीति यदुदीरितम् ।
तत्तथैव न सन्देहः तथापि श्रूयतामिदम् ॥ 155

यः कृतामितपापोऽपि बिल्वपत्रेण शङ्करम् ।
सम्पूज्य म्रियते जन्तुः स मोक्षमधिगच्छति ॥ 156

यथा नश्यन्ति गिरयः क्षणेन प्रलयाग्निना ।
तथा नश्यन्ति पापानि बिल्वपत्रैः शिवार्चया ॥ 157

अमन्त्रं वा समन्त्रं वा बिल्वपत्रं मृतिक्षणे ।
शिवलिङ्गे विनिक्षिप्य शिवे लीनो भविष्यति ॥ 158

शिवलिङ्गार्चकं कालमृत्युर्व्यवहितक्षणे ।
विश्वास्य काल पश्याङ्गं दवभस्मकणाङ्कितम् ॥ 159

भस्माङ्कितशरीरस्य कथं स्यान्नरके स्थितिः ॥ 160

विष्णुः -

इति तद्वचनं श्रुत्वा दृष्ट्वा भस्माङ्कितं नृपम् ।
ददर्श शिवलिङ्गं च बिल्वपत्रसमर्चितम् ॥ 161

ततो यमो बिल्वपत्रैः शार्मदं लिङ्गमुत्तमम् ।
पूजयित्वा नमस्कारांश्चकार च यथाविधि ॥ 162

ननाम दण्डवद्भूमौ ततः स शिवकिङ्करान् ।
भूयो भूयः कम्पमानः कृताञ्जलिपुटो यमः ॥ 163

ततस्तमर्चयामास नृपं भस्मकणाङ्कितम् ।
ततो मामपि सम्पूज्य यमस्तस्थौ कृताञ्जलिः ॥ 164

ततो विमाने संवेश्य तमेव नृपतिं तदा ।
प्रतस्थिरे च मुदिताः सर्वे शङ्करकिङ्कराः ॥ 165

भूपतिर्भस्मयोगेन शिवलिङ्गार्चनेन च ।
ध्वस्तपापः शिवं प्राप सत्वरं शैवपुङ्गवाः 166

यमोऽपि स्वालयं प्राप स्वभटैरखिलैः सह ।
शिवलिङ्गार्चनफलं संस्तुवन्प्रीतिपूर्वकम् ॥ 167

अत एव कृपासिन्धुर्देवदेवोत्तमः शिवः ।
पूजनीयोऽन्वहं सर्वैः सर्वदा मुक्तिकाङ्क्षिभिः ॥ 168

महेशादपरो देवो नास्ति मुक्तिप्रदो द्विजाः ।
अतो मुक्त्यर्थिभिर्नित्यं पूजनीयः सदाशिवः ।। 169

पुरा कश्चिद्द्विजो नित्यं कामुको वहुपापकृत् ।
भिल्लवेषं समाश्रित्य वनमाश्रित्य सस्थितः ।। 170

तेन भुक्ताश्च सततं वनस्था मुनिकन्यकाः ।
तेनैव द्रव्यलोभेन ब्राह्मणा बहवो हताः ।। 171

ततः कदाचिद्विप्रोऽसौ कुण्डिनीनगरं गतः ।
तत्र दिष्टया राजपत्नी दृष्टा तेन दुरात्मना ।। 172

ततः स राजपत्नीं तां युवतीमतिसुन्दरीम् ।
दृष्ट्वैव हर्तुकामोऽसौ रात्रौ राजगृहं ययौ ।। 173

ततो जघान राजानमशस्त्रं शयनस्थितम् ।
ततस्तां नेतुमुद्युक्तो जगाद वचनं तदा ।। 174

एहि शीघ्रं वनं यामो नानाद्रुमलतायुतम् ।
नानामृगगणाकीर्णं विजनं वायुसेवितम् ।। 175

इत्युक्त्वा तां समादाय ययौ स वनभूमिकाम् ।
तत्र रेमे तया साकं मधुमांसादिभक्षकः ।। 176

कुण्डिनीनाथपुत्रस्तं श्रुत्वा स्वपितृनाशकम् ।
चकार हन्तुमुद्योगं बलवीर्यसमन्वितः ।। 177

ततः स सबलः सायं प्रविवेश वनं नृपः ।
ततः समागतं वीक्ष्य स विप्रोऽभूद्दयान्वितः ।। 178

ततः स रात्रावत्युच्चं बिल्ववृक्षं भयानकम् ।
आरुरोहातियत्नेन राजपत्नीसमन्वितः ।। 179

ततः स निद्रासंवीतो निद्रानाशार्थमुद्यतः ।
छित्त्वैकैकं बिल्वपत्रं पातयामास भूतले ।। 180

तत्पानितानि पत्राणि दिष्ट्या लिङ्गस्य मूर्धनि ।
पातितान्यतिरम्याणि सर्वाण्यपि शिवार्चकः ।। 181

स सायङ्कालमारभ्य बिल्वपत्रैः सदाशिवम् ।
अरुणोदयपर्यन्तं पूजयामास भाग्यवान् ।। 182

सा सोमकृष्णभूताऽभूत्तिथिस्तस्यैव भाग्यतः ।
तस्यां तिथौ बिल्वपत्रैस्तेन शम्भुःप्रपूजितः ।। 183

अरण्ये सञ्चरन्राजा तस्यां रात्रावितस्ततः ।
जातेऽरुणोदये विप्रं तं वृक्षोपरि संस्थितम् ।। 184

दृष्ट्वा क्रोधातिताम्राक्षः सज्यं जग्राह कार्मुकम् ।
मुमोचास्त्राणि नृपतिर्द्विजमुद्दिश्य वीर्यवान् ।। 185

मुक्तानि तेन शस्त्राणि नैव प्राप्तानि तं प्रति ।
ससैन्येनापि शस्त्राणि त्यक्तानि ज्वलता क्रुधा ।। 186

तेष्वेकमपि नो शस्त्रं तं हन्तुं प्राभवत्तदा ।
अथासौ विस्मितो राजा ससैन्यः स्वपुरीं ययौ ॥ 187

द्विजोऽपि विस्मितः प्राप भुवं राज्ञीसमान्वितः ।
ततः स राज्ञीमवदत्किमेतदिति विस्मितः ॥ 188

एतस्मिन्नन्तरे काले द्विजमन्यं ददर्श सः ।
तस्मै जगाद वृत्तान्तमादितः सकलं तदा ॥ 189

तच्छ्रुत्वा विल्वपत्राणि दृष्ट्वा वाचमुवाच सः ।
विल्वपत्राणि रम्याणि पातितान्यत्र केन वाः ॥ 190

शिवलिङ्गं किमत्रासीदिति विस्मितमानसः ।
ततस्तद्वचनं श्रुत्वा तमुवाच द्विजोत्तमम् ॥ 191

एतानि विल्वपत्राणि पातितानि मयेति सः ।
स ददर्श ततो लिङ्गं बिल्वमूलेऽथ नार्मदम् ॥ 192

ततस्तं प्रत्युवाचेदं वचनं द्विजसत्तमम् ।
कृताञ्जलिपुटो भूत्वा प्रणम्य च मुहुर्मुहुः ॥ 193

द्विज उवाच -

बिल्वपत्रैर्महादेवस्त्वया सम्पूजितोऽनघ ।
अतस्तानि न लग्नानि शस्त्राणि तव विग्रहे ॥ 194

किमत्रचित्रं यद्देवः शङ्करः पूजितस्त्वया ।
मुच्यन्ते जन्तवो नूनं कालमृत्युभयादपि ।। 195

विल्वपत्रैर्महादेव योऽर्चयिष्यति तं प्रति ।
कालमृत्युर्न यात्येव किमुतान्यापमृत्यवः ।। 196

तुष्टो भवति गौरीशो यत्र कुत्रापि पूजितः ।
विल्वपत्रैर्विल्वमूले पूजितः शङ्करस्त्वया ।। 197

एतादृशस्थले नित्यं यः पूजयति शङ्करम् ।
तस्याभीष्टानि सिध्यन्ति सर्वाण्येव न संशयः ।। 198

अनन्तपुण्यफलदं विल्वमूले शिवार्चनम् ।
यत्फलं प्राप्यते मर्त्यैरन्यत्र शिवपूजया ।। 199

ततोऽनन्तगुणं पुण्यं बिल्वमूले शिवार्चनात् ।
सार्द्रा भूता पातयुक्ता कृष्णा सोमान्विता तथा ।। 200

तस्यां रात्रौ विल्वमूले सिद्धिदं शङ्करार्चनम् ।
शिवपूजा कृता रात्रौ ततो मृत्युर्जितस्त्वया ।। 201

तव पापानि नष्टानि पूर्वजन्मकृतान्यपि ।
अग्रेऽपि शङ्करं नित्यं पूजयस्व निरन्तरम् ।। 202

विष्णुः (उवाच) -

इत्युक्तं तद्वचः श्रुत्वा द्विजः सन्तुष्टमानसः ।
तदाप्रभृति यत्नेन शिवपूजां चकार सः ।। 203

स कुर्वन्देवदेवस्य महादेवस्य पूजनम् ।
सर्वपापविनिर्मुक्तः सम्प्राप च महेश्वरम् ।। 204

अतः सदैव सम्पूज्यः शिवः पतितपावनः ।
नित्यं निश्चलचित्तेन भुक्ति मुक्त्यर्थमादरात् ।। 205

भवानी श्रीमहादेवं स्वयमत्यन्तभक्तितः ।
पूजयत्यादराद्देवं लिङ्गरूपिणमव्ययम् ।। 206

अत्र व्याघ्रपुरे पूर्वं भवानी गिरिजा पतिम् ।
पूजयित्वान्वहं देवं ययाचे वरमुत्तमम् ।। 207

श्रीपार्वती उवाच -

शम्भो सायं समारभ्य कार्तिके सोमवासरे ।
ये पूजयन्ति भक्त्या त्वां तेष्वेका पूजयाम्यहम् ।। 208

श्रीमहादेव देवेश देयो मह्यमयं वरः ।
इत्युक्तः श्रीमहादेवो गिरिजां तामुवाच च ।। 209

श्रीमहादेव उवाच -

चत्वारो यामिनीयामास्तत्र यामत्रयं त्वया ।
कार्यं मदर्चनं देवि बिल्वपत्रादिभिर्मुदा ।। 210

चतुर्थे यामिनीयामे कुमाराद्या गणेश्वराः ।
देवाश्च ब्रह्मविष्ण्वाद्याः पूजयिष्यन्ति मां प्रभुम् ।। 211

त्वया चेत्क्रियते पूजा नक्तं यामचतुष्टये ।
तदा कथं कुमाराद्यैः कर्तव्यं मम पूजनम् ।। 212

अयं तु कार्तिको मासः प्रशस्तो मम पूजने ।
तत्रापि सोमवारेषु प्रशस्तं मम पूजनम् ।। 213

मम प्रियकरं पुण्यफलदं मोक्षदायकम् ।
पुण्यकालाः समायान्ति गिरिजे सोमवासरे ।। 214

तत्रापि कर्तिके मासि विशेषात्सोमवासरे ।
सोमवारे कृता पूजा मम प्रियकरा शिवे ।। 215

तत्रापि कार्तिके मासि सा पूजाभुक्तिमुक्तिदा ।
बिल्वपत्रैर्द्रोणपुष्पैर्धुत्तूरैः कुसुमैरपि ।। 216

पूजनीयोऽहमीशानः कार्तिके सोमवासरे ।
द्रोणपुष्पैः प्रशस्तैर्मां कार्तिके सोमवासरे ।। 217

योऽर्चयेन्निशि मां देवि स मद्रूपो भविष्यति ।
एकं वा यदि धुत्तूरं कार्तिके सोमवासरे ।। 218

यदि दद्यान्मयि प्रीत्या मयि लीनो भविष्यति ।
इत्युक्तं तद्वचः श्रुत्वा भवानी शिवतत्परा ।। 219

तथास्त्विति शिवं प्राह सदा सन्तुष्टमानसा ।
ततः सा कार्तिकं मासं सम्प्राप्य शिववल्लभा ।। 220

कार्तिकप्रतिपद्येव सोमवारमवाप सा ।
शिवपूजासाधनानि सम्पाद्य गिरिजा ततः ।। 221

पूजां कर्तुं समारेभे सायमारभ्य शङ्करे ।
अविज्ञायैव वृत्तान्तमिममस्माभिरैश्वरम् ।। 222

सायं शिवार्चनं कर्तुमुद्युक्तं तद्दिने द्विजाः ।
ततो ब्रह्मादिभिः साकं मया यत्नपुरःसरम् ।। 223

पूजाद्रव्यं समादाय भस्म धृत्वा गतं द्विजाः ।
ततः समाययौ भृत्यो नन्दिकेशस्य वीर्यवान् ।। 224

प्रत्यबध्नात्ततो मार्गं तेन सद्वेत्रपाणिना ।
ततोऽस्माभिः कियत्कालं कृतं धैर्यं ततः परम् ।। 225

शीघ्रं गन्तुं समुद्युक्तं मया ब्रह्मादिभिः सह ।
शिलादपुत्रदूतेन तेन सद्वेत्रपाणिना ।। 226

क्षणार्धेन वयं सर्वे ताडिताः पतिता भुवि ।
ततो यामत्रयं मात्रं सम्यगभ्यर्चितः शिवः ।। 227

ततः स्कन्दादिभिः सर्वैः पूजितः पार्वतीपतिः ।
ततोऽस्माभिः कृता पूजा शिवस्य परमात्मनः ।। 228

ततः कृतं प्रयत्नेन गन्धर्वाद्यैः शिवार्चनम् ।
तदा मया प्रतिज्ञातमद्य चेत्पार्वतीपतिम् ।। 229

सोमे द्रक्ष्ये तदा नेत्रमर्पयामीति शङ्करे ।
यामिन्याः पश्चिमे यामे ततो दृष्टो महेश्वरः ।। 230

ततः सम्पूज्य बिल्वाद्यैर्नेत्रेणाप्यर्चनं कृतम् ।
ततस्तुष्टो महादेवो नेत्रं कमलसन्निभम् ।। 231

ददौ मह्यं कृपासिन्धुरत्र श्रीमच्चिदम्बरे ।
श्रीमच्चिदम्बरेशस्य पूजां यस्तु करिष्यति ।। 232

तस्य पापानि नश्यन्ति स्वेष्टसिद्धिश्च जायते ।
पुरा सुरद्विषः क्रूरा बलवीर्यमदोद्धताः ।। 233

दुःखं दत्वा स्थिता नित्यमस्माकं त्रिपुराह्वयाः ।
ताराक्षो मकराक्षश्च विद्युन्मालीति ते त्रयः ।। 234

आसंस्तिस्रः पुरस्तेषामसुराणां मनोजवाः ।
पुरत्रयेऽपि तिष्ठन्ति यत्र ते तु सुरद्विषः ।। 235

पुरत्रयं प्रयात्येव यत्र तेषां मनोगतिः ।
तत्पुरत्रयमासाद्य सुखेनैव स्थिताश्च ये ।। 236

ज्वलत्पर्वतसङ्काशं तत्पुरत्रयमद्भुतम् ।
यत्र गच्छति तत्रैव ज्वलत्यग्न्याकुला जनाः ।। 237

अगतिर्नास्ति कुत्रापि तस्य स्वर्गादिषु ध्रुवम् ।
सुरैर्दुःखं यथा प्राप्तं तेभ्यस्तद्वत्कुतोऽपि न ।। 238

तद्दत्तदुःखसन्तप्ता दुःखिताः सर्वदा जनाः ।
कदाचिदागतो ब्रह्मा सेन्द्रस्त्रिपुरदुःखितः ।। 239

न्यवेदयदशेषेण दुःखं दैत्येन्द्रकल्पितम् ।
मह्यं दुःखं निवेद्यापि दुःखान्तं न ययौ विधिः ।। 240

दुःखापहारके दुःखं निवेदयति यः पुमान् ।
स दुःखान्तं प्रयात्येव दुःखहर्तृप्रसादतः ।। 241

मम त्रिपुरसंहारे यदि शक्तिर्भवेत्तदा ।
मत्तो दुःखनिवृत्तिः स्यादन्यथा स्यात्कथं द्विजाः ।। 242

सहस्रवर्षपर्यन्तमटत्येव पुरत्रयम् ।
मुहूर्तमात्रं भवति क्वचित्त्रिपुरसङ्गमः ।। 243

तस्मिन्मुहूर्ते सामर्थ्यं यस्य त्रिपुरशासने ।
स एव दुःखक्षयकृत्स हि लोकावनक्षमः ।। 244

मम त्वेतादृशी शक्तिर्नास्त्येव ब्रह्मणो यथा ।
नास्मदन्यसुराणां च महामृत्युञ्जयं विना ।। 245

अतस्तेनातिदुःखेन सन्तप्ताः स्मो वयं पुरा ।
तेन दुःखातिरेकेण न कृतं शिवपूजनम् ।। 246

त्यागेन शिवपूजायाः प्राप्तं दुःखं पदे पदे ।
दुःखमग्ना स्थिताः सर्वे तदा वयमहर्निशम् ।। 247

ततः कदाचिद्भगवान् श्रीरुद्रो भक्तवत्सलः ।
नेत्राग्निकणलेशेन त्रिपुरं लीलयादहत् ।। 248

तदा सूर्यादयः सर्वे प्रकाशं परमं ययुः ।
तदा सन्तुष्टुवुर्देवास्त्रिपुरान्तकमीश्वरम् ।। 249

रुद्रभालाग्निसन्दग्धं यदा तत्त्रिपुरं तदा ।
सौख्यं तु परमं प्राप्तमस्माभिः सकलैः सुरैः ।। 250

तदाप्रभृति यत्नेन दुःखे तस्मिन्निवारिते ।
शिवपूजापरा जाता वयं सर्वेऽपि शाङ्कराः ।। 251

अस्माभिश्च स्तुतः शम्भुर्देवो देवशिखामणिः ।
त्रिपुरोपात्तदुःखौघविनिवृत्तौ ततः परम् ।। 252

मया ब्रह्मादिभिः साकं पूजाद्रव्यपुरःसरम् ।
त्रिपुरान्तकपूजार्थं गतं तस्मिन्दिने द्विजाः ।। 253

नन्दिकेशप्रसादेन दृष्टोऽस्माभिर्महेश्वरः ।
तदास्माभिः कृता पूजा रत्नैः त्रिपुरघातिनः ॥ 254

ततः परं महादेवः सायङ्काले स्वलीलया ।
ममोपकण्ठं सोत्कण्ठं नाट्यं कर्तुं प्रचक्रमे ॥ 255

ततः परं महेशस्य नूपुरं रत्नरञ्जितम् ।
पपातात्र शिवस्थाने पश्यत्स्वस्मासु शङ्करः ॥ 256

ततोऽपि श्रीमहादेवो नाट्यमत्र चकार सः ।
श्रीनन्दिकेशप्रमुखा गणाश्चात्र समाययुः ॥ 257

तदाप्रभृति सोत्कण्ठं नीलकण्ठोऽत्र सादरम् ।
करोति नाट्यं लीलार्थं लीलास्वीकृतविग्रहः ॥ 258

भवन्ति प्रतिकल्पेऽपि ते ताराक्षादयो द्विजाः ।
ते हन्यन्ते महेशेन प्रतिकल्पे पुनः पुनः ॥ 259

इच्छा यदा महेशस्य दग्धमेतद्भवत्विति ।
तदा दग्धं भवत्येव सर्वमेतच्चराचरम् ॥ 260

तथापि भगवान्रुद्रः पुरा कल्पान्तरे द्विजा. ।
चक्रे त्रिपुरदाहार्थमिच्छां शस्त्रादिसंम्युतः ॥ 261

रथारूढेन गन्तव्यमित्यपीच्छां चकार सः ।
रथोऽभूच्छ्रीमहेशस्य तदा सर्वविलक्षणः ॥ 262

रथरूपं दधौ विप्रा नवखण्डात्मिकापि भूः ।
वेदा बभूवुश्चत्वारो वाजिरूपधरास्तदा ॥ 263

बभूवतुश्चन्द्रसूर्यौ चक्ररूपधरौ तथा ।
ब्रह्मापि समभूद्यन्ता सायकोऽहं जनार्दनः ॥ 264

मेरुर्धनुरभूच्छेषो गुणोऽभूद्धनुषस्तथा ।
देवाः सैन्यमभूद्विप्रास्तत्पतिः षण्मुखोऽभवत् ॥ 265

ततः प्रतस्थे गौरीशो लीलास्वीकृतविग्रहः ।
देवानामसुराणां च युद्धमासीत्ततः परम् ॥ 266

अनेकयुगपर्यन्तं युद्धं कृत्वा सुराः स्थिताः ।
ततः परं सुरान् श्रान्तान् संवीक्ष्य कृपया शिवः ॥ 267

ततस्त्रिपुरनाशार्थं विससर्ज स सायकम् ।
ततस्ते राक्षसाः सर्वे सायकोपहता मृताः ॥ 268

सायकोत्थानलेनाशु दग्धं तत्त्रिपुरं द्विजाः ।
ततः परं महादेवो नृत्यमत्र चकार सः ॥ 269

पुरा कल्पान्तरे विप्रा मकराक्षादयोऽसुराः ।
स्वर्गलोकं गृहीत्वेन्द्रं चक्रुः संवृतसायकम् ॥ 270

ततः परं स देवेन्द्रो लोकपालैश्च संवृतः ।
ब्रह्मणापि युतः प्राप वैकुण्ठमतिदुःखितः ॥ 271

ब्रह्मा ततः परं सर्वमिन्द्रादीनां पराभवम् ।
यथावन्मह्यमाचख्याविन्द्रेण प्रेषितस्तदा ।। 272

ततो गरुडमारुह्य चक्रं सङ्गृह्य पाणिना ।
मया गतं जवात्तत्र सुरारिविजयेप्सुना ।। 273

ततः परमभूद्युद्धमसुरैः सह सत्वरम् ।
न जातं तादृशं युद्धं कदाचिदपि शाङ्करा: ।। 274

पेतुरस्त्रणि बहुशः प्रेषितानि सुरारिभिः ।
तदा तानि प्रविष्टानि कष्टानीव शिवार्चके ।। 275

सत्वरं मुद्गराः पेतुः पर्वता इव कोटिशः ।
भिण्डिफालास्ततः पेतुः पाषाणा इव भूतले । 276

क्रकचाश्च ततः पेतुः पद्मिन्यां कर्कशा इव ।
मायाशस्त्राणि संपेतुः कलत्राणीव योगिनि ।। 277

कोटिवत्सरपर्यन्तमेवमेव मया सह ।
युद्धमासीत्ततो युद्धे ममैवासीत्पराजयः ।। 278

युद्धकाले मया गर्वान्महेशो न स्मृतस्तदा ।
अतः पराभवो युद्धे ममासीद्दुःखदस्तदा ।। 279

ततः परं गदादीनि शस्त्राण्यपहृतानि नः ।
सुदर्शनाख्यं चक्रं च दत्तं तैरेव राक्षसैः ।। 280

ततो मत्प्रमुखान्त्सर्वान् ब्रह्मेन्द्राद्यमरान्द्विजाः ।
बध्वा पाशैर्मुद्गराद्यैस्ताडयामासुरुद्धताः ॥ 281

तदा प्राप्तं महद्दुःखमशिवाराधकैरिव ।
तदाऽस्मदादीन् दुःखार्तान्नन्दिकेशो विलोकयन् ॥ 282

सद्यो निवेदयामास कालकालाय शूलिने ।
ततः कृपानिधिः शूली शूलघ्नं शूलमुत्तमम् । 283

सुरारिनिधनं कर्तुं प्रेषयामास लीलया ।
ततस्तदागतं शूलं ज्वालामालासमाकुलम् ॥ 284

दृष्ट्वासुरादयः सर्वे जग्मुः पातालमुद्धताः ।
ततः प्रविश्य पातालं त्रिशूलमपि सत्वरम् ॥ 285

सुरारिनिधनं चक्रे क्षणार्धेनैव शाङ्करः ।
पुरत्रयं ततो दग्धं त्रिशूलोत्थितवह्निना ॥ 286

ततः परं ययौ शूलं कृतकार्यं हरालयम् ।
ततः प्राप्तानि खड्गानि मदीयानि मयाद्विजाः ॥ 287

इन्द्रः स्वर्गं प्राप पुनर्गुरुवायुपुरोगमः ।
ततोऽहमपि वैकुण्ठं ब्रह्मापि स्वालयं ययौ ॥ 288

ततः कृता महेशस्य पूजा यत्नपुरःसरम् ।
एवमेव महादेवो लीलयैवामरद्विपान्(षः) । 289

करोति निधनं विप्राः प्रतिकल्पेऽपि सादरम् ।
बहुकालं मया विप्राः स्थित्वैनदनुभूयते ।। 290

श्रीशिव उवाच -

इति विष्णुवचः श्रुत्वा शाङ्करा विस्मितास्तदा ।
केशवं प्रष्टुमुद्योगं चक्रुः प्रहसिताननाः । 291

शाङ्करा ऊचुः -

विष्णून् सृजति गौरीश प्रतिकल्पे निजेच्छया ।
तथासति कथं विष्णो बहुकल्यं कथं स्थितम् ।। 292

विष्णुरुवाच -

सृजत्यन्यशरीराणि ममैव श्रीमहेश्वरः ।
ददाति मह्यं विष्णुत्वमपि श्रीशङ्करः स्वयम् ।। 293

मया सम्पूजितः पूर्वं लिङ्गे साक्षान्महेश्वरः ।
शिवलिङ्गार्चनेनैव सन्तुष्टोऽभूत्पुरा शिवः ।। 294

ततः प्रादुरभूदीशः शिवलिङ्गे शिवान्विते ।
तदा सम्पूजितः शम्भुःस्तुतश्चबहुधा मया ।। 295

तदा मह्यं वरा दत्ता शिवेन बहवो मुदा ।
पुनः कृता मया पूजा शङ्कराय यथाविधि । 296

त्रिषष्टिकल्पपर्यन्तं विष्णुत्वमपराजितम् ।
तुभ्यं दत्तमिति प्रीत्या मामुवाच ततः शिवः । ।। 297

लिङ्गार्चनेन भगवान् तुष्टो भूत्वा सदाशिवः ।
ददाति परमामृद्धिं का विष्णुत्वे विशेषता ।। 298

शिवलिङ्गार्चनपरैःविष्णुत्वं नैव गण्यते ।
किन्तु वाञ्छन्ति ते धीरा गाणपत्यादिकं द्विजाः ।। 299

ब्रह्मत्वमपि नेच्छन्ति धीराः शङ्करपूजकाः ।
गाणपत्यादिवाञ्छैव क्रियते तैरनामया ।। 300

शिवलिङ्गं समभ्यर्च्य यो यो यद्यदभीसितम् ।
प्राप्तुमिच्छति तत्तेन प्राप्यते नात्र संशयः ।। 301

शिवलिङ्गे सदा कार्या शिवपूजा मनीषिभिः ।
लिङ्गे व्यङ्गापि साङ्गैव शिवपूजा प्रजायते ।। 302

प्रतिमायां प्रयत्नेन कृतया साङ्गपूजया ।
यत्फलं तत्फलं प्राप्यं व्यङ्गया लिङ्गपूजया ।। 303

प्रतिमायां यथाशास्त्रं साङ्गं शङ्करपूजनम् ।
कर्तुं न शक्यतेऽस्माभिःविधिर्न ज्ञायते यतः ।। 304

प्रकारा बहवः सन्ति महादेवार्चने द्विजाः ।
तत्प्रकारपरिज्ञानं अस्माकं न भविष्यति ।। 305

अल्पबुद्धिभिरस्माभिस्तत्प्रकारविवेचनम् ।
कर्तुं न शक्यते विप्रा गहनत्वादनेकधा ॥ 306

समन्त्रमस्त्वमन्त्रं वा लिङ्गे शङ्करपूजनम् ।
सर्वार्थप्रदमित्याह जाबालः स्वयमात्मवित् ॥ 307

चरमस्त्वचरं वास्तु शिवलिङ्गं शिवात्मकम् ।
पूजनीयं प्रयत्नेन द्विजैरव्यभिचारतः ॥ 308

नार्मदं स्थावरं लिङ्गं यदि स्थूलतर भवेत् ।
तत्र पूजा प्रयत्नेन कर्तव्या प्रतिवासरम ॥ 309

अनार्मदं नार्मदं वा स्थावरं लिङ्गमुत्तमम् ।
पूजनीयं प्रयत्नेन सर्वकालेषु सादरम् ॥ 310

स्थूलं यन्नार्मद लिङ्गं तत्तु कालत्रये द्विजैः ।
पूजनीयं बिल्वपत्रैः पुष्पैश्च विविधैर्नवैः ॥ 311

सायंकाले प्रयत्नेन स्थावरं लिङ्गमादरात् ।
पूजनीयं बिल्वपत्रैरभिषेकपुरःसरम् ॥ 312

न यत्र स्थावरं लिङ्गं न तत्रैकदिनं वसेत् ।
उषित्वोपोषणं कृत्वा पञ्चगव्येन शुध्यति ॥ 313

शिवालयविहीनस्य ग्रामस्य यदि दर्शनम् ।
तदा विलोकयेत्सूर्यमन्यथा पतितो भवेत् ॥ 314

शिवालयविहीनस्तु ग्रामो द्विजयुतोऽपि सः ।
चण्डालग्राम एवेति विज्ञेयो ब्रह्मवादिभिः ।। 315

यः शिवस्थानरहिते ग्रामे स्थायी वसेन्नरः ।
दिनार्धंवा दिनं वा सःपुनः संस्कारमर्हति ।। 316

अशिवालयदेशेषु न गन्तव्यं कदाचन ।
यदिगच्छेत्प्रमादेन तप्तकृच्छ्रं समाचरेत् ।। 317

अशिवालयदेशस्थैर्नाभिभाषेत सर्वथा ।
नैकत्र संविशेन्मोहात्स्थाने लिङ्गविवर्जिते ।। 318

शिवलिङ्गविहीनैस्तु न गन्व्यं वहिर्द्विजैः ।
शिवलिङ्गं समादाय गन्तव्यं यत्र कुत्रचित् ।। 319

शिवलिङ्गमनभ्यर्च्य न पेयमुदक द्विजैः ।
न शेतव्य गृहे रात्रौ शिवलिङ्गविवर्जिते ।। 320

रात्रौ वने वा शेतव्य शिवलिङ्गसमन्विते ।
पुरा कश्चिद् द्विजवरो वेदशास्त्रविशारदः ।। 321

शिवतीर्थाटनपरः सर्वदा शिवचिन्तकः ।
गन्तुमिच्छेद्यदा विप्रो बहिर्ग्रामान्तरेऽथवा ।। 322

शिवलिङ्गं समादाय गच्छति श्रद्धयान्वहम् ।
द्विजानधीतवेदांश्च शिवार्चनविवर्जितान् ।। 323

स न पश्यति विप्रेन्द्रः शिवपूजापरायणः ।
स नित्यं शृणुयाच्छम्भोर्दिव्यनामाङ्कितां कथाम् ।। 324

शिवचिह्नविहीनेन न भाषेत द्विजोत्तमः ।
शिवेत्युक्त्वा प्रतिग्रासं स भुङ्क्ते भगवत्प्रियः ।। 325

शिवेत्युक्त्वा पिबत्यम्बु शङ्कराय समर्पितम् ।
शिवेत्युक्त्वा फलादीनि स भक्षयति सादरम् ।। 326

शिवेत्युक्त्वा स वस्त्राणि परिधत्तेऽनुवासरम् ।
कदाचिदेष विप्रेन्द्रः शिवयात्रार्थमुद्यतः ।। 327

शिवलिङ्गं समादाय प्रस्थितः शिवचिन्तकः ।
ततः परं महदेवो विप्ररूपमुपाश्रितः ।। 328

ययौ तेन सहारण्ये भस्मानङ्कितविग्रहः ।
अरण्ये सञ्चरन् विप्रो भस्मानङ्कितविग्रहम् ।। 329

विलोक्य भानुमालोक्य सत्वरं गन्तुमुद्यतः ।
तदानीमवदद्विप्रं विप्ररूपधरः शिवः ।। 330

मा मा त्यज द्विजेत्यल्प व्रजेति ग्लानिपूर्वकम् ।
त त्यक्त्वाग्रे गतः शीघ्र श्रुत्वापि तदुदीरितम् ।। 331

अशैवोऽय स्थितो दूरे सम्यगासीदिति द्विजः ।
भिल्लरूपं ततो धृत्वा रुद्राक्षानपि शङ्करः ।। 332

घृत्वा भस्म च सर्वाङ्गे शिवेत्याह शनैः शनैः ।
ततः परं शिवेत्युक्तिं श्रुत्वोत्फुल्लमुखाम्बुजः ।। 333

परावृत्य ददर्शैनं भिल्लरूपधरं शिवम् ।
रुद्राक्षभूषणं भिल्लं भस्मोद्धूलितविग्रहम् ।। 334

कृशाङ्गं सादरं दृष्ट्वा ननाम भुवि दण्डवत् ।
ततो बिल्वदलैः शुद्धैस्तस्मै पूजां चकार सः ।। 335

भिल्लरूपधरः शम्भुस्ततस्तमवदद्द्विजम् ।। 336

भिल्लः -

त्वयाहं न नमस्कार्यो भिल्लोऽहं हीनजातिजः ।
त्वमुत्कृष्टो द्विजवरस्तत्रापि शिवपूजकः । 337

इति तस्य कृशाङ्गस्य रुद्राक्षाभरणानि च ।
भस्मभूषितदेहस्य श्रुत्वा वाचमुवाच तम् ।। 338

द्विजः उवाच -

भिल्ल शूद्रोऽथवा क्षुद्रः पुल्कसो योऽपि कोऽपि वा ।
शिवचिह्नं कृतं येन स मे पूज्यो न संशयः ।। 339

शिवचिह्नधरो जन्तुर्मम पूज्यो न संशयः ।
शिवचिह्नविहीनाङ्गो द्विजोऽप्यचर्यो न सर्वथा ।। 340

इति तद्वचनं श्रुत्वा तद्भक्तिं पुनरीश्वरः ।
विज्ञातुमाह कृशवत्कृशकण्ठस्वरदास्तिकाः ।। 341

भिल्ल उवाच -

मया त्यक्तानि शस्त्राणि शक्तिहीनेन पर्वते ।
शक्तिर्वक्तुमपि ब्रह्मन्मम नास्त्यधुना ध्रुवम् ।। 342

क्षुधया पीडितो नित्यमरण्ये निवसाम्यहम् ।
देहि मह्यं जलं विप्र ततोऽन्नमपि सादरम् ।। 343

ग्रामं नयेति यत्नेन मामीदृग्दुर्बलं द्विज ।
स्थातुं न शक्यते घोरे वनेऽस्मिन्मृगपीडया ।। 344

द्विज उवाच -

गमने यद्यशक्तिस्ते तदा स्कन्धं ममाधुना ।
आरुह्य याहि भस्माङ्ग भयं माकुरु सर्वथा ।। 345

अन्नपानादिभिर्नित्यं करिष्ये तव पोषणम् ।
भ्रातृवद्भृत्यवद्भिल्ल चिन्तां माकुरु माकुरु ।। 346

विनाऽन्नेन शरीरं ते जातं क्षीणतरं ततः ।
दुग्धाज्यसहितं दास्ये पुष्ट्यर्थं नित्यमोदनम् ।। 347

औषधान्यपि यत्नेन दापयिष्याम्यसंशयम् ।
मरणादपि संरक्ष्ये मृत्योरपि भयं त्यज ।। 348

अस्थिमात्रावशिष्टं ते शरीरं जातमीदृशम् ।
अतः परमवस्थानमत्र कार्यं न सर्वथा ।। 349

उद्धूलनार्थमप्यस्य न भक्तिर्दृश्यते तव ।
उद्धूल्यान्ते त्वयाङ्गानि कथं भस्माभिगृह्यते ।। 350

रुद्राक्षधारणे शक्तिस्तव नास्त्येव सर्वथा ।
कथं तथापि रुद्राक्षा धृताः सन्ति त्वयाऽधुना ।
धन्योऽसि कृतकृत्योऽसि शिवचिह्नं यतस्त्वया ।। 351

धृतमस्त्यतियत्नेन दुर्बलेनापि सादरम् ।
यथास्ति तव विश्वासो भस्मरुद्राक्षधारणे ।। 352

तथा ममास्तु विश्वासो भस्मरुद्राक्षधारणे ।
यस्मिन्भवति भाग्येन सततं भगवत्कृपा ।। 353

तस्यैव भवति श्रद्धा भस्मरुद्रक्षधारणे ।
त्वयि भाग्यप्रदा नित्यमस्त्येव भगवत्कृपा ।। 354

यतस्तवैवं विश्वासो भस्मरुद्राक्षधारणे ।। 355

विष्णुरुवाच -

इत्युक्त्वा तं पुनर्भक्त्या प्रणम्याभ्यर्च्य भस्मना ।
समादाय स्वके स्कन्धे समारोपयदादरात् ।। 356

ततः परं महादेवः प्रादुरासीत्कृपानिधिः ।
उमासंश्लिष्टवामाङ्गो नानाप्रमथसेवितः ।। 357

ततः परं महादेवं दृष्ट्वा प्रमथसेवितम् ।
पूजयामास यत्नेन तुष्टाव च कृताञ्जलिः ।। 358

द्विजः उवाच -

नमस्ते भक्तमन्दार नमस्ते वृषभध्वज ।
नमस्ते पार्वतीनाथ नमस्ते भस्मभूषण ।। 359

नमस्ते प्रमथाधीश नमस्ते चन्द्रशेखर ।
नमस्ते करुणासिन्धो नमस्ते भक्तवत्सल ।। 360

नमस्ते व्याघ्रचर्माङ्ग नमस्ते शेषभूषण ।
नमस्ते मृगहस्ताय नमस्ते शूलपाणये ।। 361

नमस्ते कालकालाय नमस्ते त्रिपुरान्तक ।
नमस्ते पुण्यरूपाय नमस्ते यज्ञरूपिणे ।। 362

नमस्ते ज्ञानवृत्ताय नमस्ते वृत्तिरूपिणे ।
नमस्ते वीरभद्राय भद्ररूपाय ते नमः ।। 363

नमस्ते भद्रकाराय नमस्ते भद्रद प्रभो ।
नमस्ते परमोत्कृष्ट परब्रह्मन्नमोऽस्तु ते ।। 364

नमस्ते निर्गुणामेय नमस्ते सुगुण प्रभो ।
नमस्ते सर्वदेवेश नमस्ते सर्वपालक ॥ 365

नमस्ते सर्ववन्द्येश नमस्ते सर्वपूजित ।
नमस्ते गिरिरूपाय नमस्ते वनरूपिणे ॥ 366

नमस्ते सर्वरूपाय पार्वतीशाय ते नमः ।
लिङ्गरूप नमस्तेऽस्तु नमस्ते लिङ्गपूजित ॥ 367

विष्णुरुवाच -

इति स्तुतो महादेवो वरं वरय सुव्रत ।
वरदोऽहमिति प्रीत्या तमुवाच द्विजोत्तमम् ॥ 368

द्विज उवाच -

ममास्त्वयं तु विश्वासो भस्मरुद्राक्षधारणे ।
तथैव शिवपूजायां विश्वासोऽस्तु मम प्रभो ॥ 369

विश्वासोऽस्तु मम स्वामिन् तव नामानुकीर्तने ।
विश्वासोऽस्तु मम स्वामिन्सदाशिवकथाश्रुतौ ॥ 370

विश्वासोऽस्तु मम श्रीमन् शिवक्षेत्राटने सदा ।
विश्वासोऽस्तु मम श्रीमन् शिवतीर्थनिषेवणे ॥ 371

विश्वासोऽस्तु मम श्रीमन् शिवनैवेद्यभोजने ।
विश्वासोऽस्तु मम श्रीमन् शिवभक्तजनार्चने ॥ 372

मा पश्यतु कदापीश चक्षुरेतदशाङ्करम् ।
मा श्रृणोतु कदापीश श्रोत्रं नामाप्यशाङ्करम् ॥ 373

मास्तु वासो मम स्वामिन्नशाङ्करजनाश्रये ।
मास्तु प्रीतिर्मम स्वामिन्नशाङ्करजनेष्वपि ॥ 374

भस्मोद्धूलितदेहस्य रुद्राक्षाभरणस्य मे ।
देहपातो ममास्त्वीश शिवस्मरणपूर्वकम् ॥ 375

सर्वेऽप्येते वरा देया मह्यं शम्भो महेश्वर ।
अनाथनाथ सर्वज्ञ कृपालो पार्वतीपते ॥ 376

विष्णुरुवाच -

इति तद्वचनं श्रुत्वा सन्तुष्टः परमेश्वरः ।
दत्वा वरान्पुनस्तेन पूजितोऽन्तर्दधे शिवः ॥ 377

एतादृशः कृपासिन्धुर्भगवान् भक्तवत्सलः ।
पूजनीयः प्रयत्नेन शिवलिङ्गे शिवात्मके ॥ 378

शिवलिङ्गार्चनपरो नित्यं शिवपरायणः ।
सहस्रेषु भवत्येको भुवि पुण्यतपोबलात् ॥ 379

श्रद्धा शङ्करपूजायां सहसा न भविष्यति ।
सैव लब्धा यदि श्रद्धा तदा मुक्तिरदुर्लभा ॥ 380

श्रद्धा भवति भाग्येन शिवलिङ्गस्य पूजने ।
शैवश्रद्धा यतः साक्षाद्भुक्तिदा मुक्तिदापि सा ।। 381

ब्रह्महत्यादिपापानि यथा नरकसाधनम् ।
तथा शिवान्यपूजापि भवेन्नरकसाधनम् ।। 382

शिवलिङ्गधिया कार्यं शैवानामापि पूजनम् ।
न कार्यैव हि सर्वेषु मर्त्यबुद्धिर्मनीषिभिः । 383

लिङ्गानि सन्ति पुण्यानि स्थावराणि चराणि च ।
द्विविधानीति बोध्यानि चरलिङ्गानि तत्र तु ।। 384

तथा रत्नादिलिङ्गानि चरलिङ्गानि सुव्रताः ।
तथैव चरलिङ्गानि शाङ्कराः केवला द्विजाः ।। 385

तथाच शाङ्कराणां च शिवलिङ्गधिया द्विजैः ।
पूजा कर्या प्रयत्नेन शिवतुष्टयर्थमन्वहम् ।। 386

यादृशं तादृशं वास्तु शिवलिङ्गं शिवात्मकम् ।
पूजनीयं प्रयत्नेन नित्यमव्यभिचारतः ।। 387

पुरा सुमेरुशिखरे सर्वदा पृथिवीमहम् ।
तस्थौ विचिन्तयन्नेव तत्पालनपरायणः ।। 388

तदैव पुरुषः कश्चित्समभूद्दिव्यविग्रहः ।
तमेव पुरुषं दृष्ट्वा तदा हिमवदाश्रयाः ।। 389

पूजयामासुरर्घ्याद्यैः शौनकाद्या मुनीश्वराः ।
ततः प्रसन्नहृददं तमेव पुरुषं तदा ॥ 390

कोऽसि स्वामिन्निति प्रश्नं चक्रुस्ते शौनकादयः ।
ततः स पुरुषो धीमान् सर्वधर्मप्रवर्तकः ॥ 391

सत्यभूतं वचः प्राह वेदोऽहमिति सादरम् ।
तत्र ते मुनयः सर्वे शौनकात्रिपुरोगमाः ॥ 392

प्राहुरत्यन्तसन्तुष्टास्तं वेदपुरुषं तदा ॥ 393

ऋषय ऊचुः

वेदोऽसि वेदतत्वज्ञ सर्ववेदार्थविद्वर ।
त्वत्तः संशयविच्छेदो भविष्यत्यद्य तु ध्रुवम् ॥ 394

कः परः सर्ववेदेषु ध्येयः को भगवांस्थितः ।
इदं सर्वमशेषेण वद वेदाद्य सादरम् ॥ 395

वेदपुरुषः -

परो महेश्वरो ज्ञेयः सर्वदेवोत्तमस्ततः ।
ध्येयः स एव भगवान् ध्येयोऽनन्यो मनीषिभिः ॥ 396

विष्णुः (उवाच) -

इति तद्वचनं श्रुत्वा मुनयः शौनकादयः ।
पुनः संशयमापन्ना पप्रच्छुर्विनयान्विताः ॥ 397

ऋषय ऊचुः -

को वा महेश्वरो देवस्तस्य रूपं च कीदृशम् ।
वद सर्वमशेषेण वेदवाक्यैर्यथाक्रमम् ॥ 398

वेदपुरुषः -

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥ 399

नान्यो महेश्वरो ज्ञेयो रूढ एव स शङ्करः ।
स परः सर्वदेवेषु द्विजा ध्येयः स एव हि ॥ 400

सर्वकर्ता सर्वसाक्षी शिव एव महेश्वरः ।
सत्यमेतत्पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ 401

सर्वश्रुतिश्रुतो नित्यः साम्ब एव महेश्वरः ।
सत्यमेतत् .... ॥ 402

सर्वश्रुतिश्रुतो नित्योः रुद्र एव .... ।
सत्यमेतत् .... ॥ 403

सर्वश्रुतिश्रुतो नित्यः सोम एव महेश्वरः ।
सत्यमेतत् .... ।। 404

सर्वश्रुतिश्रुतो नित्यस्त्र्यक्ष एव महेश्वरः ।
सत्यमेतत्पुनः सत्यमुद्धृत्य भुजमुच्यते ।। 405

सर्वश्रुतिश्रुतो नित्यः स्थाणुरेव महेश्वरः ।
सत्यमेतत् .... ।। 406

सर्वश्रुतिश्रुतो नित्यः शम्भुरेव महेश्वरः ।
सत्यमेतत् .... ।। 407

सर्वश्रुतिश्रुतो नित्यः शर्व एव महेश्वरः ।
सत्यमेतत् .... ।। 408

सर्वश्रुतिश्रुतो नित्यो भव एव महेश्वरः ।
सत्यमेतत् .... ।। 409

सर्वश्रुतिश्रुतो नित्यः उग्र एव महेश्वरः ।
सत्यमेतत् .... ।। 410

प्राग्विश्वाधिको रुद्रो विश्वं विष्ण्वादिकं जगत् ।
न रुद्रादधिकः कोऽपि तस्मात्स पर उच्यते ।। 411

यः सोमोऽजनयद्विष्णुं स विष्णोरधिकस्ततः ।
विष्ण्वादिजनकः सोमः सर्वदेवाधिको ध्रुवम् ।। 412

यो वै रुद्रः स भगवानन्यो न भगवान्ध्रुवम् ।
सत्यमेतत्पुनः सत्यमुद्धृत्य भुजमुच्यते ।। 413

ध्येयो मुक्त्यर्थिभिर्नित्यं शिव एकः शिवङ्करः ।
सत्यमेतत् .... ।। 414

निधनेत्यादिभिः कार्यं शिवलिङ्गार्चनं द्विजैः ।
शिवलिङ्गस्वरूपेण यतस्तिष्ठति शङ्करः ।। 415

शिवस्यैवार्चनं कार्यं लिङ्गरूपस्य वैदिकैः ।
अन्यथा नरकं यान्ति सत्यमेवोच्यते मया ।। 416

यो वै रुद्रः स भगवान् स विश्वाधिक उच्यते ।
महेश्वरः स एवेति ज्ञात्वा पूज्यो महेश्वरः ।। 417

महेश्वरमुमाकान्तमनन्यसदृशं प्रभुम् ।
योऽन्यतुल्यतया वेत्ति स चण्डाल इति स्मृतः ।। 418

ईशानः सर्वविद्यानामित्याद्यैर्वचनैर्मया ।
ध्येयः शङ्कर एवेति निश्चितं बहुधा पुरा ।। 419

शिवलिङ्गस्वरूपस्य शिवस्य परमात्मनः ।
कर्तव्यमर्चनं भक्त्या भुक्तिमुक्तिप्रदायकम् ।। 420

ब्राह्मण्यमपि सम्प्रप्य यो नार्चयति शङ्करम् ।
स दुर्भग इति ज्ञेयो ब्राह्मणैर्वेदवित्तमैः ।। 421

येन तप्तं तपः पूर्वमघघ्नं शङ्करालये ।
तस्यैव भवति श्रद्धा शिवलिङ्गसमर्चने ।। 422

यः करिष्यति यत्नेन शिवलिङ्गे शिवार्चनम् ।
स साक्षाच्छङ्करं साम्बं समर्चयति सर्वथा ।। 423

लिङ्गे समर्चितः शम्भुर्ददाति वरमीप्सितम् ।
अतः प्रयत्नतो नित्यं कर्तव्यं लिङ्गपूजनम् ।। 424

उद्धूलनं त्रिपुण्ड्रं च तथा रुद्राक्षधारणम् ।
कर्तव्यमतियत्नेन लिङ्गपूजापरैर्द्विजैः ।। 425

कर्तव्यो लिङ्गपूजान्ते पञ्चाक्षरजपो द्विजैः ।
सहस्रमप्रमादेन रुद्राध्यायजपस्ततः ।। 426

रुद्राध्यायेन कर्तव्यं शिवलिङ्गाभिषेचनम् ।। 427

बिल्वपत्रैः पूजनीयं शिवलिङ्गं प्रयत्नतः ।
अयं मे हस्त इत्याद्यैः सव्यहस्ततलेन यः ।। 428

उपस्पृशेल्लिङ्गपार्श्वं स पापेभ्यो विमुच्यते ।
प्रदक्षिणाष्टकं कार्यमधिकं तु शिवालये ।। 429

कृताञ्जलिपुटैरेव शिवस्मरणपूर्वकम् ।
यानि कानि च पापानि ब्रह्महत्यादिकानि च ।। 430

तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे ।
उत्थायोत्थाय साष्टाङ्गान्प्रणामान् विशदुत्तमान् ।। 431

यः करिष्यति यत्नेन स पापेभ्यो विमुच्यते ।
प्रणम्य परमेशाग्रे करताडनपूर्वकम् ।। 432

यो नृत्यत्यन्वहं भक्त्या स पापेभ्यो विमुच्यते ।
वृषस्य वृषणं स्पृष्ट्वा वृषशृङ्गान्तरान्मुदा ।। 433

यः पश्येल्लिङ्गमैशानं स पापेभ्यो विमुच्यते ।
भुवनत्रयतीर्थानि सर्वाण्यपि निशामुखे ।। 434

वृषाण्डं समुपाश्रित्य तिष्ठन्ति मुनिसत्तमाः ।
वृषाण्डं यः स्पृशेत्सायं स तीर्थान्यखिलान्यपि ।। 435

स्पृष्टः स्नातश्च सततं पूतश्चात्र न संशयः ।
द्रष्टव्यमैश्वरं लिङ्गं वृषशृङ्गान्तराद् द्विजाः ।। 436

वृषेशवृषणं स्पृष्ट्वा शिवस्मरणपूर्वकम् ।
प्रदक्षिणनमस्कारान्कृत्वा दृष्ट्वा च शङ्करम् ।। 437

पुनः प्रदक्षिणं कृत्वा शिवलोके महीयते ।
इमानि नित्यं कार्याणि भस्मधारणपूर्वकम् ।। 438

शिवलिङ्गार्चनादीनि ब्राह्मणाद्यैः प्रयत्नतः ।
सततं शिवपूजायां चित्तं यस्यानुवर्तते ।। 439

स धन्य इति विज्ञेयस्तेन मुक्तिरवाप्यते ।
शिवपूजापि कर्तव्या शिवलिङ्गे निरन्तरम् ।। 440

शिवलिङ्गे कृता पूजा सर्वकामप्रदायिका ।
ये पूजयन्ति सततं शिवलिङ्गं शिवात्मकम् ।। 441

न तेषां गर्भवासादिदुःखानि द्विजपुङ्गवाः ।
शिवनामामृतं येन पीतं येन मुदा मुहुः ।। 442

नैव पास्यत्यसौ मातुः पुनः स्तन्यमितः परम् ।
शिवनामामृते पीते जन्मैव न भविष्यति ।। 443

एवं चेत्स्तन्यपानं तु दुर्लभं ह्यस्य सर्वथा ।। 444

विष्णुः उवाच -

इत्युक्तं तद्वचः श्रुत्वा प्रहृष्टाः शौनकादयः ।
तं देवं पूजयामासुः पूजितोऽन्तर्दधे च सः ।। 445

ततः परं शौनकाद्याः शतकोटिमुनीश्वराः ।
शिवलिङ्गार्चनं कर्तुं तदा चक्रुरुपक्रमम् ।। 446

उद्धूल्य भस्मनाङ्गानि बिल्वपत्रादिभिर्मुदा ।
चक्रुर्वत्सरपर्यन्तं शिवलिङ्गार्चनं द्विजाः ।। 447

ततः परं महादेवः शतकोटिस्वरूपधृक् ।
आविरासीत्कृपासिन्धुः प्रतिलिङ्गार्चकाङ्गणे ।। 448

ददृशुः शौनकाद्यास्ते मुनयो युगपद्द्विजाः ।
नानालङ्कारसम्पन्नान् शतकोटिमहेश्वरान् ।। 449

एकोऽपि श्रीमहादेवो नानारूपधरस्तदा ।
प्रत्यक्षतां गतस्तेषामप्रत्यक्षोऽपि वस्तुतः ।। 450

शतकोटिवृषारूढं शतकोटिशिवान्वितम् ।
दृष्ट्वा ते मुनयः सर्वे पूजां चक्रुर्यथाविधि ।। 451

श्रीरुद्रं विविधाकारं रुद्राध्यायेन ते द्विजाः ।
तुष्टुवुर्हृष्टमनसः कृताञ्जलिपुटास्तदा ।। 452

ततो मुनीनुवाचेदं नानारूपधरः शिवः ।
इष्टं दास्यामि सर्वेभ्यो भवद्भ्यश्च इति सादरम् ।। 453

मुनय ऊचुः -

मोक्षं देहि महादेव मोक्षदामरसत्तम ।
पुरुषार्थः परोक्षे च ततो मोक्षस्त्वपेक्षितः ।। 454

किञ्चास्माकं महादेव शिवलिङ्गार्चने सदा ।
दृढो भवतु विश्वासः शिथिलो मास्तु सर्वथा ।। 455

किञ्चास्माकं महादेव केवलं भस्मधारणे ।
दृढो भवतु .... ॥ 456

किञ्चास्मकं महादेव सदा रुद्राक्षधारणे ।
दृढो भवतु विश्वासः .... ॥ 457

किञ्चास्मकं महादेव शिवतीर्थाटने सदा ।
दृढो भवतु विश्वासः शिथिलो मास्तु सर्वथा ॥ 458

किञ्चास्माकं महादेव शिवनैवेद्यभक्षणे ।
दृढो भवतु .... ॥ 459

ञ्चिास्माकं महादेव शिवभक्तजनार्चने ।
दृढो भवतु विश्वासः शिथिलो मास्तु सर्वथा ॥ 460

विष्णुः (उवाच) -

तद्याचिता वराः सर्वे गिरिजापतिना तदा ।
दत्तास्ततः परं जाता पुष्पवृष्टिर्मनोहरा ॥ 461

ततः परं महादेवो नानारूपधरोऽपि सः ।
क्षणार्धेनैव युगपल्लिङ्गरूपी तिरोदधे ॥ 462

एतादृशं कृपासिन्धुं लिङ्गरूपिणमीश्वरम् ।
नित्यमव्यभिचारेण पूजयन्ति मनीषिणः ॥ 463

शिवः (उवाच) -

एवमुक्त्वा स्थितो विष्णुरेतस्मिन्नन्तरे रविः ।
अस्ताद्रिं समवापाथ सर्वे मौनमधारयन् ।। 464

विष्णुमुख्याश्च ते देवा ऋषयश्च ततः परम् ।
शिवगङ्गातटं प्रापुः सन्ध्याकाले वरानने ।। 465

ततः स्नात्वा समुद्धूल्य भस्मनाङ्गानि सादरम् ।
त्रिपुण्ड्रधारणं चक्रुस्ततो रुद्राक्षधारणम् ।। 566

ततो विल्वदलादीनि पूजोपकरणानि च ।
आदाय पूजयामासुर्मूलस्थानेश्वरं शिवे ।। 567

ततो हेमसभामध्ये रत्नस्तम्भविराजिते ।
मया नाट्यं समारब्धं सायङ्काले मनोरमे ।। 568

नाट्यकाले नन्दिकेशो गृहीत्वा वेत्रमुत्तमम् ।
चकार दूरतो देवानृषीनपि वरानने ।। 569

प्रमथाः कोटिशो देवि मिलिता अनघं शिवम् ।
तुष्टुवुर्हृष्टमनसः कृताञ्जलिपुटास्तदा ।। 570

शिरस्यञ्जलिमाधाय विष्णुब्रह्मादयः सुराः ।
तुष्टुवुर्दूरतः स्थित्वा प्रहृष्टहृदयाम्बुजाः ।। 571

तदा जयजयेत्येवं शब्दा दुन्दुभिनिःस्वनाः ।
तूर्यस्वनाश्च सञ्जाताः सर्वदिक्षु मनोरमाः ।। 572

पुष्पवृष्टिरभूद्देवि तदा कल्पतरुच्युता ।
सुगन्धिशीतलाः शान्ता वायवोऽपि ववुस्तदा ।। 573

तदा मृदङ्गवाद्यानि गृहीत्वा केशवः शिवे ।
सेवां कर्तुं समारेभे देवि सर्वेश्वरस्य मे ।। 574

ब्रह्मा तालान् गृहीत्वा मां सिषेवे वागपि प्रिये ।
वीणां गृहीत्वा विमलां सिषेवे गानलोलुपा ।। 575

नाट्यसंरंभसम्पन्नं गन्धर्वा गणनायकाः ।
मुदा जय जयेशेति तुष्टुवुर्हृष्टमानसाः ।। 576

कृतं नाट्यं ततो देवि पुरस्तात्तव सादरम् ।
नाट्यविद्यामभिनयन्नमोहयमिदं जगत् ।। 577

पादं विन्यस्य पादाग्रे हस्तं हस्तेन सम्भ्रमात् ।
कृत्वापि कुटिलां ग्रीवां कृतं नाट्यं मया शिवे ।। 578

भूमिर्भ्रमिरिवाभून्मे न्यासो न्यास इवाभवत् ।
चित्रं चित्रमिवाभून्मे नर्तकस्य ममेश्वरि ।। 579

व्यूहो व्यूह इवाभून्मे रतिरासीद्रतिर्यथा ।
विरक्तिरासीत्सुभगे विरक्तिरिव सर्वतः ।। 580

विकारोऽभूद्विकारो मे निर्विकारस्य वस्तुतः ।
अङ्गुल्यग्रे निधायाङ्गं उत्तमाङ्गे तदग्रकम् ॥ 581

विधाय नृत्यतो देवि ममाभून्मङ्गलं स्वतः ।
नित्यमङ्गलसन्तुष्टस्तन्यङ्गलमनर्घकम् ॥ 582

युगपन्मिलितं जातं मङ्गले मङ्गलं यथा ।
नृत्यव्यूहं ममादिष्टं ददृशुः केचिदास्तिकाः ॥ 583

केचिन्न ददृशुर्देवि भ्रमन्तो दिक्षु सर्वतः । 584

नृत्याकुञ्चितसव्यचारुचरणप्रान्तोल्लसन्नूपुरं
लीलाचालितरत्नकङ्कणझणस्फारोत्करश्राविणम् ।
दीर्घानर्घजटाविघट्टनपटुत्रुट्यन्महोडुच्छटं
नृत्यन्तं ददृशुः शिवे सुरगणाःसायं मुदा मां शिवम् ॥

॥ इति श्रीशिवरहस्ये सप्तमांशे शिवगौरीसंवादो नाम
चतुर्विंशोऽध्यायः ॥

॥ पञ्चविंशोऽध्यायः ॥

श्रीशिव उवाच -

पश्यतां नृत्तमानन्दं सुराणां शोभने ततः ।
क्षणमात्रमभूद्रात्रिररुणोऽप्युदितस्ततः ॥ 1

ततः स्नात्वा यथाशास्त्रमुद्धूल्याङ्गानि भस्मना ।
रुद्राक्षधारणं कृत्वा सन्ध्यां चक्रुस्ततः परम् ॥ 2

ततो विष्णुविधीन्द्राद्या मुनयश्च प्रयत्नतः ।
श्रीमूलस्थाननाथं मां पूजयामासुरम्बिके ॥ 3

प्रदक्षिणादिकं कृत्वा पञ्चाक्षरजपं ततः ।
सर्वे हेमसभामध्ये प्रविष्टाः कमलानने ॥ 4

ततस्ते शाङ्कराः सर्वे भस्मोद्धूलितविग्रहाः ।
शिवधर्मान्वदस्वेति विष्णुमूचुर्मदर्चकम् ॥ 5

ततः प्रणम्य विष्णुर्मां भक्त्या विनयपूर्वकम् ।
मदर्चनफलं वक्तुं (सर्वं) शिवे वक्तुं प्रचक्रमे ॥ 6

विष्णुरुवाच -

भुक्तिमुक्तिप्रदं पुण्यं श्रीमहादेवपूजनम् ।
श्रुतं श्रुतिषु सर्वत्र तत्कार्यममरैर्द्विजैः ॥ 7

विल्वपत्रेण सम्पूज्य लिङ्गरूपिणमीश्वरम् ।
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः ।। 8

बिल्वपत्रैर्महादेवः पूजितः श्रद्धया द्विजाः ।
अवशोऽपि स्वतः शुद्धो वशो भवति वस्तुतः ।। 9

पुरा कश्चिद् द्विजवरः शिवलिङ्गार्चनप्रियः ।
बिल्वपत्रैर्महादेवं पूजयित्वा स्थितस्सदा ।। 10

विल्वपत्राण्यलभ्यानि भविष्यन्तीति शङ्कया ।
शुष्काणि बिल्वपत्राणि सङ्गृह्यास्थापयद्बहु ।। 11

नवानि विल्वपत्राणि न प्राप्नोति यदा तदा ।
सुशुष्कैर्विल्वपत्रैस्तु तल्लिङ्गं समपूजयत् ।। 12

विल्वैः शिवात्मकं लिङ्गमनभ्यर्च्य महीसुरः ।
न पिबेदल्पमप्यम्बु तृषार्तोऽपि स्वयं सुराः ।। 13

एवमाचरणैर्विप्रः प्रीणयामास शङ्करम् ।
विल्वरक्षक इत्येतन्नाम तस्य बभूव च ।। 14

ततः कदाचिद्गौरीशस्तस्मै दातुं वरान्द्विजाः ।
चोररूपं समालम्ब्य प्रविवेश तदालयम् ।। 15

चोररूपधरैरेष प्रमथैरपि संवृतः ।
तं द्विजं गृहमध्यस्थमुवाच स्वार्चकं शिवः ।। 16

शिवः (उवाच) -

रे रे किं क्रियते विप्र द्रव्यं दर्शय दर्शय ।
अन्यथा ताडयिष्यामि प्राणान्गृह्णाम्यसंशयम् ।। 17

विष्णुः (उवाच) -

इत्युक्त्वा गृहमध्यस्थान्विल्वपत्रघटान्बहून् ।
दृष्ट्वा प्रोवाच वचनं प्रमथान्प्रति शङ्करः ।। 18

शिव (उवाच) -

एते धनघटाः सर्वे स्थिता गेहे शताधिकाः ।
एतान्घटान्गृहीत्वैव भवन्तो यान्त्विवति द्विजाः ।। 19

विष्णुः (उवाच) -

इत्युक्तं तद्वचः श्रुत्वा स विप्रो दुःखितस्तदा ।
विल्वपत्रघटाः सर्वे धनं नेति तमब्रवीत् ।। 20

इत्युक्त्वा बिल्वपत्राणि घटमध्ये स्थितानि सः ।
सत्वरं दर्शयामास तमुवाच ततः शिवः ।। 21

शिवः (उवाच) -

जायते धनमेतेभ्यः पत्रेभ्यो नात्र संशयः ।
रक्षणं नवभाण्डेषु पत्राणां कथमन्यथा ।। 22

एते घटा मया सर्वे नेया एव न संशयः ।
प्राप्तव्यं धनमेतेभ्यः पत्रेभ्योऽस्माभिरन्वहम् ।। 23

विष्णुरुवाच -

इत्युक्तं तद्वचः श्रुत्वा द्विजो दुःखसमाकुलः ।
हत्वा मां तदनु प्रीत्या नयैतानित्युवाच तम् ।। 24

तथैवास्त्विति गौरीशः शास्त्रमुद्यम्य
(शस्त्रं जग्राह) पाणिना ।
ततः परं स विप्रोऽपि निश्चित्य मरणं स्वकम् ।। 25

चिन्ताव्याकुलितो भूत्वा स्वपुत्रं प्रत्युवाच सः ।। 26

द्विज उवाच -

पुत्र बिल्वदलान्येतान्यगृह्णामतियत्नतः ।
बिल्वालाभे हि पूजार्थं सन्त्वेतानीत्यरक्षिषम् ।। 27

एतावन्त्यपि पत्राणि सम्पाद्यानि कथं मया ।
अधुना बिल्वपत्राणि न लभ्यन्ते वनेष्वपि ।। 28

बिल्वपत्रार्चनं त्यक्त्वा न पिबामि जलान्यपि ।
बिल्वपत्रार्चनाभावे मरणं मे भविष्यति ।। 29

तथाचाद्यैव सन्त्यक्ष्ये तनुमेतां न संशयः ।
प्रायेण मृत्युकालोऽद्य ममाद्य समुपस्थितः ।। 30

गच्छ जीव सुरारण्यं बिल्ववृक्षसमावृतम् ।
बिल्वपत्रैर्बिल्वमूले शिवमर्चय भक्तितः ।। 31

मा त्यजार्भक मोहेनापीश्वरस्य प्रपूजनम् ।
बिल्वपत्रैरवश्यं ते पूजनीयः सदाशिवः ।। 32

वनवासरतैः साकं प्रीतिं कुरु सदार्भक ।
शृणु शैवीं कथामेव जप पञ्चाक्षरं सदा ।। 33

उद्धूलनत्रिपुण्ड्राभ्यामलङ्कुरु सदा तनुम् ।
रुद्राक्षधारणं चैव कुरु प्रीत्या निरन्तरम् ।। 34

विष्णुरुवाच -

इति तद्वचनं श्रुत्वा पुत्रोऽपि पितृवत्सलः ।
मयापि बिल्वरक्षार्थं तनुस्त्याज्येत्युवाच तम् ।। 35

ततः परं स विप्रेन्द्रो भस्म धृत्वा यथाविधि ।
सरुद्राक्षो महादेवं पूजयामास भक्तितः ।। 36

प्रदक्षिणनमस्कारांश्चकार तदनन्तरम् ।
शिवतीर्थं ततो विप्रः पपौ पावनपावनम् ।। 37

ततः शिवार्पितां शुद्धां बिल्वमालां दधार सः ।
ततस्तुष्टाव गिरिशं रुद्रासूक्तैरनेकधा ।। 38

ततो जजाप शुद्धात्मा शिवपञ्चाक्षरं द्विजः ।
ततो जजाप श्रीरुद्रं शिवलिङ्गस्य सन्निधौ ।। 39

तत्पुत्रो भस्मरुद्राक्षान्धृत्वा मातृसमन्वितः ।
चकार पूजनं शम्भोः पितृवत्पितृवत्सलः ।। 40

ततस्त्रयोऽपि रुद्राक्षान्स्थापयित्वा मुखान्तरे ।
ततश्चक्रुः पुनः पूजां शिवलिङ्गे शिवात्मके ।। 41

सकुटुम्बस्ततो विप्रः शिवपञ्चाक्षरं जपन् ।
सत्वरं मारयेत्युक्त्वा शिवाग्रे संविवेश सः ।। 42

ततः कृपानिधिः शम्भुस्तं विप्रं मरणोन्मुखम् ।
दृष्ट्वा स्वरूपममलं दर्शयामास सत्वरम् ।। 43

स ददर्श महादेवं सकुटुम्बो द्विजोत्तमः ।
अत्युच्चवृषभारूढं प्रमथैरुपसेवितम् ।। 44

सस्तूयमानममरैर्देवैर्नानाविधैरपि ।
उमासंश्लिष्टवामाङ्गं व्याघ्रचर्मधरं प्रभुम् ।। 45

अनेकचन्द्रसूर्याग्निप्रभाविस्फुरितप्रभम् ।
चन्द्रावतंसमानन्द्यं भस्मभूषितविग्रहम् ।। 46

अनेकरत्नमालाभिः समलङ्कृतविग्रहम् ।
चन्द्रसूर्याग्निनयनं प्रसन्नमुखपङ्कजम् ।। 47

एतादृशं महादेवं दृष्ट्वा सन्तुष्टमानसः ।
स विप्रः पूजयामास बिल्वपत्रादिसाधनैः ॥ 48

ततस्तुष्टाव गिरिशं रुद्राध्यायादिभिर्द्विजः ।
ततः प्रणम्य बहुधा कृताञ्जलिपुटः स्थितः ॥ 49

ततः स्तुतो महादेवः पूजितश्च प्रयत्नतः ।
दास्यामीष्टान्वरान्विप्र वरयेति तमब्रवीत् ॥ 50

द्विजः (उवाच) -

कृतार्थोऽस्मि महादेव त्वत्पादाम्बुजदर्शनात् ।
यदिदं चिन्त्यते नित्यं योगिभिर्योगतत्परैः ॥ 51

तदिदं पादकमलं तव देवोत्तम प्रभो ।
सर्वदेवस्तुतं नित्यं दृष्टं भाग्यवशान्मया ॥ 52

यद्विष्णुनेत्रपद्मेन पूजितं त्वत्पदाम्बुजम् ।
सर्वामरगणाराध्यं दृष्टं भाग्यवशान्मया ॥ 53

इदमत्युत्तमं रूपं दृष्टं केनापि न प्रभो ।
दृष्टमद्य मया शम्भो त्वत्प्रसादेन मोक्षदम् ॥ 54

भक्तिस्त्वय्येव सततं ममास्त्वव्यभिचारिणी ।
नित्यं तवैव पूजायां मतिरस्तु मम प्रभो ॥ 55

तव नामजपे भक्तिर्ममास्त्वन्वहमीश्वर ।
भक्तिरस्त्वनिशं शम्भो तव नामानुकीर्तने ।। 56

नित्यं मम मनोभृङ्गस्तवैव चरणाम्बुजे ।
सञ्चरत्वतिसन्तुष्टो मोक्षपुण्यरसान्वितः ।। 57

त्वत्पादकमलद्वन्द्वे द्वन्द्वदुःखनिवारके ।
विष्णुनेत्राञ्चिते नित्यं प्रीतिरस्तु महेश्वर ।। 58

ममास्तु भक्तिरनिशं भस्मरुद्राक्षधारणे ।
ममास्तु भक्तिरनिशं शिवभक्ताभिपूजने ।। 59

शम्भो शिव शिवेत्येव वदतो मम शङ्कर ।
भस्मरुद्राक्षवपुषस्तनुत्यागोऽस्तु मोक्षद ।। 60

विष्णुरुवाच -

इति तद्याचितान्दत्वा वरान्देवोत्तमः शिवः ।
पुनः सम्पूजितस्तेन तत्रैवान्तर्दधे द्विजाः ।। 61

एतादृशं वेदवेद्यं कृपासागरमीश्वरम् ।
पूजयन्त्यतियत्नेन भूरिपुण्यास्तपोधनाः ।। 62

भस्मना बिल्वपत्रैश्च येऽर्चयन्ति सदाशिवम् ।
न तेषां गर्भवासादिदुःखानीति श्रुतिर्द्विजाः 63

पुरा कश्चिद् द्विजवरो जाबालार्थविदन्वहम् ।
स नित्यं भस्मना शम्भुं लिङ्गरूपिणमव्ययम् ।। 64

सम्पूज्य विल्वपत्राद्यैस्ततोऽर्चयति सादरम् ।
स सर्वदा नवे भाण्डे भस्म सम्पूर्य सादरम् ।। 65

स्वयमुद्धूलनं कृत्वा कृत्वा नित्यं त्रिपुण्ड्रकम् ।
रुद्राक्षधारणं कृत्वा पूजयेत् शिवमव्ययम् ।। 66

आत्मार्थे पूजनार्थे च पृथक्कृत्वा च भस्म तत् ।
अभिषिच्य शिवं तीर्थैर्भस्मना चाभिषेचयेत् ।। 67

कदाचिदथ विप्रोऽसौ कर्म प्राभातिकं चरन् ।
शिवपूजाविधानाय सङ्कल्प्य विधिपूर्वकम् ।। 68

रुद्रसूक्तादिभिश्चक्रे भक्त्या रुद्राभिषेचनम् ।
अथ भस्माभिषेकाय भूत्यर्थ भाण्डमैक्षत ।। 69

आत्रान्तरे महादेवस्तस्मै दातुं वरं परम् ।
इच्छन् भाण्डगतं भस्म सर्वं चक्रे तिरोहितम् । 70

अथासौ शिवपूजार्थमलब्ध्वा भस्म शाङ्करम् ।
अतिदुःखसमाक्रान्तो गलद्वाष्पो बभूव च ।। 71

शिवार्चनार्थं सङ्कल्पः कृतोऽद्य शिवसन्निधौ ।
शिवपूजा कथं कार्या विना शाङ्करभस्मना ।। 72

शिवपूजान्तरायेण सङ्कल्पप्रच्यवोऽप्यभूत् ।
शिवपूजापरित्यागे नरको मे भविष्यति ।। 73

अतश्चाद्य विधायाहं चितां तत्र स्वकां तनुम् ।
सत्वरं निक्षिपाम्यग्नौ ज्वालामालासमाकुले ।। 74

विष्णुः (उवाच) -

इति निश्चित्य विप्रेन्द्रः सत्वरं भस्मना विना ।
पूजां निर्वर्तयामास त्रिल्वपत्रादिसाधनैः ।। 75

अथ प्रणम्य साष्टाङ्गं स्तुत्वा च वहुधा स्तवैः ।
जजाप शतरुद्रीयं पञ्चाक्षरमतः परम् ।। 76

ततः पुनः प्रणम्येशं कृत्वा कर्म शिवार्पणम् ।
प्राणत्यागपरः काष्ठैः शुष्कैश्चक्रे चितां तदा ।। 77

ततः प्रज्वलयामाम चितां तामद्रिसन्निभाम् ।
ततः प्रदक्षिणां कृत्य चितां विप्रः शिवैकधीः ।। 78

ततः शिव महेशान शङ्करेति समुच्चरन् ।
प्रविवेश चितां विप्रः शिवं ध्यायन्नुमापतिम् ।। 79

तदानीं श्रीमहादेवः करुणासागरः प्रभुः ।
आविरासीद्वृषारूढः शिवाश्लिष्टवपुः शिवः ।। 80

शशाम शीतलो जातः प्रवज्ज्वलन्नपि पावकः ।
स ददर्श ततः शम्भुं नानाप्रमथसेवितम् ।। 81

उमासंश्लिष्टवामाङ्गं वृषभारूढमव्ययम् ।
सोमसूर्याग्निनयनं सोमार्धकृतशेखरम् ।। 82

अभयप्रदमीशानं चेकितानमजं विभुम् ।
अनन्तचन्द्रप्रतिममनन्तरविसन्निभम् ।। 83

अनन्तवह्निप्रतिमं वस्तुतोऽप्रतिमं शिवम् ।
अतिसुन्दरमीशानममेयगुणसंश्रयम् ।। 84

मन्दारमालासंवीतं वृन्दारकगणार्चितम् ।
एतादृशं शिवं दृष्ट्वा प्रहृष्टहृदयो द्विजः ।। 85

पूजयामास यत्नेन प्रणम्य च पुनः पुनः ।
अथ रुद्रं महादेवं श्रीरुद्रेण कृताञ्जलिः ।। 86

तुष्टाव परया भक्त्या स्तवैरन्यैश्च सादरम् ।
सुप्रीतो भगवाञ्छम्भुर्वरं वरय सुव्रत ।। 87

प्रसन्नोऽस्मीति तं प्राह तथास्मि च वरप्रदः ।
इत्युक्तमीशवचनं श्रुत्वा सोऽपि द्विजोत्तमः ।। 88

मूर्धन्यञ्जलिमाधाय प्राह शम्भुं शिवार्चकः ।। 89

द्विज उवाच -

कृतार्थोऽस्मि महादेव तव पादाब्जदर्शनात् ।
धन्योऽस्मि कृतकृत्योऽस्मि पूतो जातोऽस्मि शङ्कर ॥ 90

जन्म पावनमेतन्मे मम वंशोऽपि पावनः ।
यतस्त्वत्पादपद्मस्य दर्शनं जातमद्य मे ॥ 91

मम माताऽभवद्धन्या पिता धन्योऽभवन्मम ।
यतस्त्वात्पादकमलं दृष्टं मुक्तिप्रदं मया ॥ 92

तवैतदुत्तमं रूपं न वेदैरपि दृश्यते ।
मया भाग्यवशादद्य दृष्टं रूपं तव प्रभो ॥ 93

महेश तव पूजार्थमुपविष्टस्य मे प्रभो ।
प्रत्यूहो मा भवत्वीश कदाचिदपि सर्वथा ॥ 94

शम्भो ममास्तु विश्वासः शिवलिङ्गैकपूजने ।
त्वय्येवाव्यभिचारेण भक्तिरस्तु मम प्रभो ॥ 95

शिवमन्त्रजपेऽप्येवं श्रद्धास्तु मम शङ्कर ।
नित्यं शिवकथास्वेव श्रोत्रमेतत्प्रवर्तताम् ॥ 96

शिवनामामृतं पातुं जिह्वैषापि प्रवर्तताम् ।
शिवतीर्थान्यगमने मतिर्मे न प्रवर्तताम् ॥ 97

उमापते महादेव शिवेति वदतो मम ।
तनुत्यागोऽस्तु गौरीश त्वद्दर्शनपुरःसरम् ॥ 98

दानपात्रमहं शम्भो दानकालोऽयमीश्वर ।
दाता त्वन्नेतरो याच्यो याच्या भक्तिस्त्वयि प्रभो ।। 99

न याचे न याचे महादेव शम्भो
वरानन्यदेवानहं भक्तबन्धो ।
परन्त्वेकरूपां मदन्यैरलभ्यां
भवद्भक्तिमेकां परामीश याचे ।। 100

ययैवेश भक्त्या तृणीकृत्य सर्वा-
नुपेन्द्रादिदेवानहं सर्वथापि ।
त्वदर्चापरो नित्यमव्यग्रचित्तो
निरातङ्कमेवं भवन्तं भजामि ।। 101

तवैतत्पदद्वन्द्वमिन्द्रादिवन्द्यं
सदोपेन्द्रहृत्पङ्कजारूढमीड्यम् ।
ममापि स्फुरत्वीश हृत्पद्ममध्ये
मुकुन्दाक्षिपद्मार्चितं वेदवेद्यम् ।। 102

महादेव विश्वेश विश्वैकवन्द्य
स्मरारे पुरारे महापातकारे ।
महेशेति नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं साधु जिह्वा ममैषा ।। 103

विभो देव देवेश गौरीश शम्भो
यमारे गजारे भवारेऽन्धकारे ।
शिवेशेति नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं साधु जिह्वा ममैषा ॥ 104

उमाकान्त मौनेन्द्रविश्रामहेतो
जगज्जीवनानन्दधर्मैकसेतो ।
निरीहेति नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं .... ॥ 105

निराकार निर्लिप्त चन्द्रार्धमौले
मुकुन्दादिवृन्दारकाराध्यमूर्ते ।
परेशेति नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं .... ॥ 106

मुनिस्वान्तपद्मप्रबोधैकभानो
स्फुरत्फालभागोत्थलीलाकृशानो ।
गिरीशेति नामामृतं त्वत्प्रसादा-
त्पिबत्वन्वहं .... ॥ 107

गुणातीत कल्याणनानागुणाब्धे
वृषाधीशकेतो महापुण्यहेतो ।

सुरेशेति नामामृतं त्वत्प्रसादा-

त्पिबत्वन्वहं .... ॥ 108

कृपापात्र चन्द्रानलोष्णांशुनेत्र

स्वभक्तैकमित्राद्रिकन्याकलत्र ।

उमेशेति नामामृतं त्वत्प्रसादा-

त्पिबत्वन्वहं .... ॥ 109

शिव श्रीपतिस्वच्छनेत्रारविन्द-

स्फुरत्पादपद्मामितानन्तभोग ।

कृपाब्धेति (गिरीशेति) नामामृतं त्वत्प्रसादा-

त्पिबत्वन्वहं .... ॥ 110

हरामेय निर्द्वन्द्व वेदान्तवेद्य

त्रिशूलिन्नुमाकान्त कर्पूरगौर ।

निरागेति नामामृतं त्वत्प्रसादा-

त्पिबत्वन्वहं साधु जिह्वा ममैषा ॥ 111

विष्णुरुवाच -

इति स्तुतो महादेवः सर्वदेवशिखामणिः ।

तथास्त्वित्यर्चितो लिङ्गे तत्रैवान्तर्दधे द्विजाः ॥ 112

एतादृशो महादेवः सर्वदेवस्तुतः सदा ।
पूजनीयोऽन्वहं सर्वैर्मनोवाक्कायकर्मभिः ॥ 113

पुरा हिमाद्रिशिखरे वसिष्ठाद्या मुनीश्वराः ।
तपस्तेपुः शिवाचारे विश्वासोऽस्त्विवति सर्वदा ॥ 114

तप्यमानास्तपस्तीव्रं सर्वे पञ्चाग्निमध्यगाः ।
अगस्त्यं ददृशुर्विप्राः शिवपूजापरायणाः ॥ 115

तमगस्त्यं वसिष्ठाद्याः सम्पूज्यार्घ्यादिसाधनैः ।
संसार ता(त)रणोपायं पप्रच्छुर्विनयान्विताः ॥ 116

द्विजः उवाच (द्विजा ऊचुः) -

तरणीयः कथं मर्त्यैर्घोरसंसारसागरः ।
को वास्ति तरणोपायः सर्ववेदान्तसंस्तुतः ॥ 117

विष्णुरुवाच -

अगस्त्यस्तद्वचः श्रुत्वा भस्मभूषितविग्रहः ।
संसारतरणोपायं ततो वक्तुमुपक्रमे(वक्तुं प्रचक्रमे)॥ 118

अगस्त्यः (उवाच) -

संसारतरणोपायः पार्वतीवल्लभः प्रभुः ।
तत्र यो नियतस्तेन तीर्णः संसारसागरः ॥ 119

शिवार्चनं विना नान्यद्घोरसंसारतारकम् ।
तस्माच्छिवार्चनं कार्यं घोरसंसारनाशकम् ।। 120

उमाकान्तार्चनं विप्राः संसारविषभेजम् ।
तद्भेषजं न यस्यास्ति स संसारविषाप्लुतः ।। 121

शिवाऽनाराधनाज्जाताः सर्वे संसारिणो द्विजाः ।
तिष्ठन्त्यपि भविष्यन्ति बहवः प्रतिजन्मनि ।। 122

शिवाराधनमात्रेण घोरः संसारसागरः ।
शुष्को भवति विप्रेन्द्राः सत्यं सत्यं न संशयः ।। 123

यथा सर्पविषग्रस्ता म्रियन्ते भेषजं विना ।
संसारसागरो नाम दुःखसागर उच्यते ।। 124

तदब्धौ च पतन्त्येव सन्त्यक्तशिवपूजनाः ।
पुरा शचीपतिः स्वर्गे सभामण्डल(मण्टप) मध्यगः।। 125

मेने कृतार्थमात्मानं सभासत्समुपासितः ।
ततः स मोहसङ्क्रान्तो मुहूर्तं विवशो द्विजाः ।। 126

अथ व्याकुलितो जातः स सुराणामधीश्वरः ।
गुरुं संवीक्ष्य निकटे बभाषे वचनं द्विजाः ।। 127

इन्द्र उवाच -

व्याकुलं समभूच्चित्तं गुरो हेतुं विनाद्य मे ।
कम्पते तनुरेषा मे वायुनेव लताद्य मे ॥ 128

वचो न निःसरत्येव मुखान्मे सुरपूजित ।
कृष्णभूतेन्दुरेखेव दृश्यते मे मया तनुः ॥ 129

एतावत्कालपर्यन्तं सुखेनैव स्थितं मया ।
अधुनैवेदमुत्पन्नं दुःखमज्ञातहेतुकम् ॥ 130

दुःखमेतन्मया सर्वं चतुर्वक्त्राय सत्वरम् ।
निवेदनीयं यत्नेन त्वमप्यायाहि मत्कृते ॥ 131

अगस्त्यः -

इत्युक्त्वा स गुरुं वज्री गुरुणा च समन्वितः ।
प्रययौ ब्रह्मलोकाय ददर्श च विधिं ततः ॥ 132

रुद्राक्षमालावीताङ्गं भस्मोद्धूलितविग्रहम् ।
लिङ्गार्चकं विधिं नत्वा प्रकृतं विनिवेदयत् ? ॥ 133

ततस्तद्वचनं श्रुत्वा विधिर्विस्मितमानसः ।
उवाचेन्द्रं यथायोग्यं यथाज्ञातं तथा द्विजाः ॥ 134

ब्रह्मोवाच -

इन्द्राद्य न त्वया सम्यक् पूजितः पार्वतीपतिः ।
तेनैव व्याकुलं जातं तव चित्तमनाकुलम् ।। 135

येन न क्रियते नित्यं यथाविधि शिवार्चनम् ।
तेन दुःखानि सर्वाणि प्राप्यन्ते नात्र संशयः ।। 136

दुःखालया भवन्त्येव सर्वे त्यक्तशिवार्चनाः ।
त्यक्तेशपूजनैरेव प्राप्यते दुःखमन्वहम् ।। 137

शङ्करं शङ्करं नित्यं यो नार्चयति सादरम् ।
न तस्य सुखलेशोऽपि सत्यं सत्यं न संशयः ।। 138

यथा दुःखवशं यान्ति शङ्करेतरपूजकाः ।
तथा दुःखवशं यन्ति त्यक्तशङ्करपूजनाः ।। 139

शङ्करं सम्यगाराध्य प्राप्नुवन्तीशमन्वहम् ।
शङ्कराराधने त्यक्ते कथं शमुपलभ्यते ।। 140

शङ्करार्चनमेवैकं परमानन्दसाधनम् ।
तदन्यन्न श्रुतं वज्रिन्परमानन्दसाधनम् ।। 141

देवेष्वन्येषु वा वज्रिन् शङ्करान्यो न शङ्करः ।
ततः शमाप्तुं कुर्वन्ति शङ्कराराधनं द्विजाः ।। 142

शमाप्तुं यतते यस्तु विना शङ्करपूजनम् ।
स मूर्ख इति विज्ञेयो नेतरो मूर्ख उच्यते ।। 143

कायेन मनसा वाचा ये शङ्करमुपासते ।
ते पण्डिता इति ज्ञेयाः पूज्यास्ते धनिभिर्धनैः ।। 144

शङ्करासक्तचित्तानां न दूरे शं ततः सदा ।
शङ्कराराधनं कार्यं शर्मार्थिभिरहर्निशम् ।। 145

स्वर्गापवर्गफलदं शङ्करं लोकशङ्करम् ।
ये पूजयन्ति सततं धन्यास्ते नात्र संशयः ।। 146

भगवान्पार्वतीनाथः सर्वाभीष्टफलप्रदः ।
स एव पूज्यते नित्यं तस्य दुःखं न सर्वथा ।। 147

बहवो मुनयः पूर्वमुमाकान्तस्य पूजया ।
दुःखपाशविनिर्मुक्ताः शङ्करं समुपाययुः ।। 148

पुरा विष्णुः प्रमादेन विहाय शिवपूजनम् ।
अकाण्डे व्याकुलो जातः स्विन्नगात्रोष्ठतालुकः ।। 149

आर्तातिदुःखितं दृष्ट्वा कमला कमलापतिम् ।
दुःखापहारकं किञ्चिदुवाच कृतनिश्चया ।। 150

लक्ष्मीः -

विष्णो पूजय देवेशमुमाकान्तमनामयम् ।
तत्पूजयैव दुःखेभ्यः सद्यो मुक्तिर्भविष्यति ।। 151

मृत्युञ्जयमुमाकान्तं त्वमेवाभ्यर्च्य सादरम् ।
प्राप्नोषि विजयं पूर्वं हृष्टो भव मुरारिहन् ।। 152

महादेवं विनास्माकं नास्ति दुःखनिवारकः ।
तत्पूजां कुरु यत्नेन केशव क्लेशहारिणीम् ।। 153

अस्माकममरादीनां शिव एवेष्टदैवतम् ।
दुःखं विनश्यत्यखिलं इष्टदैवतपूजया ।। 154

करिष्यसि यदि प्रीत्या सत्वरं शङ्करार्चनम् ।
तदा त्वयाऽधुना सौख्यं प्राप्स्यते गरुडध्वज ।। 155

केशवालस्यरहितः कुरु शङ्करपूजनम् ।। 156

ब्रह्मोवाच -

इत्युक्तं तद्वचः श्रुत्वा केशवः सत्वरं तदा ।
शङ्करं पूजयामास दुःखान्मुक्तोऽभवत्तथा ।। 157

एवमुक्त्वा विधिः सेन्द्रो वैकुण्ठं प्राप सत्वरम् ।
विष्णुं ददृशतुस्तत्र शिवव्रतपरायणम् ।। 158

अगस्त्यः -

तं दृष्ट्वा पद्मपत्राक्षं नत्वा धाता कृताञ्जलिः ।
देवेन्द्रोक्तं यथापूर्वं ज्ञापयामास विष्णवे ॥ 159

ततस्तद्वचनं श्रुत्वा विष्णुः शङ्करपूजकः ।
वेदवेदान्ततत्वज्ञः प्राह वाचं सुखावहाम् ॥ 160

विष्णुः (उवाच) -

तावत्स्थास्यन्ति दुःखानि यावन्नाराध्यते शिवः ।
तावदेव महाव्याधिः यावन्नाराध्यते शिवः ॥ 161

तावत्तिष्ठन्ति पापानि यावन्नाराध्यते शिवः ।
तावद्भवति दारिद्र्यं यावन्नाराध्यते शिवः ॥ 162

यथा सूर्योदये जाते विनश्यति तमस्तथा ।
पूजिते श्रीमहादेवे दुःखमात्रं विनश्यति ॥ 163

नानादुःखमहाव्याधिभेषजं शिवपूजनम् ।
सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ 164

नानासंसारदुःखानि नश्यन्ति शिवपूजया ।
सत्यं सत्यमिति प्राह जाबालोऽपि स्वयं विधे ॥ 165

संसारजां रुजं रुद्रो द्रावयत्यर्चितः सदा ।
ततोऽर्चनीयमनिशं रुद्रलिङ्गं मुमुक्षुभिः ।। 166

सर्वमन्यत्परित्यज्य शिव एव शिवङ्करः ।
ध्येय इत्याह हि विधे साक्षादाथर्वणश्रुतिः ।। 167

पूजनीयो महारुद्रो मनोवाक्कायकर्मभिः ।
तत्पूजयैव नश्यन्ति दुःखानि विविधान्यपि ।। 168

विनाशयति संसारं सकृत्सम्पूजनाच्छिवः ।
भावपूतं महादेवं योऽर्चयिष्यति सन्ततम् ।। 169

स सम्प्राप्नोति धर्मार्थकाममोक्षान्न संशयः ।
संसारसागरं घोरं यः समुत्तर्तुमिच्छति ।। 170

तेन नित्यं महादेवः पूजनीयः प्रयत्नतः ।
धन्योऽसाविति विज्ञेय योऽन्वहं पूजयेच्छिवम् । 171

स तरत्येव संसारं नानापातकसागरम् ।
शिवेति नामदावाग्निर्महापापवनान्यपि ।। 172

भस्मसात्कुरुते सद्यः सत्यं सत्यं न संशयः ।
पापमूलानि दुःखानि विविधान्यपि तान्यतः ।। 173

शिवार्चनेन नाश्यानि पापानि निखिलन्यपि ।
[illegible] निवर्तन्ते यावन्ति शिवपूजया ।। 174

कर्तुं तावन्ति पापानि न शक्नोति नरः क्वचित् ।
संसारमूलभूतानां पातकानां चतुर्मुख ।। 175

शिवनामकुठारेण विनाशो जायते ध्रुवम् ।
शिवनामामृतं पेयं पापचण्डांशुतापितैः ।। 176

पापदावाग्नितप्तानामस्ति नान्यत्परायणम् ।
शिवेति नामपीयूषवर्षधारापरिप्लुताः ।। 177

संसारदावमध्येऽपि न शोचन्ति न संशयः ।
येषां धर्मस्वभावानां महेशः कुलदैवतम् ।। 178

ते धन्यास्ते ममाराध्यास्ते महेशकृपाश्रयाः ।
न भक्तिः शङ्करे पूजा रागद्वेषरतात्मनाम् ।। 179

अनन्तजन्मभिर्येन तपस्तप्तं भविष्यति ।
तद्विधानां न सहसा मुक्तिर्भवति सर्वथा ।। 180

तस्यैव भक्तिर्भवति भवानीप्राणवल्लभे ।
जातापि शङ्करे भक्तिरन्यसाधारणी वृथा ।। 18[illegible]

परन्त्वव्यभिचारेण शिवभक्तिः परेप्सिता ।
(परा+ईप्सिता)
यस्यास्त्यामरणं शम्भौ भक्तिरव्यभिचारिणी ।। 1[illegible]

तस्यैव मोक्षः सुलभो नान्यस्येति मतिर्मम ।
विधे भवन्ति प्रत्यूहाः शिवभक्तिविघातकाः ।। 1[illegible]

प्रत्यूहास्ते शमं यान्ति महेशानुग्रहात्परात् ।
यस्य भक्तिरनुस्यूता देहपातान्तमीश्वरे ॥ 184

स शिवान्यगृहीतात्मा न भवत्येव तादृशः ।
यस्य भक्तिर्महादेवे धारारूपाऽनुवर्तते ॥ 185

नमस्तस्मै सवंशाय समित्राय चतुर्मुख ।
शिवौ पूज्यौ यथा नित्यं तथा पूज्यः शिवार्चकः ॥ 186

शिवार्चकः शिवौ चेति त्रयः पूज्या ममान्वहम् ।
अनेकजन्मतपसा पूतः पुण्यौघसंश्रयः ॥ 187

महादेवपरो भूत्वा यजति श्रीमहेश्वरम् ।
यस्य श्रीमन्महादेवे भक्तिरव्यभिचारिणी ॥ 188

तस्य हृत्कमले(लं) साम्बः सर्वदाप्यधितिष्ठति ।
साम्बस्य श्रीमहेशस्य सन्निधिर्यत्र सर्वदा ॥ 189

न तस्य पापलेशोऽस्ति सत्यं सत्यं न संशयः ।
सर्वत्र विद्यमानोऽपि शिवभक्तहृदम्बुजे ॥ 190

लिङ्गरूपं समाश्रित्य क्रीडालोलोऽधितिष्ठति ।
ऊधस्येव यथा क्षीरं पशुसर्वाङ्गसंगतम् ॥ 191

शिवः सर्वव्यापकोऽपि शिवलिङ्गमधिश्रितः ।
अतः सर्वं परित्यज्य शिवलिङ्गं प्रयत्नतः ॥ 192

पूजनीयं विधे नित्यं विश्विवद्भक्तिपूर्वकम् ।
शिवलिङ्गे शिवः पूज्यो नान्यत्र तु कदाचन ।। 193

क्षीरलब्धिर्न यथा विषाणादौ स्तनं विना ।
शिवलिङ्गं विना तद्वच्छिवो नान्यत्र पूज्यते ।। 194

शिवपूजा बहुविधा कथ्यते निगमैर्विधे ।
आगमैरपि सा पूजा विविधैवेति कथ्यते ।। 195

षोडशैरुपचारैश्च (उपचारैः षोडशभिः)
पूजनीयोऽन्वहं शिवः ।
तेषु मन्त्राश्च विविधा निगमागमचोदिताः ।। 196

मन्त्राः शिवपराः सर्वनिगगागमचोदिताः ।
सम्यज्ज्ञातुं न शक्ययन्ते विविधा बहवो यतः ।। 197

तथापि तेषु मन्त्रेषु शिवपञ्चाक्षरः परः ।
तेन मन्त्रेण विश्वेशः पूजनीयः प्रयत्नतः ।। 198

शिवपञ्चाक्षरो मन्त्रः सर्वमन्त्रोत्तमोत्तमः ।
न तस्मादधिको मन्त्रो वैदिकोऽन्यत्र दृश्यते ।। 199

शिवपञ्चाक्षरो मन्त्रो वैदिको वेदसम्मतः ।
वेदेषु पठ्यते तद्वद्वेदान्तेषु च पठ्यते ।। 200

ऋषिभिः संस्कृतो मन्त्रः शिवमन्त्रो मुमुक्षुभिः ।
शिवेनापि स्तुतो मन्त्रः शिवमन्त्रः शिवप्रदः ।। 201

श्रीरुद्रमन्त्रमध्यस्थः शैवः पञ्चाक्षरो मनुः ।
वेदावतंसो मन्त्रोऽयं शिवपञ्चाक्षरः स्तुतः ।। 202

तेन मन्त्रेण कर्तव्यं शिवलिङ्गार्चनं बुधैः ।
श्रीमत्पञ्चाक्षरो मन्त्रः सर्वाघौघविनाशकः ।। 203

स्मृतेऽपि पापगिरयो भवन्त्येव हि भस्मसात् ।
पुरा द्विजाधमः कश्चिद्दुराचारपरोऽन्वहम् ।। 204

चकाराशेषपापानि दुर्वृत्तचरितो विधे ।
तेन यावन्ति पापानि कृतानि प्रतिवासरम् ।। 205

तानि तावन्ति पापानि सङ्ख्यातुं नैव शक्यते ।
स ब्रह्मबन्धुः पापिष्ठः कदाचिद्विपिनं ययौ ।। 206

तत्रापश्यत्सरो रम्यं पद्मवृन्दनिषेवितम् ।
राजहंससमाकीर्णं चण्डकारण्डमण्डितम् ।। 207

ददर्श तत्र चण्डालीमुद्दण्डकुचमण्डिताम् ।
दोर्दण्डकृतडिण्डीरामुद्दण्डमुखमण्डलाम् ।। 208

जलावगाहनपरां विवस्त्रां मदनातुरः ।
बभाषे वचनं विप्रो मन्दहासपुरः सरम् ।। 209

द्विजाधमः (आह) -

अपि बाले क्व ते भर्ता भवनं चैव सुन्दरि ।
इदं सर्वमशेषेण यथार्थं वद सत्वरम् ।। 210

विष्णुरुवाच -

इति तद्वचनं श्रुत्वा चण्डाली सा रजस्वला ।
विज्ञाय स्वामसम्भाष्यां तथाप्याहातिविस्मिता ।। 211

चण्डाली उवाच -

मद्गृहस्योपयोगः को मद्भर्तुरपि ते द्विज ।
गच्छ गच्छ स्वमार्गेण यत्र गन्तव्यमस्ति ते ।। 212

विवस्त्रां जलतीरस्थां मा विलोकय मां द्विज ।
विवस्त्रां युवतीं दृष्ट्वा दूरे गच्छन्ति साधवः ।। 213

निर्जनोऽस्ति प्रदेशोऽयमित्येवात्र मयाऽऽगतम् ।
गते मयि त्वयाप्यत्र स्थातव्यं स्वेच्छया द्विज ।। 214

द्विजाधमः(आह) -

त्वया सहात्र कल्याणि स्थातुमिच्छाम्यहं शुभे ।
सङ्गमो युवतीयूनोरत्यन्तसुखदायकः ।। 215

चण्डाली उवाच -

पतिव्रतास्म्यहं विप्र जात्या चण्डाल्यपि द्विज ।
मा मा वदैवं त्व मोहात्त्याज्यो धर्मोऽद्य न त्वया ॥ 216

परस्त्रीगमने पापं बहुधा श्रूयते न किम् ।
साभिलाषं परस्त्रीषु भाषणं चातिनिन्दितम् ॥ 217

पतिव्रतासु नारीसु योऽन्यथा कुरुते मतिम् ।
न तस्य नरकाद्घोरात्सहसा निर्गमो द्विज ॥ 218

चण्डाल्या सह सम्बन्धः कथं वा तव रोचते ।
जुगुप्सापि कथं विप्र मयि नैवाभिजायते ॥ 219

विप्रास्तु पथि चण्डालछायाया अपि सङ्गमे ।
स्नानं कुर्वन्ति यत्नेन सचेलं मन्त्रपूर्वकम् ॥ 220

चण्डालीगमनं साक्षात्कथं कर्तुं समुद्यतः ।
न स्मर्यते त्वया विप्र परलोकभयं महत् ॥ 221

भीतिर्भवतु वा मा वा विप्र ते पारलौकिकी ।
भवन्तं ब्राह्मणाः सर्वे बहिष्कुर्वन्ति नेह किम् ॥ 222

किञ्चात्र यदि भर्ता मे दैवादायाति कानने ।
स भवन्तं मदासक्तं शस्त्रेणैव हनिष्यति ॥ 223

मयापि देयः शापोऽद्य यदि मां स्प्रष्टुमुद्यतः ।
दत्तः पतिव्रताशापो नान्यथैव भविष्यति ।। 224

नाहं विलोकयिष्यामि भर्तृभिन्नं नरं वरम् ।
व्रज विप्र ततः शीघ्रं यत्र कुत्रापि दुर्मते ।। 225

विष्णुः (उवाच) -

इति तद्वचनं श्रुत्वा स विप्रो मदनातुरः ।
चण्डालीगमनं कर्तुं बलात्समुपचक्रमे ।। 226

माऽऽयाहि विप्र माऽऽयाहि मा याहीत्याह सा तदा ।
तदेव वाक्यं शुश्राव तद्भर्ता वनमध्यगः ।। 227

ततः सत्वरमागत्य तद्भर्ता शस्त्रसंयुतः ।
तं द्विज हन्तुमुद्युक्तो धृत्वा केशान्दृढासिना ।। 228

तदा तद्धननोद्युक्तं स्वपतिं साब्रवीत्तदा ।
धर्मशास्त्रविचारज्ञा स्वभर्तृहितकाङ्क्षिणी ।। 229

चण्डाली उवाच -

विप्रः कृतापराधोऽपि न हन्तव्यो मनीषिभिः ।
परन्तु दूरतस्त्याज्यः सत्यमेवोच्यते मया ।। 230

ततस्तमाह विप्रोऽपि प्राणान्मा हर मा हर ।
तव दास्यं करिष्यामि प्राणभीत्या तदा विधे ।। 231

इति तद्वचनं श्रुत्वा चण्डाली शिवतत्परा ।
शस्त्रपाणिं क्रूरचित्तं चण्डालं तमुवाच सा ।। 232

चण्डाली आह -

अनेन मा हरेत्युक्तं द्विवारं दैवयोगतः ।
अतो हरहरेत्युक्तं नामानेन हरात्मकम् ।। 233

हरस्मरणशीलस्य हननं पापसाधनम् ।
तस्मादेतस्य हननं न कर्तव्यं त्वया ध्रुवम् ।। 234

कृतानन्तमहापापोऽप्यपराधयुतोऽपि वा ।
नरः स्मृतहरः सद्यः सर्वपापैः प्रमुच्यते ।। 235

द्विजस्य पापहीनस्य हननं नोचितं ततः ।
अयं कृतापराधोऽपि त्याज्य एव न संशयः ।। 236

अमुं स्मृतहरं विप्रं बलाद्यदि हनिष्यसि ।
तदा भविष्यति क्रूरनरकेष्वेव ते स्थितिः ।। 237

उपकारोऽप्यनेनाद्य कृत एवाधुनावयोः ।
आवाभ्यां संस्मृतो यस्मादेतद्द्वारा हरः परः ।। 238

इदं हर हरेत्येवं नाम साक्षाद्धरात्मकम् ।
श्रुतिश्रुतं श्रोत्रपेयं श्रुतमद्याघवारकम् ।। 239

हरस्मरणमेतस्मिन्नरण्येऽत्यन्तदुर्लभम् ।
श्रवणं हरशब्दस्य ततोऽप्यत्यन्तदुर्लभम् ।। 240

उपकारः कृतोऽनेन यादृशस्तादृशोऽधुना ।
कार्यः प्रत्युपकारोऽद्य तादृशः कोऽपि न ध्रुवम् ।। 241

शक्तिः प्रत्युपकारस्य नावयोर्हतभाग्ययोः ।
शक्तिः प्रत्युपकारस्य महाभाग्यवतां भवेत् ।। 242

हरनामामृतं दैवादधुनानेन पायितम् ।
एतत्प्रत्युपकारस्य प्राणैरपि न सर्वथा ।। 243

यद्यदागणितं द्रव्यं दीयतेऽस्मै तदाप्ययम् ।
नान्तः प्रत्युपकारस्य किं कर्तव्यमतः परम् ।। 244

विष्णुरुवाच -

इति तद्वचनं श्रुत्वा - चण्डालो विस्मितस्तदा ।
तं प्रणम्य ययौ गेहं स्वपत्न्या संयुतो विधे ।। 245

स विप्रः सर्पसन्दष्टः शिवेत्युक्त्वा तनुं जहौ ।
ततो मुक्तोऽभवद्विप्रो विश्वेशकृपया विधे ।। 246

ब्रह्मोवाच -

चण्डाल्यास्तादृशं ज्ञानं कथमासीज्जनार्दन ।
यज्ज्ञानं मोक्षदं साक्षाद्योगिनामपि दुर्लभम् ।। 247

विष्णुरुवाच -

सा भूद्ब्रह्मन् पुरा नारी ब्राह्मणी पतिदेवता ।
पतिशुश्रूषणरता सर्वदा पतिमाश्रिता ।। 248

तया न पूजितं ब्रह्मन् शिवलिङ्गं शिवात्मकम् ।
तया शिवमनभ्यर्च्चं भुक्तमेवान्वहं मुदा ।। 249

तया कदाचिद्दृष्टचैव जाबालोपनिषच्छ्रुता ।
ततः परं द्विजानाह वेदवेदान्तपारगान् ।। 250

ब्राह्मणी -

द्विजा जाबालतत्वज्ञाः शृण्वन्तु वचनं मम ।
अनादरो न कर्तव्यः प्रणताहं कृताञ्जलिः ।। 251

अनर्चितशिवा यान्ति नरकानिति पठ्यते ।
श्रुतिरेषा मयाद्यैव संश्रुता भवतां मुखात् ।। 252

ब्राह्मण्यापि मया विप्रा न कृतं शङ्करार्चनम् ।
भुक्तमीशार्चनं त्यक्त्वा बहुकालं मया द्विजाः ।। 253

रुद्रार्चनविहीनानां विप्रस्त्रीणां श्रुतिश्रुतम् ।
प्रायश्चित्तं किमस्त्यद्य वदन्तु श्रुतिपारगाः ।। 254

प्रायश्चित्तविहीनानां द्विजस्त्रीणां तनुव्यये ।
कथं वा नरकावासः कियत्कालं भविष्यति ।। 255

नरकान्ते पुनर्जन्म भविष्यति कथं द्विजाः ।
एतत्सर्वं विशेषेण वदन्तु प्रणयान्मयि ।। 256

द्विजा ऊचुः -

द्विजन्मनां तु सर्वेषां नित्यं शङ्करपूजनम् ।
कर्तव्यमतियत्नेन न त्याज्यं सर्वथा शुभे ।। 257

द्विजानां द्विजनारीणामयं धर्मः सनातनः ।
द्विजैरिव सदा कार्यं द्विजस्त्रीभिः शिवार्चनम् ।। 258

परं तत्र विशेषोऽस्ति पुंसां शङ्करपूजने ।
न विशेषाधिकारोऽस्ति द्विजस्त्रीणां तु सर्वथा ।। 259

रुद्राध्यायेन सूक्तैः(श्च) नित्यं श्रीरुद्रलिङ्गकैः ।
अभिषेकोऽन्वहं कार्यः शिवलिङ्गे द्विजैः शुभैः ।। 260

रौद्रैर्नानाविधैर्मन्त्रैः कर्तव्यं शिवपूजनम् ।
द्विजानां ब्राह्मणादीनामयं धर्मः सनातनः ॥ 261

स्त्रीभिः पञ्चाक्षरेणैव कर्तव्यं शिवपूजनम् ।
द्विजस्त्रीणामयं धर्मः सर्वासां च सनातनः ॥ 262

द्विजैर्द्विजाङ्गनाभिर्वा त्यक्त्वा शङ्करपूजनम् ।
न पेयं जलमप्यल्पं प्रमादेनापि सर्वथा ॥ 263

द्विजो वा द्विजनारी वा त्यक्त्वा शङ्करपूजनम् ।
यदि भुङ्क्ते तदा योनिश्चाण्डाली प्राप्यते ध्रुवम् ॥ 264

शावाशौचेऽपि कर्तव्यं विना स्पर्शं शिवार्चनम् ।
जन्माशौचेऽपि कर्तव्यं सर्वदा शङ्करार्चनम् ॥ 265

शिवलिङ्गस्पर्शमात्रं न कार्यं सूतकद्वये ।
दूरे स्थित्वा यथायोगं पूजा कार्यैव शङ्करे ॥ 266

शङ्करार्चनकाले तु द्विजो नाशौचदोषभाक् ।
एवं श्रौताग्निहोत्रेऽपि द्विजो नाशौचदोषभाक् ॥ 267

अस्पर्शदोषनाशार्थं सूतकान्ते प्रयत्नतः ।
रौद्रेण चरुणा कार्यो होमो रौद्रः सहस्रकम् ॥ 268

प्रसवो जायते यस्मात्तस्मात्तु शिवपूजनम् ।
कर्तव्यं मानसं नित्यं दशाहान्तं यथाक्रमम् ॥ 269

दशाहे समतीते तु कृत्वा स्नानं यथाविधि ।
शिवलिङ्गार्चनं कार्यं द्विजस्त्रीभिर्द्विजैरिव।। 270

कर्तव्योऽतिप्रयत्नेन सतिलो गोघृतान्वितः ।
होमः कार्यः प्रयत्नेन सहस्रं हविषा द्विजैः ।। 271

स्वस्वशाखोक्तमार्गेण प्रतिष्ठाप्य हुताशनम् ।
सूतके शिवलिङ्गस्य जातमस्पर्शनं यतः ।। 272

ततस्तद्दोषशान्तिस्तु तेन होमेन जायते ।
होमोऽयं (पुरुषाणां तु) विहितः पुंसां स्त्रीणां
तु न कदाचन ।। 273

कार्यं रजस्वलास्त्रीभिर्मानसं शिवपूजनम् ।
स्नात्वा कार्यं चतुर्थेऽह्नि यथापूर्वं शिवार्चनम् ।। 274

यद्येकस्मिन् दिने त्यक्तं शिवलिङ्गार्चनं तदा ।
पञ्चवत्सरपर्यन्तं तप्तशैले स्थितिर्भवेत् ।। 275

दिनद्वये चेद् द्विगुणं त्रिगुणं तद्दिनत्रये ।
एवमेव यथा कालं गुणवृद्धिः प्रजायते ।। 276

सन्त्यक्तेशार्चनायां तु भवन्त्यन्याश्च यातनाः ।
यातनान्ते ततः प्राप्यं दुःखं चण्डालजन्म च ।। 277

शिवलिङ्गार्चनत्यागे चाण्डालं जन्म लभ्यते ।
पातिव्रत्यं त्वया सम्यग्रक्षितं नात्र संशयः ।। 278

तथापि योनिं चाण्डालीं यासि त्यक्तशिवार्चना ॥ 279

विष्णुः -

इति तद्वचनं श्रुत्वा सम्प्राप्ता ब्राह्मणी तदा ।
हा हा हतास्मि दुःखार्तेत्यपतत्पृथिवीतले ॥ 280

तदा सर्पतनुं धृत्वा कालमृत्युः समागतः ।
तद्दृष्ट्वा सा मृता नारी नीता च यमकिङ्करैः ॥ 281

ततः परमघोरेषु नरकेषु स्थिता ततः ।
चण्डालजन्म सम्प्राप्य शङ्करानर्चनाद्विधे ॥ 282

द्विजवाक्यैर्यदा जाता सन्तप्तहृदया पुरा ।
ततो जातिस्मरा साऽभूच्छैवसम्भाषणादपि ॥ 283

प्राप्य चाण्डालजन्मानि सा नित्यं होमवर्जिता ।
शङ्करस्मरणं कृत्वा सर्वदैवाधिसंस्थिता ॥ 284

कृत्वा मृन्मयलिङ्गानि प्रत्यहं प्रीतिपूर्वकम् ।
पूजयामास सा पुष्पैः करवीरादिभिः सदा(शिवम्) ॥ 285

पूजयित्वाऽन्वहं सा तु कालेन विजहौ तनुम् ।
ततः सम्प्राप सा स्वर्गं स्वर्गे शच्या सहास्थिता ॥ 286

ततो विदर्भराजस्य तनया सा बभूव च ।
सा हि बाल्यं समारभ्य यतो जातिस्मराऽभवत् ॥ 287

चकार विधिवद्ब्रह्मन् शिवलिङ्गस्य पूजनम् ।
उद्धूल्य भस्मनाङ्गानि कृत्वा रुद्राक्षधारणम् ।। 288

चकार बालिकाप्यार्या सा नित्य शिवपूजनम् ।
रुद्राक्षालङ्कृता नित्य भस्मोद्धूलितविग्रहा ।। 289

सा रत्नाभरणादीनि जहौ शिवपरायणा ।
सुरत्नपट्टयोग्यापि फालपट्टे मनोहरे ।। 290

फालपट्टं विहायैव सा चकार त्रिपुण्ड्रकम् ।
कण्ठाभरणयोग्यापि कंबुकण्ठी मनोरमा ।। 291

रेजे रुद्राक्षकण्ठा सा हैमाभरणवर्जिता ।
चन्दनागरुकस्तूरीयोग्यापि वरवर्णिनी ।। 292

जहौ सा चन्दनादीनि भस्मोद्धूलनतत्परा ।
शिवेति शब्दमनिशमुच्चार्य जननीं प्रति ।। 293

किञ्चिद्वदति सानन्दं स्वेप्सितं मुदितानना ।
हरशङ्कर गौरीश पार्वतीरमणेति च ।। 294

शिवनामपरैवासीत्सोत्साहा सा ततः परम् ।
कदाचिद्बालिका ह्येषा पृष्टा जनकभूभुजा ।। 295

कथमेतादृशी बुद्धिस्तव जातेति सादरम् ।
पित्रा पृष्टा यथापूर्वं वृत्तान्तमखिलं तदा ।। 296

(जहाद) वक्तुं प्रचक्रमे बाला जनकानन्दवर्धिनी ।
तदुक्तमखिलं श्रुत्वा विदर्भाधिपतिस्तदा ।। 297

पुलकाङ्कितसर्वाङ्गः सानन्दाश्रूण्यवर्तयत् ।
तदाप्रभृति यत्नेन स विदर्भमहीपतिः ।। 298

सादरं पूजयामस शङ्करं लोकशङ्करम् ।
सर्वे तां बालिकां दृष्ट्वा विदर्भाधिपतेः सुताम् ।। 299

सुभगे इति तां प्राहुर्नित्यं जयपुरःसरम् ।
सर्वे शिवार्चका जाता भस्मरुद्राक्षधारिणः ।। 300

शिवस्थानान्यसङ्ख्यानि तत्र जातानि पट्टणे ।
श्रुताः शिवकथा एव सदा वैदर्भपट्टणे ।। 301

शिवनामाङ्किता एव सर्वेऽप्यासञ्जना विधे ।
दिने दिने विदर्भेशोऽप्यष्टैश्वर्यसमन्वितः ।। 302

ववृधे श्रीमहादेवपूजया चतुरानन ।
साऽपि शं पूजयन्त्येव ववृधे नवयौवना ।। 303

सा दत्ता कुलनाथाय विदर्भेण महीभुजा ।
सोऽपि तां सुन्दरीं प्राप्य प्रमोदं परमं ययौ ।। 304

कुलनाथो महादेवं लिङ्गरूपिणमव्ययम् ।
प्रत्यहं पूजयामास रत्नैर्नानाविधैरपि ।। 305

सा वैदर्भ्यपि तं दृष्ट्वा कुलनाथं शिवार्चकम् ।
अत्यन्तमुदिता भूत्वा चकार शिवपूजनम् ।। 306

आर्चयत्परया भक्त्या बिल्वैः पुष्पैश्चनूतनैः ।
वैदर्भी कारयामास नवबिल्ववनानि सा ।। 307

सरांसि कारयामास पूर्णानि कमलैस्तथा ।
कारयामास यत्नेन करवीरवनान्यपि ।। 308

वनानि तानि जातानि शतलक्षं चतुर्मुख ।
पुष्पितान्यतिरम्याणि दृष्टिभव्यानि सर्वदा ।। 309

सा पुष्पैर्बिल्वपत्रैश्च पूजयामास शङ्करम् ।
एवं प्रतिदिनं पद्मैः करवीरैः सितासितैः ।। 310

पूजयन्ती शिवं साम्बं कदाचिद्दैवयोगतः ।
करवीरवनेऽपश्यत् शिवभक्तं द्विजोत्तमम् ।। 311

करवीरैः पूजयन्तं महादेवं सितासितैः ।
सा नत्वा द्विजवर्यं तं शिवपूजापरायणम् ।। 312

बभाषे भक्तिभावेन कृताञ्जलिपुटा विधे ।। 313

वैदर्भ्युवाच -

त्वया सम्पूज्यते नित्यं शङ्करो बिल्वपत्रकैः ।
पङ्कजैः करवीरैश्च पुण्यं स्यात्कीदृशं वद ।। 314

इति तद्वचनं श्रुत्वा पूजान्तेऽसौ द्विजोत्तमः ।
विनयावनतो भूत्वा बभाषे वचनं मुदा ।। 315

द्विजः (उवाच) -

विल्वपत्रान्तरालैस्तु सञ्छाद्य शिवमस्तकम् ।
शिवलोकमवाप्नोति शिवेन सह मोदते ।। 316

विल्वपत्रैः समभ्यर्च्य शङ्करं याति शङ्करम् ।
महद्भ्यः पातकेभ्योऽपि मुक्तिं यास्यत्यसंशयम् ।। 317

त्रिदलं त्रिगुणाकारं त्रिणेत्रं च त्रियायुषम् ।
त्रिजन्मपापसंहारमेकविल्वं शिवार्पितम् ।। 318

त्रिशूलसन्निभैरीशे बिल्वपत्रैः समर्चिते ।
सद्य एव विनश्यन्ति महापातककोटयः ।। 319

बिल्वपत्रेण शुष्केणाप्यर्चितः पार्वतीपतिः ।
ददाति परमामृद्धिं सायुज्यं च तनुव्यये ।। 320

बिल्वपत्रं स्वतः शुद्धं शिवप्रियकरं शुभम् ।
शुभे पर्युषितत्वं च बिल्वपत्रेषु न ध्रुवम् ।। 321

बिल्वपत्रस्य चूर्णैरप्यर्चनीयः सदाशिवः ।
रत्नवद्रक्षणीयानि बिल्वपत्राणि सन्ततम् ।। 322

त्रिल्वपत्रार्चनेनैव तुष्टो भवति शङ्करः ।
महादेवस्य साम्बस्य त्रिल्वपत्रमतिप्रियम् ।। 323

यथा प्रिया हैमवती बिल्वपत्रं तथा प्रियम् ।
अखण्डैर्नूतनैः शुद्धैर्बिल्वपत्रैः प्रयत्नतः ।। 324

यः पूजयति गौरीशं स गौरीशं प्रयास्यति ।
करवीरस्य पुष्पेण रक्तेन धवलेन वा ।। 325

यः पूजयति गौरीशं स पापेभ्यो विमुच्यते ।
यत्पुण्यं लभते मर्त्यो शिवे रत्नसमर्चनात् ।। 326

तत्पुण्यं लभते मर्त्यः करवीरस्य पूजया ।
सुवर्णकमलानां च पूजया गिरिजापतिः ।। 327

हृष्टो ददाति सायुज्यमर्चकाय न संशयः ।। 328

विष्णुरुवाच -

इत्युक्तं तद्वचः श्रुत्वा प्रणिपत्य च तं द्विजम् ।
ततो बिल्ववनादीनि कारयामास सा पुनः ।। 329

सा रत्नैः कारयामास शिवालयमनुत्तमम् ।
तत्र सा कारयामास मुक्ताप्राकारमुत्तमम् ।। 330

तस्मिन् शिवालये सैव रत्नलिङ्गमनुत्तमम् ।
स्थापयामास यत्नेन कुलनाथानुमोदिता ।। 331

तस्मिन् शिवालये भक्त्या घृतदीपा मनोहराः ।
तया दत्ताः प्रयत्नेन हेमपात्रेषु कोटिशः ।। 332

धूपयामास सा शम्भुं नित्यं गुग्गुलुपर्वतैः ।
नैवेद्यं कारयामास दिव्यान्नैराज्यसंयुतैः ।। 333

शिवस्थानमभून्नित्यं सर्वतः पुण्यसङ्कुलम् ।
पुष्पमालापरिवृतं पुण्यगन्धसमन्वितम् ।। 334

नृत्यं चकार सा नित्यं तस्मिन्नेव शिवालये ।
गानं च कारयामास तत्रैव शिवमन्दिरे ।। 335

आर्द्रादिपुण्यऋक्षेषु वेदोक्तान्सा महोत्सवान् ।
कारयामास यत्नेन तत्तत्कालेषु सादरम् ।। 336

तथैव कारिताः शैवा : सुवर्णोत्सवविग्रहाः ।
अलङ्कृता विग्रहास्ते रत्नमालादिभिः सदा ।। 337

सा हैमं कारयामास बहुचक्रान्वितं रथं ।
हेमध्वजपताकाढ्यं मुक्तामालोपशोभितम् ।। 338

तद्धेमरथशृङ्गाणि सत्यलोकमतीत्य च ।
स्थितानि च सुरम्याणि सरत्नानि चतुर्मुख ।। 339

तास्मिन्रथे महादेवमुमादेहार्धविग्रहम् ।
संस्थाप्य पूजयामास सा विदर्भेशनन्दिनी ।। 340

रथारूढं शिवं दृष्ट्वा सन्तुष्टहृदया सती ।
नृत्यं चकार बहुधा कुलनाथं च पश्यति ।। 341

शाङ्करेभ्यो ददौ सैव पृथ्वीं रत्नसमन्विताम् ।
ब्राह्मणान् शाङ्करान् दृष्ट्वा दण्डवत्प्रणिपत्य सा ।। 342

रत्नैः सम्पूजयामास सा शैवानतियत्नतः ।
रत्नासनेषु संवेश्य सा शङ्करपरायणान् ।। 343

पादप्रक्षालनं कृत्वा पपौ तच्चरणोदकम् ।
धूपदीपादिदानैश्च तोषयामास शाङ्करान् ।। 344

यस्य यावदभिप्रेतं शाङ्करस्य धनं तदा ।
ददौ दानोत्सुका तस्मै सा ततोऽप्यधिकं धनम् ।। 345

एवमेवान्वहं प्रीत्या तोषिताः शाङ्करास्तया ।
कार्तिके मासि सा नित्यं रथोत्सवमनिन्दिता ।। 346

कारयामास यत्नेन साम्बस्य परमात्मनः ।
असङ्ख्यघटसम्पूर्णगोक्षीराज्यादिभिर्मुदा ।। 347

गौरीकान्तं सिषेवे सा कार्तिके सोमवासरे ।
चतुर्ष्वपि च यामेषु पुष्पैर्नानाविधैरपि ।। 348

धूपदीपादिभिश्चैव स्वाद्वन्नैश्च निवेदनैः ।
सा सेवमाना वैदर्भी साक्षाच्छम्भुमवैक्षत ।। 349

अनन्तसोमसूर्याग्निप्रतिमं वृषभध्वजम् ।
कर्पूरगौरं सानन्दमुमासंश्लिष्टविग्रहम् ।। 350

चन्द्रार्कवह्निनयनं चन्द्रशेखरमीश्वरम् ।
मुक्तादामपरीताङ्गं दुकूलवसनान्वितम् ।। 351

भ्राजत्फाललसन्नेत्रं भ्राजद्भूतिविभूषणम् ।
रुद्राक्षमालासंवीतं मुक्तामालासमावृतम् ।। 352

रत्नकेयूरकटकरत्नपट्टविराजितम् ।
नानारत्नपरिभ्राजन्मुकुटोद्भासिमस्तकम् ।। 353

वीज्यमानमनन्तैश्च व्यजनैश्चामरैस्तथा ।
अनन्तरत्नरत्युप्तसिंहासनविराजितम् ।। 354

मन्दहाससमाक्रान्तपूर्णेन्दुवदनं प्रभुम् ।
अनन्तप्रमथैः सेव्यं ब्रह्मविष्ण्वादिभिस्तथा । 355

प्रसन्नवदनाम्भोजं दृष्ट्वा नत्वा मुहुर्मुहुः ।
अञ्जलिं मूर्ध्नि विन्यस्य तुष्टाव परया मुदा ।। 356

वैदर्भ्युवाच -

नमो नमः कारणकारणाय
नारायणासेवितपादुकाय ।
नमो नमो भूतिविभूषणाय
विश्वेश शम्भो भगवन्नमस्ते ॥ 357

नमो नमश्चन्द्रकलाधराय
नमो नमो मङ्गलविग्रहाय ।
नमो नमोऽनन्तगुणार्णवाय
विश्वेश शम्भो भगवन्नमस्ते ॥ 358

नमो नमोऽनङ्गमदापहाय
नमो नमः शेषविभूषिताय ।
नमो नमो मङ्गलदायकाय
विश्वेश शम्भो भगवन्नमस्ते ॥ 359

नमो नमः सर्वसुर्वसुराधिपाय
नमो नमः सर्वगुणोज्ज्वलाय ।
नमो नमः सर्वजगन्मयाय विश्वेश - 360

नमो नमोऽनन्तविलोचनाय
नमो नमोऽनन्तकरोज्ज्वलाय ।
नमो नमोऽनन्तशिरोधराय विश्वेश - 361

नमो नमो हेमविभूषणाय

नमो नमः शैलसुताप्रियाय ।

नमो नमो बिल्वदलार्चिताय विश्वेश ।। 362

नमो नमो निर्मितपारदाय

नमो नमो निर्मितभूधराय ।

नमो नमः सर्वगणाधिपाय विश्वेश - 363

नमो नमोऽनन्तरविप्रभाय

नमो नमोऽनन्तविधुप्रभाय ।

नमो नमो वह्निगणप्रभाय विश्वेश - 364

नमो नमो मन्मथसूदनाय

नमो नमोऽज्ञाननिषूदनाय ।

नमो नमस्ते वृषवाहनाय

विश्वेश शम्भो भगवन्नमस्ते ।। 365

नमो नमः सर्वविधायकाय

नमो नमः सर्जितरक्षकाय ।

नमो नमः सर्जितनाशकाय

विश्वेश शम्भो भगवन्नमस्ते ।। 366

विष्णुरुवाच -

इति स्तुत्वा महादेवं वैदर्भी विनयान्विता ।
पूजयामास रत्नौघैः सोमं सगणमादरात् ॥ 367

ततः प्रसन्नो भगवांस्तुष्टस्तत्कृतपूजया ।
वरं वृणु वरं मत्तःकल्याणीत्याह तां शिवः ॥ 368

वैदर्भी उवाच -

कृतार्थोऽस्मि महादेव दर्शनादधुना तव ।
दर्शनात्तव गौरीश जन्म धन्यमभून्मम ॥ 369

यदिदं पादकमलं भोगमोक्षप्रदायकम् ।
दिष्टचा दृष्टं मया शम्भो विष्णुनेत्राम्बुजार्चितम् ॥ 370

हिरण्यबाहुदृष्टं ते रूपं दृष्टं हिरण्मयम् ।
हिरण्यवर्णो दृष्टोऽद्य तव मङ्गलविग्रहः ॥ 371

त्वं हिरण्यपतिर्दृष्टस्त्वं दृष्टोह्यम्बिकापतिः ।
दृष्टोऽस्युमापतिः साक्षाद् दृष्टः पशुपतिर्मया ॥ 372

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं दृष्ट्वा त्वां मुदिताऽस्म्यहम् ॥ 373

प्रत्यक्षोऽसि यतस्त्र्यक्ष ततोऽहं मुदिता प्रभो ।
महेश त्वत्प्रसादेन भुक्तमैश्वर्यमुत्कटम् ।। 374

मया नज्ञातमाजन्म शारीरं दुःखमण्वपि ।
सुखेनैव स्थितं शम्भो सर्वदा त्वत्प्रसादतः ।। 375

कोटिशो रत्नदानानि स्वर्णदानान्यपि प्रिये ।
कृतानि त्वत्प्रसादेन पार्वतीवल्लभान्वहम् ।। 376

उमेश भुक्तभोगायै भोगेच्छा नैव मे प्रभो ।
सत्यं सत्यं पुनः सत्यं देहि मुक्तिमतः परम् ।। 377

विष्णुः (उवाच) -

इति तद्वचनं श्रुत्वा शिवः सन्तुष्टमानसः ।
तामुवाच करं धृत्वा सुप्रीतः परया मुदा ।। 378

सदाशिव उवाच -

इतो हि नवमे मासे तव पुत्रो भविष्यति ।
स भविष्यति सर्वज्ञो मयि भक्तिं करिष्यति ।। 379

स सञ्चरिष्यति स्वेच्छं स्वर्गलोकेऽपि सादरम् ।
सर्वभूमण्डलस्यापि रक्षकः स भविष्यति ।। 380

नित्यं मृन्मयलिङ्गानां सहस्रं पूजयिष्यति ।
स कारयिष्यति प्रीत्या मह्यं मणिशिवालयम् ॥ 381

रत्नौघखचितं दिव्यं रथं निर्मापयिष्यति ।
दाराश्च त्रिशतं तस्य पुत्रास्तत्तुल्यविक्रमाः ॥ 382

एवमग्रेऽपि सुभगे वंशवृद्धिर्भविष्यति ।
मदर्चनं कृतं यस्मात्त्वया सन्ततमादरात् ॥ 383

तेनैतादृशसौभाग्यं तव बाले भविष्यति ।
जीव कल्पशतं बाले त्वं च सौभाग्यपूर्वकम् ॥ 384

नीरोगा नित्यसन्तुष्टा पुष्टाङ्गा नित्ययौवना ।
मयि भक्तिं कुरु प्रीत्या मामभ्यर्चय सन्ततम् ॥ 385

कुरु दानानि यत्नेन प्रत्यहं प्रीतिपूर्वकम् ।
ततः कल्पशतान्ते त्वं मदाराधनपूर्वकम् ॥ 386

त्यक्त्वा स्वकां तनुं भक्त्या मामुपैष्यसि बालिके ।
मदाराधनजाद्धर्माद्भाग्यमेतादृशं त्वया ॥ 387

प्राप्तव्यं नात्र सन्देहः सत्यं सत्यं वरानने ।
यस्तु विश्वस्य मां भक्त्या पूजयिष्यति सन्ततम् ॥ 388

स समाप्नोति देवेशान्मत्तः सौभाग्यमीदृशम् ।
वेदेषु यस्य विश्वासो भविष्यति दृढः सदा ॥ 389

तस्यैव मयि विश्वासो मत्पूजायां भविष्यति ।

विष्णुरुवाच -

इत्युक्त्वा पूजितः सम्यक्तया रत्नादिभिः शिवः ।। 390

शिवात्मके रत्नलिङ्गे सगणोऽन्तर्दधे विधे ।
ततः सन्तुष्टहृदया सा दधौ दौहृद विधे ।। 391

चन्द्ररेखेव ववृधे सुभगा सा दिने दिने ।
ततः सा जनयामास पुत्रं शाङ्करपूजकम् ।। 392

शुभलक्षणसम्पन्नं सर्वावयवशोभितम् ।
स तु जातिस्मरो जातो जातमात्रः स्वभावतः ।। 393

किं वा पुण्यं कृतं तेन पूर्वजन्मनि माधव ।। 394

विष्णुरुवाच -

स बालकः पुरा विप्रो दरिद्रो व्याधिपीडितः ।
व्रणसङ्कीर्णसर्वाङ्गः पुण्डरीकपुरे स्थितः ।। 395

श्रीमच्चिदम्बरेशस्य द्वारि भस्मावकुण्डितः ।
सर्वदैव स्थितः पूर्वं बिल्वभक्षणतत्परः ।। 396

तत्रैव शिवगङ्गायां स्नात्वा भस्मविभूषण: ।
रुद्राक्षभूषणो नित्यं स्थित: पञ्चाक्षरं जपन् ।। 397

एवमेव स्थितो नित्यं बहुकालं तत: परम् ।
नित्यं पार्थिवलिङ्गानि पूजयामास सादरम् ।। 398

ततश्चिदम्बरं त्यक्त्वा वृद्धाचलदिदृक्षया ।
चलितोऽध्वनि मध्याह्ने जहौ प्रणांस्तृषार्दित: ।। 399

तत: सुपुष्पकारूढ: स्वर्गलोकं ययौ विधे ।
स्वर्गलोके स्थित: प्रीत्या बहुकालं द्विजोत्तम: ।। 400

वैदर्भीगर्भमायात: स्वतो भाग्यवशाद्विधे ।
स्थितो गर्भेऽपि दु:खानि नावाप शिवपूजक: ।। 401

बलिभोजनपुण्येन सोऽभूज्जातिस्मरो द्विज: ।
लिङ्गपूजनपुण्येन भूपति: समजायत ।। 402

एवं जातिस्मरो बाल: पितृसन्तोषवर्धक: ।
पूजयामास गौरीशमुत्पत्यवधि सादरम् ।। 403

यथा भक्ति: कृतानेन देवदेवे महेश्वरे ।
तथा भक्तिर्न केनापि शक्यते कर्तुमन्वहम् ।। 404

यथोक्तं श्रीमहेशेन वैदर्भीं प्रति सादरम् ।
तथैव जातस्तत्पुत्र: शिवपूजापरायण: ।। 405

वैदर्भीतनयं दृष्ट्वा श्रीमहादेवपूजकम् ।
सन्तुष्टहृदया जाता सौभाग्यनिलया सदा ।। 406

वैदर्भीतनयो ब्रह्मन्नुपयेमे ततः परम् ।
सहस्रं कन्यकानां च मनोज्ञवपुषां मुदा ।। 407

लक्षाधिकसुता जातास्तस्य तासु शिवार्चकाः ।
पौत्राञ्छिवार्चकान् दृष्ट्वा वैदर्भी मुदिताऽभवत् ।। 408

शिवालयः कृतस्तेन नानारत्नमयः शुभः ।
वैदर्भ्यप्यनिशं शम्भुं आलये सम्प्रतिष्ठितम् ।। 409

पूजयामास बिल्वैश्च पुष्पैर्नानाविधैरपि ।
कदाचित्त्वथ सा शम्भुं पूजयन्त्यतिभक्तितः ।। 410

शिवेश शङ्करेत्युक्त्वा विजहौ मुदिता तनुम् ।
ततः प्रेषितमीशेन पुष्पकं पुष्पसङ्कुलम् ।। 411

विमानं तत्समारुह्य सा ययौ शिवसन्निधिम् ।
तदा दुन्दुभयो नेदुः पुष्पवृष्टिरभूत्तदा ।। 412

गन्धर्वाश्च जगुः सर्वे ननृतुश्चाप्सरोगणाः ।
शिवस्तामागतां दृष्ट्वा दृष्ट्वा च जगदम्बिकाम् ।। 413

बभाषे वचनं प्रीत्या वैदर्भीमपि तोषयन् ।। 414

महादेवः -

इयं मदेकनिरता मदाराधनतत्परा ।
मामेव सर्वदा ध्यात्वा भुवि कालमयापयत् ।। 415

कियत्कालं त्वया साकमत्र क्रीडां करोत्वियम् ।
ततः परमियं देवि मयि लीना भविष्यति ।। 416

मन्नामोच्चारणं कृत्वा तनुस्त्यक्ताऽनया प्रिये ।
ततो मय्यधुनैवेयं लीना भवितुमर्हति ।। 417

तथाप्येषा सखी भूत्वा तव कल्पशतत्रयम् ।
तिष्ठत्वत्यन्तसन्तुष्टा ततो लीना भविष्यति ।। 418

पार्वत्युवाच -

आलस्यं कथमेतस्याः[1] त्वयि शम्भौ प्रसीदति ।
त्वत्प्रसादे विलम्बोऽपि कथं वा जायते वद ।। 419

शिव उवाच -

शिवे! देया मुक्तिरस्यै सन्देहो नात्र सर्वथा ।
कियत्कालं विलम्बेन मुक्तिरस्या भविष्यति ।। 420

---

1. 'अनुग्रविषये' इति योजना कार्या ।।

विष्णुः -

इतीशवचनं श्रुत्वा पुनः सशयसंयुता ।
पार्वती वचनं प्राह शङ्करं लोकशङ्करम् ।। 421

पार्वत्युवाच-

शिव मुक्तैव जातेयं देयाऽन्या मुक्तिरस्ति का ?
कौतुकं क्रियते शम्भो किमेतद्वद सादरम् ।। 422

सदाशिवः -

इयं न परमां मुक्तिं प्रापाग्रे सा भविष्यति ।
सामीप्यं नाम या मुक्तिस्तामापेयं वरानने ।। 423

शिवेति शिवदं नाम सम्यगुच्चारयंस्तनुम् ।
यस्त्यजेत् मन्मयो भूत्वा स मां संविशति ध्रुवम् ।। 424

शिवेति सर्ववेदान्तैः संस्तुतं नाम यन्मया ।
तद्ददाति परां मुक्तिं अन्तकाले स्मृतं शिवे ।। 425

विष्णुः -

इति तद्वचनं श्रुत्वा भवानी शिववल्लभा ।
सन्तुष्टा प्रीतिमापन्ना जाता विच्छिन्नसंशया ।। 426

वैदर्भ्यपि सुखं प्राप्य संस्थिता शिवया सह ।
शिवपूजाप्रभावेण क्रीडामपि चकार सा ।। 427

ततः सा परमां मुक्तिं सम्प्राप्य च शिवाज्ञया ।
शिव रूपैव सा जाता शिवपूजाप्रभावतः ।। 428

वृत्तान्तः सकलोऽप्येष नन्दिकेशेन सादरम् ।
मह्यमुक्तः पुरा ब्रह्मन् तवाद्यासौ निवेदितः ।। 429

अतः शिवेति मन्त्रोऽयं सर्वमन्त्रोत्तमोत्तमः ।
तेन मन्त्रेण सततं पूजनीयः सदा शिवः ।। 430

हेमाद्रिशिखरे सन्ति शिवलिङ्गानि भूरिशः ।
गत्वा तत्रेन्द्रसंयुक्तः पूजयस्व विधे शिवम् ।। 431

अगस्त्यः उवाच -

इत्युक्तो विष्णुना ब्रह्मा सदेवेन्द्रः प्रणम्य तम् ।
जगाम मेरुशृङ्गाग्रं शिवलिङ्गार्चनेच्छया ।। 432

अदृष्ट्वा शिवलिङ्गानि पुनः सम्प्राप केशवम् ।
विष्णुस्तमागतं प्राह निवृत्तोऽसि कथं विधे ।। 433

शिवलिङ्गान्यदृष्टानि मयेत्याह ततो विधिः ।
इति तद्वचनं श्रुत्वा विष्णुर्विस्मितमानसः ।। 434

उवाच वचनं विप्र विधिं विस्मापयंस्तदा ।। 435

विष्णुरुवाच -

हेमाद्रौ शिवलिङ्गानि दृश्यन्ते खलु शाम्भवैः ।
तल्लिङ्गदर्शनं येषां शाम्भवास्ते न संशयः ।। 436

कथं मलिनचित्तानां शिवलिङ्गस्य दर्शनम् ।
प्रायशो नास्ति विश्वासस्तव देवेष्वतस्त्वया ।। 437

हेमाद्रौ शिवलिङ्गानि न दृष्टानि स्थितान्यपि ।
अतोऽधुना सहेन्द्रेण कृत्वोद्धूलनमादरात् ।। 438

धृत्वा रुद्राक्षमालाश्च जप शैवं षडक्षरम् ।
चतुर्विंशतिलक्षं चेज्जप्यते शाम्भवो मनुः ।। 439

तदा वेदेषु विश्वासस्तव ब्रह्मन्भविष्यति ।
जपोऽप्ययं च विधिवत्कर्तव्यो भक्तिपूर्वकम् ।। 440

अन्यथा तव विश्वासो वेदेषु न भविष्यति ।
जाते वेदेषु विश्वासे विश्वासस्ते शिवे भवेत् ।। 441

शिवे जाते च विश्वासे दुःखनाशो भविष्यति ।
शिवे येषां न विश्वासः ते सर्वे दुःखिताः सदा ।
शिवविश्वासहीनानां तद्दुःखं न विनश्यति ।। 442

न भविष्यति विश्वासः सहसा शङ्करे विधे ।
विश्वासः शङ्करे यस्य स धन्य इति गीयते ।। 443

सन्यस्तमानो विश्वासः शङ्करे यदि जायते ।
तदा दुःखानि नश्यन्ति सर्वाण्यपि न संशयः ।। 444

तावद्दुःखानि तिष्ठन्ति विश्वासो यावदीश्वरे ।
अतो जप मनुं शैवं शिवविश्वासकारणम् ।। 445

कुरु शैवस्य मन्त्रस्य विधिवज्जपमादरात् ।
जपेऽपि कुरु विश्वासं शुचिः शैवमनोर्विधे ।। 446

विश्वासेन विना क्वापि न कार्यं सिद्धिमेष्यति ।
अतो जप मनुं शैवं सेन्द्रो विश्वासपूर्वकम् ।। 447

अगस्त्य उवाच -

इति तद्वचनं श्रुत्वा विश्वस्य वचनं द्विजाः ।
जजाप विधिवद्ब्रह्मा सेन्द्रः शैवषडक्षरम् ।। 448

चतुर्विंशतिलक्षाणां जाते शैवमनोर्जपे ।
सर्वेष्वपि च वेदेषु विश्वासोऽभूत्तयोर्दृढः ।। 449

ततः परं महेशेऽपि विश्वासोऽभूत्तयोर्दृढः ।
प्रायश्चित्तविशुद्धं तं प्राह विष्णुर्विधिं ततः ।। 450

विष्णुः -

अतः परं विधे गच्छ हेमाद्रिशिखरं प्रति ।
तत्र शङ्करलिङ्गानि पूजयस्व यथाविधि ।। 451

अगस्त्य उवाच -

इति तद्वचनं श्रुत्वा विष्णुं नत्वा कृताञ्जलिः ।
बभाषे विनयाद्‍ब्रह्मा कृताञ्जलिपुटो द्विजाः ।। 452

ब्रह्मोवाच -

शिवलिङ्गं त्वया विष्णो कथं सम्पूज्यतेऽन्वहम् ।
संस्थाप्यते त्वया कुत्र शिवलिङ्गं समर्चितम् ।। 453

विष्णुः -

विधे ममैव(हृदये) हृत्पद्मे शिवलिङ्गं शिवात्मकम् ।
तिष्ठत्येकं मया तस्य क्रियते पूजनं सदा ।। 454

अगस्त्यः -

इदि तद्वचनं श्रुत्वा विधिर्विस्मितमानसः ।
विष्णो दर्शय तल्लिङ्गमिति प्राह द्विजोत्तमाः ।। 455

विष्णुः -

दिव्यं चक्षुर्ददाम्यद्य तुभ्यमिन्द्राय चाधुना ।
मद्हृत्कमलमध्यस्थं शिवलिङ्गं वि लोकय ।। 456

हृत्पद्मसन्निविष्टं यच्छिवलिङ्गं शिवात्मकम् ।
द्रष्टुं न शक्यते तत्तु सर्वथा चर्मचक्षुषा ।। 457

अगस्त्यः -

इत्युक्त्वा स ददौ विष्णुर्दिव्यं चक्षुस्तयोस्तदा ।
दिव्यचक्षुःप्रदातृत्वं तस्यासीच्छिवपूजया ।। 458

विष्णुहृत्पद्मसंविष्टं शिवलिङ्गं शिवात्मकम् ।
ताभ्यां दृष्टं तदा विप्राः नवबिल्वदलार्चितम् ।। 459

ताभ्यां दृष्टं यदा लिङ्गं विष्णुहृत्पद्मसंस्थितम् ।
तदैव सर्वदुःखानि निवृत्तानि तयोर्द्वयोः । 460

सेन्द्रश्चतुर्मुखस्तत्र चकार शिवपूजनम् ।
पञ्चामृतैर्बिल्वपत्रैर्हैमपद्मैस्तदा द्विजाः ।। 461

इन्द्रः प्राप सुखं सद्यस्तत्र शङ्करपूजया ।
ततो विधिर्ययौ सेन्द्रो हेमाद्रिशिखरं प्रति ।। 462

शिवलिङ्गानि दृष्टानि तत्र तेन ततः परम् ।
सेन्द्रः सम्पूजयामास शिवलिङ्गानि सादरम् ।। 463

शिवलिङ्गानि सम्पूज्य स पुनः प्राप केशवम् ।
लिङ्गानि पूजितानीति हरिं प्राह विधिर्मुदा ।। 464

हरिः पूजितलिङ्गस्य सन्तुष्टस्य विधेर्वचः ।
श्रुत्वा स्वयं च सन्तुष्टः प्राह वाक्यं चतुर्मुखम् ।। 465

विष्णुः -

विश्वस्य देवदेवेशं महेशमनिशं विधे ।
अद्य प्रभृति यत्नेन पूजयस्व यथाविधि ।। 466

आपादमस्तकं सम्यग्भस्मनोद्धूल्य सादरम् ।
सर्वश्रुतिश्रुतं शैवं जप मन्त्रं षडक्षरम् ।। 467

शृणु शैवीं कथां नित्यं वद शैवीं कथां तथा ।
पूजयस्वातियत्नेन शिवभक्त्या पुनः पुनः ।। 468

अप्रमादेन सततं शिवैकशरणो भव ।
इन्द्र त्वमपि यत्नेन सम्पूजय महेश्वरम् ।। 469

गुरो त्वमपि यत्नेन पूजयस्व सदाशिवम् ।
यत्पूजया मुक्तिकान्ता करस्थैव भविष्यति ।। 470

अगस्त्य: -

इति विष्णुवचः श्रुत्वा नत्वा विष्णुं ततो विधिः ।
सेन्द्रो ययौ स्वलोकाय प्रहृष्टवदनो द्विजाः ।। 471

इन्द्रोऽपि गुरुणा साकं ब्रह्मणा प्रेषितस्ततः ।
तुष्टो ययौ स्वलोकाय गतदुःखो द्विजोत्तमाः ।। 472

अतः शिवार्चनेनैव दुःखनाशो भविष्यति ।
शिवार्चनं विना विप्रा दुःखनाशो न जायते ।। 473

संसारबन्धविच्छेदो न शिवराधनं विना ।
यस्य लीलाविहारोऽयं प्रपञ्चो द्विविधो द्विजाः ।। 474

तस्य श्रीविश्वनाथस्य पूजा दुःखापहारिणी ।
विश्वस्य पार्वतीनाथो यष्टव्यश्च मुमुक्षुभिः ।। 475

स्मर्तव्यश्च प्रयत्नेन ध्यातव्यश्च महेश्वरः ।
ध्यानेन तपसा यज्ञैः पूजया च मुहुर्मुहुः ।। 476

प्रीणनीयो महादेवः सर्वदा मुक्तिकाङ्क्षिभिः ।
उद्धूलयध्वमङ्गानि भस्मना प्रतिवासरम् ।। 477

भूषयध्वं शरीराणि रुद्राक्षैः श्रुतिचोदितैः ।
शिरोललाटस्थानानि सितभस्मत्रिपुण्ड्रकैः ।। 478

पावयित्वा प्रयत्नेन पूजयध्वं महेश्वरम् ।
जपध्वमतियत्नेन रुद्राध्यायं मुहुर्मुहुः ।। 479

श्रीरुद्राध्यायमध्यस्थं ध्यातं वेदैः स्तुतं सदा ।
मन्त्रं "नमः शिवाये"ति जपध्वं विधिपूर्वकम् ।। 480

स मन्त्रराजः सर्वेषां मन्त्राणामधिपो द्विजाः ।
नास्ति तत्सदृशो मन्त्रो मन्त्रेषु विविधेष्वपि ।। 481

वेदवेदान्तसंवेद्यः सर्वमन्त्रोत्तमोत्तमः ।
पञ्चाक्षरः स वेदेड्यः स तु मन्त्रशिरोमणिः ।। 482

मोक्षो भवति विप्रेन्द्रस्तज्जपेनैव नान्यथा ।
पञ्चाक्षरं मन्त्रराजं महादेवात्मकं द्विजाः ।। 483

यो जपेदतियत्नेन मुक्तिस्तस्यैव जायते ।
पञ्चाक्षरजपासक्तः पञ्चास्यध्यानतत्परः ।। 484

सर्वप्रपञ्चनिर्मुक्तः प्रपञ्चं नैव पश्यति ।
पञ्चाक्षरविहीनानां मुक्तिर्नास्त्येव सर्वथा ।। 485

पञ्चाक्षरस्य माहात्म्यं न वक्तुं शक्नुयामहम् ।
महेशः सर्वदेवेशः सर्वज्ञः परमेश्वरः ।। 486

जानाति शिवमन्त्रस्य माहात्म्यं नेतरो ध्रुवम् ।
वेदाः स्तुवन्ति ये मन्त्रं वेदान्ताश्च प्रयत्नतः ।। 487

तस्य मन्त्रस्य माहात्म्यं को वा वेद शिवं विना ।। 488

विष्णुः -

इत्यगस्त्यवचः श्रुत्वा वसिष्ठाद्या मुनीश्वराः ।
शिवार्चनपरा जाता भस्मोद्धूलितविग्रहाः ।। 48 9

अतः शिवार्चनं कार्यं सर्वदा शैवपुङ्गवैः ।
मुक्ताः शिवार्चनेनैव बहवः पूर्वमास्तिकाः ।। 490

शिवार्चनात्परो धर्मो नास्ति नास्तीति मे मतिः ।
सत्यमेतत्पुनः सत्यमुद्धृत्य भुजमुच्यते ।। 491

शिवार्चनं परो धर्मस्तपश्च शिवपूजनम् ।
यज्ञाः शिवार्चनं विप्राः सत्यं सत्यं न संशयः ।। 492

शिवार्चनं कृतं येन भक्तिपूर्वकमादरात् ।।
तेन यागाः कृताः सर्वे साङ्गाः सर्वस्वदक्षिणाः ।। 493

शिवार्चनं कृतं येन भक्तिपूर्वकमादरात् ।
कृतानि तेन सर्वाणि महादानानि सन्ततम् ।। 494

शिवार्चनं कृतं येन .... ।
तेनाधीतोऽनन्तशाखी वेदः साङ्गो द्विजोत्तमाः ।। 495

शिवार्चनं कृतं येन .... ।
तेन तीर्थानि सर्वाणि सेवितानि न संशयः ।। 496

शिवार्चनं कृतं येन .... ।
तेन धर्माः समस्ताश्च कृता एव द्विजोत्तमाः ।। 497

सर्वेषामपि धर्माणां विश्वासः फलमीश्वरे ।
तस्यापि फलमुत्कृष्टं श्रीमहादेवपूजनम् ।। 498

सर्वेप्सितार्थाः सिध्यन्ति श्रीमहादेवपूजया ।
तिरस्कृताः कल्पवृक्षाः श्रीमहादेवपूजकैः ।। 499

तृणीकृता कामधेनुः शिवपूजापरायणैः ।
कल्पवृक्षास्तु विप्रेन्द्रा विनश्वरफलप्रदाः ।। 500

फलं शिवार्चनाद्विप्राः प्राप्तव्यं न विनश्वरम् ।
फलं शिवार्चनात्प्राप्यमनल्पमविनश्वरम् ।। 501

शिवार्चनपरो मर्त्यो भक्तिपूर्वकमन्वहम् ।
यं यं कामयते कामं तं तमाप्नोति सर्वदा ।। 502

इच्छामात्रेण सिध्यन्ति तस्यार्थाः सकला अपि ।
गाणपत्यं पुरा प्राप्तं बहुभिः शिवपूजया ।। 503

मुक्ताश्च बहवः पूर्वं महेशस्यैव पूजया ।
अत्रैव नाट्यसदने पुण्डरीकपुरे पुरा ।। 504

त्रपुरारिं समभ्यर्च्य मुक्ता जाताश्च कोटिशः ।
श्रीमच्चिदम्बराधीशो येन दृष्टः कदाचन ।। 505

सोऽपि मुक्तो भवत्येव महेशकृपया द्विजः ।
धन्या यूयं शिवासक्ताः श्रीचिदम्बरवासिनः ।। 506

भस्मरुद्राक्षवीताङ्गाः निःसङ्गाः परमार्थिनः ।। 507

श्रीमहादेवः -

इति विष्णुवचः श्रुत्वा सर्वे ते मुनिपुङ्गवाः ।
धन्योऽसीत्यभिनन्द्यार्ये जग्मुः स्वस्वाश्रमं प्रति ।। 508

विष्णुर्दभ्रसभानाथं ततः सम्पूज्य मां शिवे ।
परमानन्ददां धन्यां प्राप मे काशिकापुरीम् ।। 509

ततः स्नात्वा ज्ञानवाप्यां कृत्वा ज्ञानेशदर्शनम् ।
दण्डपाणिं ततो नत्वा ढुण्ढीशमभिपूज्य च ।। 510

मोक्षलक्ष्मीविलासाख्यं मण्टपं प्राप सत्वरम् ।
ततो ददर्श मां शम्भुं सर्वदेवशिखामणिम् ।। 511

ततः प्राह महालक्ष्मीं मत्पूजनपरां शिवे ।। 512

विष्णुरुवाच -

विश्वेश्वरोऽयं मदनान्तकोऽयं
मृत्युञ्जयोऽयं त्रिपुरान्तकोऽयम् ।
सर्वेश्वरोऽयं सुरवन्दितोऽयं
गौरीश्वरोऽयं च यमान्तकोऽयम् ।। 513

विज्ञानमानन्दमनन्तमीड्यं
विश्वेश्वरं लिङ्गमिदं मनोज्ञम् ।
पश्यैतदाद्यन्तविहीनमार्ये
समर्चयात्रेश्वरमादिदेवम् ।। 514

इत्युक्त्वा मामुमाकान्तं लक्ष्मीकान्तो जनार्दनः ।
पूजयित्वा प्रयत्नेन काश्यामस्यां स्थितः शिवे ।। 515

विष्णुर्दभ्रसभानाथं नृत्यन्तं मां विलोकयन् ।
तेन पुण्यप्रभावेण काशीं प्राप मदात्मिकम् ।। 516

यत्पुण्डरीकं पुरमध्यसंस्थं

तत्रापि दह्रं गगनं विशोकः ।

तस्मिन्यदन्तस्तदुपासितव्यं

मुक्त्यै च काशीं प्राप्तुकामैरनन्यैः ।। 517

।। इति श्रीशिवरहस्ये

सप्तमाम्शे शिवगौरीसंवादे चिदम्बरमाहात्म्ये (?)

पञ्चविंशोऽध्यायः ।।

AN APPEAL

Manuscripts on Palm Leaf or Paper of the ancient works of the wise men of the past, are the great treasures, solely inherited by the Nation and it is the moral obligation of persons who possess them to preserve them safely for the future generations of mankind.

Probably you have some of these in your possession or you know friends or neighbours who possess them. you can make a great contribution to the cause of the preservation not only of our National Culture but also to the Culture of Humanity as a whole by arranging to present such manuscripts to the famous T. M S. S M Library, Thanjavur

The manuscripts so presented will be accepted and acknowledged with pleasure and gratitude by the authorities of the Library, preserved with meticulous care and made available to successive generations of readers and scholars forstudy and research. The hitherto unpublished works found among them, will be printed and published in due course, as facilities occur, with the expression of theLibrary's gratitude for your gift

The great Scholar-King of Tanjore, Rajah Serfoji, has attained immortal fame by dedicating enormous time and wealth to the expansion and firm establishment of this World-famous 'Sarasvati Mahal Library'. It is open to you to share the honour of Serfoji, in your own measure by contributing your manuscripts to the great institution built by him.

This great Honour is beckoning to you to accept it. Will you hasten to take it up? The Library waits for your answer.

DIRECTOR,
Sarasvati Mahal Library, Thanjavur.

STAR PRINT & PACK
THANJAVUR-7